३र्वोयि । अश्वो२३४वायि । ना२का२३४औहोवा । त्वि
१ ११११ १ २११र१ २ १ १ र
या३आ२३४५ ॥(२) इन्दुरश्वोनक्लत्वियः । तन्दूहाउ । रो
२ऽ १ २ ३र२ १ ० २
षा३माभी१नारा२ः । रोषा३ऌहोयि । अभा२यिना२३
५ २र २ऽ १ ३र ३ २ १ ०
४राः । सोमंविश्वा३चायाधाया२ । विश्वा३होयि । चि
२ ५ २ १० ३ २ १
या२धा२३४या । यज्ञायसा३न्तूवद्राया२ः । यज्ञा३हो
३ ५ १ २ ५र २ २ १
यि । यसो२३४हा । तूर२वा२३४औहोवा । द्रया३आ
१ १११
२३४५(३) ॥ १३ * ॥ [२९]
२ र र र र
॥ क्रौञ्चम् ॥ सखायोदायि । सखायोदायि । धजि
१ २र र १ र १ १ १
क्रियाम् । योधाराया२ । पावकंया । परिप्रास्या२ ।
१ २ १ २ १ २
ओन्दाता१यिष्वता२ः । ओइन्दुरा२३श्वाः । नाक्लत्वियः ।
१ १ १
इडा२३भा३४३ । ओर२३४५ई । डा(२) ॥ १ † ॥ [३०]

---

* ऊ० गा० १०प्र० २ख० १३गा० । † ऊ० गा० २१प्र० २ख० १गा० ।

४ २ ४ २
ककुबुत्तरं थमायमीयम्॥ पुरोऽ५जि। ता३यिवो३
४ ५ १ र २ १ २ २ १
अन्धासाः। सुतायमा। दा३यायित्ना३वे। अपा२
१र २ १ २ २ १ऽ र र
श्वा। नꣳश्वा२३या। ऊम्मायि। ष्टा३ना। साखायो
र २ २ १ २ १र २ १
दीर्घजा२यिह्नियाउ॥(१) यांथाः। धारया। पा३वा
२ २ १ १ २ १ २
का३या। परा२यिप्र। स्यन्दा२३ता। ऊम्मायि। सु
२ १ र २ २ १ १
३ताः। आयिन्दुरश्वोनक्का२र्त्वियाउ॥(२) यास्ताम्।
१ र २ १ २ २ १र १ र
दुरोषाम्। आ३भायिना३राः। सोमा२वि। श्वाचा
२ १ १ २ १ऽ र २ २
२३या। ऊम्मायि। धा३या। याम्रायसन्तुवा२द्रया
१ १ १
उ। वा३४५(५)॥ ३ *॥ [३१]
४ २र ४ र र ५ १
॥ अभ्यासाकूपारम्॥ पुरोजितीवोअन्धसः। पू२३४।
र र र ४ ३ र ४ र १र १
रोजितीच्चो५यिवोअन्धसाः। सुतायमादयित्नवे। सु२३४।
र र ४ ३ ४ ३र ४ ५ १
तायमौचो५दयित्नवायि। अपश्वानꣳश्नथिष्टनम्। आ

* ऊ० गा० ११प्र० ३ख० ३सा०।

र र ४ ३ र ४र र ५
२३४। पश्वानौचोप्श्रथिष्टना। सखायोदीर्घजिह्वियम्।
१ र र र ४ ५ १ र
सा२३४। खायोदौचोप्घंजि। ह्वा५योई्हायि॥(१) सखा
४र र ५ १ र र र ४
योदीर्घजिह्वियम्। सा२३४। खायोदौहोप्घंजिह्विया
म्। ३र र ४ र र १र १ र र र
योधारयापावकया। यो२३४। धारयौहोप्पा
४ २ ४ २ ४ र ५ १ र
वकया। परिप्रस्यन्दतेसुतः। पा२३४। रिप्रस्यौहोप्न्द
र ४ २ ४ ३ ४र ५ १ र
तेसुताः। इन्दुरश्वोनकृत्वियः। आ२३४यि। दुरश्वौ
४ ५ २ ४ २ ४ ५
चोप्नकृ। त्वा५योई्हायि॥(२) इन्दुरश्वोनकृत्वियः।
१ र ४ २ ४ २र ४ र ५
आ२३४यि। दुरश्वौचोप्नकृत्वियाः। तन्दुरोषमभीनरः।
१ र र र ४ २र ४ ३र र ४
ता२३४म्। दुरोषौचोप्अभीनराः। सोमंविश्वाच्याधि
५र १ र र ४ २र ४
या। सो२३४। मंविश्वौहोप्चियाधिया। यज्ञायसन्त्व
५ १ र र ४ ५
द्रयः। या२३४। ज्ञायसौचोप्न्तुव। द्रा५योई्हा
यि(३) ॥ ६ * ॥ [३२]

* ऊ० गा० २१प्र० १खं० ६सा०।

Digitized by Google

४ १र ४ ५र र २ २ ३र ४र ५ १
॥ श्यैतम् ॥ पुरोजितीवोअ। धसा३४औहोश्रा। सू
र२ र १ ७ ५ ५ १
तायमा। दयायित्नवा२३४यि। श्रोई्हा। श्र। पाश्वा
२ १ ३ ५ १ र र २
२३नाम्। श्रथा२यि। ष्टा२३४ना। सखायोदायिर्घा३
२ १ ३ ५र र
जा। ऊम्मायि। श्कारया२३४औहोवा(३) ॥ ७ * ॥[३३]
१ र ५र र ४ ५
॥ नौधसम् ॥ पू२३४। रोजितीवोश्र। धासाः।
२ १र २ १ २ १ १ २ १र
सुतायमा। दा३यायित्ना३वे। श्रा२३पा। स्वा। नाम्।
२ ३ ५ १ २ १ २ १ ५ ३
श्नाथिष्टा२३४ना। सा२३खा। योदीर्घजो२३४वा। श्री
५
२३४याम्(३) ॥ ८ † ॥ [३४]
१ १ १ १र १
॥ महादैर्घतमसम् ॥ हाउपुराः। जायिती। वो। श्रन्ध
२ १ २ १ र र र र
सा३ः। श्रन्धसाः। सुतायमादयित्नवेश्रपस्वानꣳश्नथा
२ १ १ र र २
यि। ष्टा१ना२। ष्टाना२। सखायो। दीर्घजा३यि।
१ ३ ५र र १ २ १ २र १
श्नूा२या२३४श्रौहोवा ॥(१) हाउसखा। योदी। घा।

---

* ज० गा० १२प्र० १ख० ७गा०। † ज० गा० १२प्र० १ख० ८गा०।

Digitized by Google

२ १ २ १२ २ २२ २
जिह्वियाऽ३म् । जिह्वियाम् । योधारयापावकयापरिप्र
२ १ १ २ २
स्यन्दताथि । सू१ता२ः । सूता२ः । इन्दुरा । श्वोनका
१२ २ १ २ ५२ २ १ २
३ । श्वोनका२ । त्वा२या२३४औहोवा ॥(२) हाविन्दूः ।
१ २ १ २ १ २ १ २
श्वाश्वः । ना । ह्वात्वियाऽ३ः । ह्वात्विया: । तन्दुरोषम
२ २ २ २ २ १ १ २
भीनरस्सोमंविश्वाचिया । धा१या२ । धाया२ । यशा
१ १ २ १ २ ५२ २
या । सन्तुवाऽ३ । सन्तुवाऽ३ । द्रा२या२३४औहोवा ।
२१ १ १ १
ई२३४५(३) ॥ १२ * ॥ [३५]

१ २ १ २ २२
॥ मरायम् ॥ पूराः । जायितीवोअन्धसः । सः । सः ।
१ २ १ २ २ १
सूता । यमा । दयित्नवेअपश्वानꣳश्नथिष्टननन । सा
२ १ २ २ १ २
खा । योदीर्घंजिह्वियम् । यम् । यम् ॥(१) साखा ।
१ २ २ १ २ १
योदीर्घंजिह्वियम् । यम् । यम् । योधा । रया ।
२ २ २ १ २
पावकयापरिप्रस्यन्दतेसुतः । तः । तः । आयिन्दूः । अ

* ऊ० गा० ११प्र० २अ० १२गा० ।

१ २ १ २ १
ष्वो। नक्षत्वियः। यः। यः॥(२) ष्वायिन्दूः। अश्वो।
२ १ २ १ २र र र
नक्षत्वियः। यः। यः। तान्दू। रोषमभीनरस्सोमंविश्वा
र र र र १ २ १ २
च्याधिया। या। या। याज्ञा। यसा। तुवद्र्यः। यः।
ऽ ऽ ऽ १ १ १ १
यः। हाउहाउहाउ। वा३। ई२३४५(३)॥ १५ *॥ [३६]
२र र र १
॥ महावात्सप्रम्॥ हाउहाउहाउ। चो। होहो
२ २र २ १ र र
वा। (एवन्विः)। पुरोजितायि। वो। अन्धसो। धसो।
र र २ऽ १ र र
धसः। सुतायमा। दा। यित्नवे। यित्नवे। यित्न
र र २ऽ १
वे। अपश्वानम्। श्ना। थिष्टन। थिष्टन। थिष्टन।
र र र २ऽ १
सखायोदी। घा। जिह्नियम्। जिह्नियम्। जिह्नि
र र र २ऽ १
यम्॥(१) सखायोदी। घा। जिह्नियम्। जिह्नि
र र र २ऽ १ र
यम्। जिह्नियम्। योधारया। पा। वकया। वक
र र २ऽ १र र र
या। वकया। परिप्रस्य। दा। तेसुतः। तेसुतः। ते

---

* ऊ० गा० ११प्र० २ष० १५सा०।

सुतः। इन्दुरश्वः। ना। हृत्वियः। हृत्वियः। हृत्वि
यः॥(२) इन्दुरश्वः। ना। कृत्वियः। कृत्वियः। कृ
त्वियः। तन्दुरोषम्। भा। भीनरः। भीनरः। भी
नरः। सोमंविश्वा। चा। याधिया। याधिया। या
धिया। यज्ञायस। ह्ठ। अद्र्यो। द्र्यो। द्र्यः। हा
उ३। ओ। होहोवा। २। ओ। हो। हो२। वा२
३४। औहोवा। ई२३४५(३)॥ ८ *॥[३७] १८

अथ पञ्चमसूक्ते—

प्रथमा।

अभिप्रियाणिपवतेचनोहितो
नामानियह्वोअधियेषुवर्धते।
आसूर्यस्यबृहतोबृहन्नधि
रथंविष्वञ्चमरुहद्विचक्षणः॥ १ †॥

---

* उ० गा० २२प्र० १का० ९सा०।

† छ० आ० ६, २, ९, १ (२ भा० १७१ प०) = ऋ० वे० ७, १, २२, १।

"चनोहित:" [चन इत्यन्ननाम, चायतेरसुनि चन इत्यौणादिक-सूत्रेण निपातित:] चनसे अन्नाय हित:, यद्वा आहितान्न: सोम: "प्रियाणि" जगत: प्रीणयितृणि "नामानि" नमनशीलानि, तान्युदकानि "अभि पवते" अभित: करोति। "येषु" अन्तरिक्षस्थितेषु उदकेषु "यह्व:" महानयं सोम: "अधिवर्द्धते" अधिकं प्रवृद्धो भवति, अपां मध्ये सोमो वसति खलु। तत: "वृहत्" महान् सोम: "बृहत:" महत: परिवृढस्य "सूर्य्यस्य" विष्वञ्चं" विष्वग् गमनम् "अधि रथम्" उपरि रथं "विचक्षण:" सर्वस्य विद्रष्टा "अरुहत्" आरोहति "अग्नौ प्रास्ताहुति: सम्यगादित्य मुपतिष्ठते (मनु० ३अ०७६श्लो०)"-इति॥ १ ॥

अथ द्वितीया।

३ १२ ३१ २ ३१२३१
ऋतस्यजिह्वापवतेमधुप्रियं
३१ २र ३१ ३१ २र
वक्तापतिर्धियोअस्याअदाभ्य:।
१२ ३२ ३१२३ २ १२
दधातिपुत्र:पित्रोरपीच्याऽ३न्नाम-
३२३१ २३१ ३२
तृतीयमधिरोचनन्दिव:॥ २ * ॥

---

* ऋ० वे० ७, २, ३३, २।

"ऋतस्य" सत्यभूतस्य यज्ञस्य "जिह्वा" मुखत्वेन जिह्वास्थानीयः सोमः "प्रियं" प्रियकरं "मधु" मदकरं रसं* "पवते" क्षरति। कीदृशः? "वक्ता" शब्दकृत्; यद्वा, स्तोतृभिः क्रियमाणाः स्तुतयः साधीयस्य इति प्रतिश्रवणस्य कर्त्ता "अस्या धियः" एतस्य कर्म्मणः "पतिः" पालयिता "अदाभ्यः" रक्षोभिर्हिंसितु मशक्यः "पुत्रः" यजमानः "पित्रोः" पिता माता उभयोः † "अपीच्यम्" अन्तर्हितं यत् "नाम" तौ न जानीते नाम कर्मवेलायां तस्मात्तयोरपरिज्ञायमानं "दिवः" द्युलोकस्य "रोचनं" दीप्यमानं "तृतीयं" नाम सोमेऽभिषूयमाणे हिरण्मयेति "अधि दधाति" अत्यन्तं धारयति; "नक्षत्र-व्यावहारिक-नाम्नी प्रथाम्य सोमयाजी तृतीय मस्य नाम"—इति भगवता बौधायनेनोक्तम्॥

"अधिरोचनम्"--"अधिरोचने"—इति पाठौ॥ २॥

अथ तृतीया।

१ २   ३ २ ३ १ २   ३
अवद्युतानःकलशाꣳअचिक्रद

१ २   ३ १ ७   ३ १   २ ३ १ २
नृभिर्येमाणःकोशआहिरण्यये।

* 'मधु स्वादुतमं द्रवम्'—इति वि०।

† 'मातापित्रोर्नाम, अथवा मातापित्रोः पृथिव्यन्तरिक्षयोः'—इति वि०।

३ २ १ १ २ ३ १ २ ३ १ २
अभीऋतस्यदोहनाअनूषताधि
१ २ ३ २ १ १ २
त्रिपृष्ठउषसोविराजसि ॥ ३ * ॥ १९

"द्युतानः" [द्युतदीप्तौ (भ्वा० आ०)] दीप्यमानो "नृभिः" कर्म्मनेतृभिर्ऋत्विग्भिः "हिरण्यये" हिरण्मयकोशे अभिषवण-चर्म्मणि; तस्य हिरण्मयत्वं "हिरण्यपाणिरभिषुणोति"—इति हिरण्य-सम्बन्धात्; तादृशे "कोशे" "येमानः" [छान्दसे कर्म्मणि लिटि कानचि रूपम्] नियम्यमानः सोमः † "कलशान्" द्रोणाभिधान् प्रति "अवाचिक्रदत्" अवक्रदति शब्दायते। ततः "ऋतस्य" सत्यभूतस्य यज्ञस्य "दोहनाः" दोग्धार ऋत्विजः "इमं" सोमम् "अभ्यनूषत" अभिष्टुवन्ति ["ग्रावाणो वत्सा ऋत्विजो दुहन्ति"—इति तैत्तिरीयक-ब्राह्मणे एषां दोग्धृत्व मभिहितम्] "त्रिपृष्ठः" त्रीणि सवनानि तान्येव पृष्ठानि यस्य स तथोक्तः ‡ [त्रिषु च सवनेषु सोमस्य विद्यमानत्वात्। त्रिवक्रादित्वादुत्तरपदान्तोदात्तत्वम्] हे सोम ! तादृशस्त्वम् "उषसः अधि" यागाहनि "विराजसि" ["अधिरीश्वरासाम्

* ऋ० वे० ७, २, ३१, ३।

† 'येमानः सूयमानः'—इति वि०।

‡ 'त्रिपृष्ठः त्रिस्थाने त्रिलोकावस्थानः; अथवा त्रिपृष्ठः ऋग्यजुःसामभिः; अथवा त्रिभिर्वेदैः; सवनैर्वा।'—इति वि०।

(१,४,४६)"—इति द्वितीया] तेष्वहस्सु विशेषेण दीप्यसे । यद्वा राजिरन्तर्णीतण्यर्थः ; अहानि प्रकाशयसि ॥

"येमाणः"-"येमान"—इति, "अभीकृतस्य"-"अभीमृतस्य" —इति, "विराजसि"-"विराजति"—इति पाठाः ॥ ३ ॥ १९

॥ कावम् * ॥ अभ्योवा । प्रियाणिपवताइ । चनोहा इता२ः । नामानियह्वोअधियाइ । युवह्वीता२इ । आ सूर्य्यस्यबृहतो । बृहन्नाधीर२३ । राथा२ँवाइस्वा । चमरु हा२३त् । वाइचा३वा५ऽणा६५६ः ॥(१) ऋतोवा । सृजि ह्वापवताइ ।• मधुप्राया२म् । वक्तापतिर्द्धियोअस्याः । अदाभाया२ः । दधातिपुत्रःपित्रोः । अपीचाया२३म् । नामा३तार्त्ती । यमधाइरो२३ । चाना३न्दा५ऽयिवा६५ ६ः ॥(२) अवोवा । द्युतानःकलशा९ । अचिक्रादा२ त् । नृभिर्य्येमाणकोशआ । हिरण्याया२इ । अभीकृ

° 'सारकावम्'—इति ख० पु० ।

Digitized by Google

तस्यदोहना: । अनूषातार२३ । आधीइचाइपा । उउभा
सो२३ । वाइराउजा५सा६५६इ (३) ॥ १२ * ॥ [१]

॥ ऐडकावम् ॥ ए५ । अभिप्रिया२ । णिपवताथि ।
ए५ । चनोहिता: । ए५ । नामानियार२ । यह्वोअधिया
यि । ए५ । युवर्द्धताथि । ए५ । आसूरियार२ । अवृ
हता: । ए५ । बृहन्नधी । ए५ । रथंविश्वार२ । चमरु
हात् । ए५ । विचक्षणा: ॥(१) ऋतस्यजार२यि: । ह्वा
पवताथि । ए५ । मधुप्रियाम् । ए५ । वक्तापतार२यि: ।
धियोअस्या: । ए५ । अदाभिया: । ए५ । दधातिपूर२त् ।
र:पित्रो: । ए५ । अपीचियाम् । ए५ । नामतृतार२
यि । यमधिरो । ए५ । चनन्दिवा: ॥(२) ए५ । अवद्यु

* ऊ० गा० १प्र० १ख० १२सा० ।

२ ४ ५ ४ ४ ५ ४ ४
तार। नःकवआ०। ए५। अधिक्कदात्। ए५। नृभि

४र २ ४र ५ ४ ४ ५ ४ ४
र्य्येमार। यःक्रोमभा। ए५। हिरण्ययायि। ए५। अ

५ २ ४र ५ ४ ४ र ५ ४ ४
भिद्युतार। स्वदोहना। ए५। अनूषता। ए५। अ

५ २ ४ ५ ४ ४ र ५ ४
धित्रिपार। ष्टुतवसाः। ए५। विराजसायि। हो५

ई। डा(३)॥ २ *॥ [२]

५ १ ४र ५ ४ ५ २ १ २
॥ वैखानसम्॥ अभिप्रीऽयाणिपवतायि। चनोहि

१ २र २र २ १ २र ३ २ १ २ १
ताः। नामानियार२३। ह्वोअधियायि। युवार्द्धतायि।

२र २ २ १ ० १ २ ३ २ १
भासूरिया। स्वभृ२हतोर२३। वृहन्नधायि। रथांवि

१ २ २ २ १ २ ३ २ ५ २
घा। अमरुहा२३त्। विचक्षणा३४३ः॥(१) अतस्था३

४ ५र४ ५ २ १ २ १ २ ३र २ १ २ ३र
जिह्वापवतायि। मधूप्रियाम्। वक्तापता२३यिः। धियो

२ १ २ १ २ ३र २ १ ० १
अस्याः। अदाभियाः। दधातिपूत्। त्रःपा२यित्रो२३ः।

---

* ऊ० गा० ९प्र० १अ० १गा०।

१ २र २ २ १ २ १ १ २ १ २ १ १ २
अपोचियाम् । नामाह्वताायि । यमधिरो२३ । अनन्दि

२ ५ २ ४र५ ४ ५ २ १ २ १
वा३४३ः ॥(२) अवद्यू३तानःकलशान् । अचायिक्रदात् ।

१ १ २र १ २ २र २ १ २ १ १ २र २
नृभिर्य्येमार२३ । णःकोशआ । हिराण्ययायि । अभीऋ

१ ० १ १ २र २ १ २ १ २
ता । स्वदो२हनार२३ः । अनूषता । अधायित्रिपा । ष्ठ

३ २ १ २ २र २ १
उषसो२३ । विराजसा३४३यि । ओ२३४५ई ।

डा(३) ॥ १८* ॥ [३]

४ ३ ४ २ ४
॥ यज्ञायज्ञीयम् ॥ अभाऽ५यिप्रि । या३णा३यिपव

५ १ २ २ २ २ २ २ १
तायि । चाऽनोहितोनामानियाह्वोअधियायि । षू३वा

२ २ १र १ २ २
ह्वा३तायि । आसू२र्यस्यबृहतोबृहन्न । धिरा२३याम् ।

१ २ २ १ २ २ १
ऊम्मायि । वा३यिश्वा । च । मद्द्वद्विचा२क्षणाउ ॥(१) पा

२ १ २ २ २ २ २
आ । तस्यजिह्वापवतेमधुप्रियंवक्तापतिर्द्धियोअस्याः । आ

* ऊ० गा० १४प्र० १ख० १८गा० ।

१ २ २ १ १ र र
दाभा३याः। दधा२तिपुत्त्रःपित्रोरपीचि। यज्ञा२३

२ १ १ १ १ र १ २
मा। ऊम्मायि। ता३र्त्ता। यामधिरोचना२न्दिवाउ ॥(२)

१ २ १ र र र र र
वाचा। वद्युतानःकलशाँ ऽअचिक्रदन्नृभिर्य्येमाणःकोशआ।

२ १ २ १ १ १ र र र
वा३विरोष्या३यायि। अभी२ऋतस्यदोहनाअनूष। त

२ १ २ २ १ र २
आ२३धा। ऊम्मायि। वा३यिपा। ष्ठाउषसोविरा२ज

२ १ १ १ १
साउ। वा२३४५ (३) ॥ १५ * ॥ [४]

१ २ १ १
॥ वैधृतवासिष्ठम् ॥ अभिप्रियाणी२। प। वता२यि।

२ २ २ ५ १र१र २ १ १
चनोहा२३४यिताः। नामानियाह्वो२। अ। धियार

३ १ २ ५ २र१र २ १ १
यि। षुवह्वा२३४तायि। आसूरियास्या२। बृ। हतो

२१ २ ५ २ १ २ १ १
२। बृहन्ना२३४धायि। रथंविषाञ्चा२म्। अ। रुहा

२ ४ २ १
२३त्। विचा३क्षा५णाई ५ ईः ॥(१) ऋतस्यजायिह्वा२।

* ऊ० गा० १६प्र० १ख० १५गा०।

१ २ ३ १ २ ५ २ १र २ १
प। वतार्श्यि। मधुप्रा२३४याम्। वज्रापतायिवो२।
१ ३ २ २ ५ १ १र ११
यः। अस्थार:। मदाभार२३४याः। दधातिपूषा२ः।
१ ३ १ २ ५ १र १ २ १
पि। चोरः। अपायिचा२३४याम्। नामहतायिया२
१ २ ४ २
म्। अ। धिरो२३। चना३न्दा५यिवा६५६ः॥(२) च
१ १ २ १ २ ५
वद्युताना२ः। क। लशा८२। मधायिक्षा२३४दात्।
२ १र १ २ १ ३ २ २ ५
नृभिर्य्यमाणा२ः। को। श्रां२। हिरण्या२३४यायि।
२ १र २ १ २ १ २ २ २ ५ २
मभीकृतास्था२। दो। इना२ः। मनू षा२३४ता। म
१ २ १ १ २ ४
धित्रिपाष्ठो२ः। ङ। मसौ२३। विरा३जा५सा६५६
यि(३)॥१४*॥[५]

इति सामवेदार्थ-प्रकाशे उत्तराग्रन्थस्य प्रथमस्याध्यायस्य
पञ्चमः खण्डः † ॥ ५ ॥

---

* ऋ० मा० १८प्र० १ख० १४मा०। † 'उत्त चार्भवः'—इति वि०।

Digitized by Google

अथ षष्ठे खण्डे,

प्रथमसूक्ते प्रगाथे—प्रथमा ।

१ १ २　　१ १ २ ३१　२　३ १ १
यज्ञायज्ञावोअग्नयेगिरागिराचदक्षसे ।
१ २३ २ ३ १ १ २　१ २　　३ १ ३ १　२र
प्रप्रवयमम्टतञ्जातवेदसम्प्रियम्मित्रन्नशꣳसिषम॥१*॥

हे स्तोतारः! "वः" यूयं "यज्ञायज्ञा" यज्ञे यज्ञे सर्व्वेषु यागेषु "दक्षसे अग्नये" प्रवृद्धाग्नये "गिरा गिरा" स्तुतिरूपया वाचावाचा स्तोत्रं कुरुतेति शेषः। च शब्दो भिन्नक्रमो वः-इत्यस्मात् परो द्रष्टव्यः। यूयं "च" स्तोत्रं कुरुत। "वयम्" अपि "प्रप्रशंसिषम्" ["प्रसमुपोदः पादपूरणे (८, १, ६०)"—इति प्र-शब्दस्य द्विरुक्तिः पादपूरणार्था; व्यत्ययेनैकवचनम् (३, ४, ९८); छान्दसोलुक् (७, १, ३९)] प्रशंसाम कीदृशम्? "अमृतम्" मरणरहितं "जातवेदसम्" जातानां वेदितारं जातप्रज्ञं जातधनं वा "मित्रं न" सखिभूतमिव "प्रियम्" अनुकूलम्। यद्वा, व्यत्ययेन (३, ४, ९८) त्वमित्यस्य वसादेशः; अग्नय इति च कर्म्मणि चतुर्थी, "क्रियाग्रहणं कर्त्तव्यम्"—इति कर्म्मणः सम्प्रदानत्वात्; च-शब्दश्च चणिति निपातः, चेदर्थे वर्त्तते; दक्षस इति च दक्षेर्वृद्धिकर्म्मणः (भ्वा० आ०) अस-

* ऋ० आ० १, १, ४, १ (१ भा० १४७ पृ०) = ऋ० वे० ४, ८, १, १। 'अग्निर्वैश्वानरयार्ष अग्निः छोतदेवता'—इति वि०।

भावितव्यर्थाल्लिङि रूपम् ; चण्-योगात् "निपातैर्यद्यदिहन्त० (८, १, ३०)"—इति निघात-प्रतिषेधः । तथाय मर्थः—हे स्तोतः ! त्वं यज्ञे यज्ञे इम मग्निं गिरा गिरा स्तुत्या स्तुत्या च दक्षसे च वर्द्धयसि चेत् वयमपि अमृतत्वादिगुणकं तं प्रशंसामः ॥ १ ॥

अथ द्वितीया ।

३ १र २र३ २ ३ १र २र३१र ३र ३ १ २
ऊर्ज्जोनपातꣳसहिनायमस्मयुर्द्दाशेमहव्यदातये ।
२ ३१ २ ३ १र २र३ १ २ ३ २ ३ २ ३ १ २
भुवद्वाजेष्ववितांभुवद्वृधउतत्रातातनूनाम् ॥२*॥२०†

"ऊर्जः" अन्नस्य बलस्य "नपातं" पुत्रं प्रशंसिष मित्यनुषङ्गात् प्रशंसामेत्यर्थः ‡ । "हिना" [—इति निपात-द्वय-समुदायो हीत्यस्यार्थे ¶] "सः" खलु "अयम्" अग्निः § "अस्मयुः" अस्मान् कामयमानो भवति । वयञ्च "हव्यदातये" हव्यानां हविषां देवेभ्यो दात्रे तस्मा अग्नये "दाशेम" हवींषि दद्याम ।

* ऋ० वे० ४, ८, १, २ । † 'अत्र अग्निष्टोम साम'—इति वि० ।

‡ 'ऊर्जः अन्नानि । न पातं, न शब्द उपमार्थीयः यथा, अन्नानि । पिबन्तं पालयन्तं भक्षयन्तं वा'—इति वि० ।

¶ 'हिनः, हिनो मनुष्यः ; हीनायुर्वा नष्टनिर्वी नष्टो वा'—इति वि० ।

§ 'अयं यजमानः'—इति वि० ।

Digitized by Google

तम् "उत" अपिच "तनूनाम्" तनयानां मस्मत्पुत्राणाञ्च* "त्राता" रक्षिता "भुवत्" भवतु ॥ २ ॥ २०

४ २ ४ २ ५ ५
॥ यज्ञायज्ञीयम् ॥ यज्ञाऽ५य। ज्ञा२वो३ग्नायाइ।
१ २ २ १ २ २ १ १
आइराइरा। चा३दा३क्षा३साइ। पग्नो२वयममृतम्।
२ २ १ २ २ १
जाता२३वा। ऊम्माइ। दा३साम्। प्रायन्मित्र९सुशा
३ २ १ २ १ २ १ २
२९सिषाउ ॥(१) प्रायाम्। माइत्राम्। सू३शा९सी
२ २ १२ १ २ २ १
३षाम्। ऊर्ज्जोनपा२त९सचि। नाया२३मा। ऊम्मा
२ २ १ २ ३ २ १ २ १
इ। स्मा३यूः। दाशेमहव्यदा२तयाउ ॥(२) दाशे। मा
२ १ २ २ १ २ १ २ २
हा। व्या३दाता३याइ। भुवद्वाजे२षवि। ताभू२३वा
१ २ २ १ २ २
त्। ऊम्माइ। वा३र्द्धाइ। ऊतत्रातातन्२नाउ। वा
१ १ १
३४५(३) ॥ १४ † ॥ [१]

२ २ २ २ २
॥ विश्वोविश्वीयम् ॥ यज्ञायज्ञाऽम्। वो३अग्नयायि।

* 'तनूनां शरीरिणाम्'—इति वि०।

† ऊ० गा० १प्र० १ख० १४गा०।

१र २ १ २ २ १ १ र
इराइरा। चा३दाश्वा३साथि। पप्रो२वयमम्नतम्। जा

२ १ २ २ १ ५
तार३वा। ऊम्नाथि। दा३सा३म्। प्रा२३४यꣳहाथि।

१ ११ २ ५ १ २
श्रो। ऊवाथि। मा२३४यित्वाम्। ऊम्माथि। सू३

२ १ ५र ५ २
श्रा३। सा२३४यिषाम्। एहियाई्हा॥(१) प्रियम्मित्रम्।

र २ १ २ २ १ र
इम्। सू३शꣳसिषाम्। ऊ३र्ज्जोना३पा। तꣳसहि। ना

२ १ २ २ १ र५
या२३मा। ऊम्माथि। स्वा३यू३ः। दा२३४म्रेहाथि।

१ ११ २ ५ १ २ २
श्रो। ऊवाथि। मा२३४हा। ऊम्माथि। व्या३दा३।

१ ५र ५ १रर र र
ता२३४याथि। एहियाई्हा॥(२) दाश्वेमहाऽम्। व्या३

५र १ २ २ १ र २ १
दातयाथि। भू३वाद्वा३जे। षवि। ताभू२३वात्। ऊ

२ १ १ ५ १ ११
म्माथि। वा३र्ज्जा३यि। ऊ२३४तहाथि। श्रो। ऊवा

३ ५ १ २ २
यि। चा२३४ता। ऊम्माथि। ता३नू३१२३४नाम्।

५र ५ ४
एहियाई्हा। हो५ई। डा(३)॥ ५ *॥ [२]

---

* ऊ० गा० १२प्र० १ख० ५सा०।

२र र र १ २

॥ वारवन्तीयोत्तरम्॥ यज्ञायज्ञाऔहोहायि। वो

३ ५ २र र १ १ १र

अग्ना२३४यायि। इराइराचदक्षासो२३४हायि। प्रप्रो

र र २ २र ४र ५ १ २ ५

वयममृतञ्जातवेदा३४। औहोवा। इहा२३४हायि।

२ २ ५ २१ २ १ ० २ ३र

उऊवा२३४साम्। प्रियम्मि। त्रा७ंशुसा७ंसा३४। औ

४र ५ १ २ ५ ३र २ ५र

होवा। इहा२३४हायि। औहो३१२३४५। षाम्। ए

५ २ र र १ र २

हियाहा॥(१) प्रियम्मित्राऔहोहायि। सूश७ंसा२३४

५ २र १ ५ १र र २

यिषाम्। ऊर्ज्जोना२३४हा। पात७ंसहिनायमस्मा३४।

३र ४र ५ १ २ ५ २ २ ५ २र१र२

औहोवा। इहा२३४हायि। उऊवा२३४यः। दाशेम।

१ ० र २ ३र ४र ५ १ २ ५ ३र

हव्यदाता२३४। औहोवा। इहा२३४हायि। औ

२ ५र ५ ३र र र र १

हो३१२३४। यायि। एहियाइहा॥(२) दाशेमहाऔहो

२ २ ५ २१ ५ १र

हायि। व्यादाता२३४यायि। भुवाद्दा२३४हा। जेष

र २ ३र ४र ५ १ २ ५ २ २

विताभुवद्दा३४। औहोवा। इहा२३४हायि। उऊवा

Digitized by Google

२३४द्वायि। उतत्वा। तातन्२३४। औहोवा। द्दा
२३४द्वायि। औहो३१२३४। नाम्। एहियाऽ६हा ३)

॥११*॥ [३]

॥ महावैश्वामित्रम्॥ हयायि। हया३। ओहाओ
हा। हयायि। हया३। ओहाओहा। हयायि। ह
या३। ओहाओहा। यज्ञायज्ञा। वोअग्नाया२यि।
दूराद्दूरा। चदक्षासा२यि। पप्रीवयममृतञ्जा। तवे
दासा२म्। प्रियम्मित्राम्। सुशꣳसायिषा२म्॥(१)
प्रियम्मित्राम्। सुशꣳसायिषा२म्। ऊर्ज्जः। नापा
२। नापा२। तꣳसहिना। यमस्मायू२ः। दाशेम
हा। व्यदाताया२यि॥(२) दाशेमहा। व्यदाताया२
यि। भुवत्। वाजा२यि। ष्वविता। भुवद्वार्द्धा२यि।

* ऊ० गा० १३प्र० १ख० ११म०।

उतन्वाता। तनूना२म्। उतनौ। तातनूना२म्।
हयायि। हया३। ओहाओहा। हयायि। हया३।
ओहाओहा। हयायि। हया३। ओहाओहा।
होऽइडा। होऽइडा। हो२३४५ई। डा(३)॥ २० *॥[४]

॥ दैर्घश्रवसम्॥ यज्ञायज्ञावो अग्नय ओहाओहा३ए।
इराइराचदक्षसे। ओ३हा। ओ३हा३ए३४। प्रप्रौ ३४
वयाम्। अमृतम्। जातावेदसाम्। ओ३हा।
ओ३हा३ए३४। प्रिया३४म्मित्रा३म्। सुशो२३४वा।
सा५यिषोऽहायि॥(१) प्रियाम्मित्रꣳसुशꣳसिषमोहाओ
हा३ए। ऊर्ज्जोनपा। ओ३हा। ओ३हा३ए३४। तꣳ
सा३४चिना। यामस्मयुः। ओ३हा। ओ३हा३ए३४।
दाशा३४यिमहा३। व्यदो२३४वा। ता५योऽहायि॥(२)

* ऊ० गा० ११प्र० २ख० २०सा०।

१र र र र र १ १ र १ ५
दाशेमहव्यदातयओहाओहा३ए। भुवद्वाजायि। ओ
२ ५ २ २ २ २ २ २ १ १र ५
३हा। ओ३हा३ए३४। ध्रुवा३४विता। भुवद्वृधे। ओ
२ ५ २ २ १ १ २ २ १ ५
३हा। ओ३हा३ए३४। उता३४त्रूनाना३। नो२३४वा।
४ ५
नूऽपुनो६हायि(३)॥ २१ *॥ [५]

२र र र १ र १ २
॥ कण्वबृहत्॥ औहोयग्नायग्ना३ए। वोआग्ना१या
३र २ १ र २र र १ २
२३४यि। हाहोयि। आयिराइराचदक्षसे। पप्रीवा१
३र र ३ २ १ ५
या२३४म्। हाहो। सुग्ना३। सा२३४यिषाम्। उ
५ २र र २ १ २
हुवा६हाउ॥(१) औहोप्रियम्मित्रा३मे। सुग्रा९सा१यि
३र २ १ र २र १ २
षा२३४म्। हाहोयि। ऊर्ज्जोनपा। तऽसाहा१यिना
३र २ १ २ ३र १ १र
२३४। हाहोयि। यमास्मा१यू२३४ः। हाहोयि। दा
२ ३र २ ३ २ १
ग्नायिमा१हा२३४। हाहो। व्यदा३। ता२३४यायि।
५ ५ २र र र र १ १
उहुवा६हाउ। वा॥(२) औहोदाग्नेमहा३ए। व्यदा

* ऊ० गा० ११प्र० २ख० ११सा०।

२   १र २   १ १र र   १ २
ता१या२३४यि । हाद्योयि । भूवद्वाजे । षुत्रा३ा१यिता

१र २   १ २   १र २   १
२३४ । हाद्योयि । भुवाद्वा१र्द्धा२३४यि । हाद्योयि । उ

२   १र २   २ २   ५
तान्ना१ता२३४ । हाहो । तनू३१२३४नाम् । उद्धवा६

५
हाउ । वा(३) ॥ ८* ॥ [६] २०

अथ तृचात्मक-द्वितीये सूक्ते†—प्रथमा ।

२ ३ १   १र   ३ १ २ ३ १   २ ३   १ २
एह्यू षुब्रवाणि तेग्न इत्थेतरा गिरः ।

३ १ २   ३ १ २
एभिर्वर्द्धास इन्दुभिः ॥ १ ‡ ॥

हे "अग्ने !" "एहि" आगच्छ "ते" तुभ्यं च तदर्थं "गिरः" स्तुतीः "इत्था" इत्थ मनेन प्रकारेण "सु ब्रवाणि" सुष्ठु ब्रवाणीत्याशास्यते । ताः स्तुतीः शृणिवत्यर्थः । "ऊ"—इत्येतत् पूरकम् । "इतराः" असुरैः कृताः स्तुतीः शृणिवति शेषः । तथा च ब्राह्मणम्—"अग्निरित्थेतरा गिर इत्यसुरा हि वा इतरा गिरः"—इति । अपिच आगतस्त्वम् "एभिः" एतैः इन्दुभिः सोमैः "वर्द्धसे" वर्द्धस्व ॥ १ ॥

---

* ऊ० गा० ११प्र० १ आ० ८गा० ।

† 'उक्तोऽग्निष्टोम इदानीं शुक्रोऽभिधीयते'—इति वि० ।

‡ ऋ० आ० १, १, १, ७ (१ भा० १०४ पृ०) = ऋ० वे० ४, ५, २४, १ । ऋ० शाकमश्वः । छ० गायत्री । एवमेवोत्तरत्र ।

अथ द्वितीया ।

१ २क २र ३ २ ३ १ २ ३ १ २
यत्क्वचते मनो दक्षन्दधस उत्तरम् ।
१ ३ १ २
तत्रयोनिङ्कृणवसे ॥ २ * ॥

हे अग्ने ! "ते" तव "मनः" अनुग्रहात्मक मन्तःकरणं "यत्र" यस्मिन् देशे "क्वच" कस्मिंश्चिद् यजमाने वर्त्तते, "तत्र" तस्मिन् यजमाने वर्त्तमाने "उत्तरम्" उद्गततरं श्रेष्ठं "दक्षं" बलकर मन्नं वा "दधसे" धारयसि तथा "योनिं" स्थानं च "कृणवसे" तस्मिन् यजमाने करोषि ।

"तत्र योनिं"-"तत्रासदः"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

१ २र३ १ २ ३ १ २र ३
नहि ते पूर्त्तमक्षिपद्भुवन्नेमानाम्पते ।
३ २ १ २
अथादुवो वनवसे ॥ ३ † ॥ २१

हे अग्ने ! "ते" त्वदीयं "पूर्त्तं" पूरकं तेजः ‡ "अक्षिपत" अक्ष्णोः पातकं विनाशकं "न हि भुवत्" न भवतु सर्व्वदा

---

* ऋ० वे० ४, ५, २४, २ ।   † ऋ० वे० ४, ५, २४, ३ ।

‡ विवरणमये "पूतम्"—इति पाठः । अतएव 'पूतं पावनात्मकम्'—इति व्याख्यातम् ।

Digitized by Google

अस्माकं दर्शनसामर्थ्यं करोतु। हे "नेमानां पते" नेमशब्दो-ऽल्पवाची, मनुष्याणां मध्ये कतिपयानां यजमानानां * पते पालक! "अथ" अतः कारणात् "दुवः" [दुवस्यतिः परिचरण-कर्मा (निघ० ३, ५, ५)] अस्माभिर्यजमानैः कृतं परिचरणं "वनवसे" सम्भजस्व ॥ ३ ॥ २१

५र र १ ४ र ५ ५ १ र
॥ साकमश्वम् ॥ एह्यूषू३ब्रवाणा६इताइ। अग्नइत्थे

र १ २र १ २ १
तरागा२इराः। एभा२इर्वर्द्धा। सया२३हा३४३इ। दू२

५ ५ ५ २ ४ र ५ ५ १
३४ओ६हाइ। यत्रकूइवचतेमा६नाः। दधन्वसउत्मा

१ २ १र ० २ १
२राम्। तवा२यानाइम्। कृणा२३हा३४३इ। वा२३

५ ५ ५ २ ४र ५ ५ १ र
४सो६हाइ ॥(२) नहिताइपूर्त्तमक्षाइपात्। भुवन्ने

र र १ २ १ १
माना२ताइ। अथा२दुवाः। वना२३हा३४३इ। वा

५ ५
२३४सो६हाइ(३) ॥ १५ † ॥ [१]

५र र र र १ २ २
॥ साकमश्वम् ॥ एहियूषाओहोहायि। ब्रवाणा२

५ २ १ ५ १र र १ २र
३४यितायि। अग्नाआ२३४यिष्ठायि। थेतरागा३४। औ

---

* 'नेमानां अर्द्धो रक्षाम इन्द्रियाणां वा'—इति वि०।

† ऊ० गा० १प्र० १ अ० १५गा०।

Digitized by Google

४र ५ १ २ ५ २ २ ५ २र १ २
होवा । इहा२३४हायि । उञ्जवा२३४राः । एभिर्व ।
१ ७ २ २र ४र ५ १ २ ५ २र २
र्धसदिन्दू३४ । औहोवा । इहा२३४हायि । औहो३१२
५र ५ २ र र १ २
३४ । भोः । एहियाह्वा ॥(१) यन्नकुवाऔहोहायि ।
२ ५ २ १ ५ १ २
वार्तायिमा२३४नाः । दहान्द्रा२३४हा । धसउता३४ ।
२र ४र ५ १ २ ५ २ २ ५ १ १
औहोवा । इहा२३४हायि । उञ्जवा२३४राम् । तत्
२र १ ७ २ २र ४र ५ १ २ ५
यो । नायिकृणवा३४ । औहोवा । इहा२३४हायि ।
२र २ ५र ५ २ र र र
औहो३१२३४ । सायि । एहियाह्वा ॥(२) नहितेपूर्वो
१ २ २ ५ २ १ ५
होहायि । तामञ्चा२३४यिपात् । भुवान्ना२३४यिहायि ।
१र र २ २र ४र ५ १ २ ५ २ २
मानापा३४ । औहोवा । इहा२३४हायि । उञ्जवा२३
५ २ १र १ १ ७ २ २र ४र ५ १ २
४तायि । मथाद्रु । वोवमचा३४ । औहोवा । इहा
५ २र २ ५र
२ ३ ४ हायि । औहो ३ १ २ ४ ५ । साई । एहियाह्
५
वा(३) ॥ १२ * ॥ [२] २१

* ऊ० गा० ३प्र० १ख० ११गा० ।

अथ तृतीयसूक्ते, प्रगाथे—

प्रथमा ।

३ १ २ ३ १ २ २ ३उ ३ १ २ ३ १ २
वयमुत्वामपूर्व्यस्थूरन्नकच्चिद्भरन्तोवस्यवः ।

१ २ ३ १ २
वज्रिञ्चित्रꣳहवामहे ॥ १ * ॥

हे "अपूर्व्य" पिषु सवनेषु प्रादुर्भूतत्वादभिनव ! हे "वज्रिन्" वज्रवन्निन्द्र ! "भरन्तः" सोमलक्षणैरन्नैस्त्वां पोषयन्तः "वयम्" "चित्रं" चायनीयं विविधरूपं वा "त्वामु" त्वामेव "अवस्यवः रक्षणमात्मन इच्छन्तः सन्तः "हवामहे" आह्वयामः। तत्र दृष्टान्तः—"स्थूरं न" यथा भरन्तः ग्रीष्मादिभिस्तैहं पश्यन्तो जनानां स्थूरं स्थूलं गुणाधिकं "कच्चित्" कञ्चित् पुरुषं यथाह्वयन्ति तद्वत् ।

"वज्रिन्"-"वाजः"—इति पाठौ ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
उपत्वाकर्मन्नूतयेसनोयुवोग्रश्चक्रामयोधृषत् ।

१ २र ३ १ २ ३ २ ३ १ २ ३ १
त्वामिद्ध्यवितारंववृमहेसखायइन्द्रसानसिम् ॥ २ † ॥ २२

* ऋ० आ० ५, १, २, १ (१ भा० ८१० पृ०) = ऋ० वे० ६, २, १, १ ।
† ऋ० वे० ६, २, १, २ ।

प्रथमपादः प्रत्यक्षकृतः। हे "इन्द्र!" "कर्मन्" अग्निष्टोमादि कर्मणि * "ऊतये" रक्षणाय "त्वा" त्वाम् "उप" गच्छामः†। द्वितीयः पादः परोक्षकृतः। "यः" इन्द्रः "धृषत्" धृष्णोति शत्रूनभिभवति ["ञि धृषा प्रागल्भ्ये (स्वा० प०), "बहुलं छन्दसि (२, ४, ७३)"—इति शप्रत्ययः] "युवा" तरुणः "उग्रः" उद्गूर्णः स इन्द्रः "नः" अस्मान् प्रति "चक्राम" आगच्छतु; यद्वा, चक्राम अस्मानुत्साहयुक्तान् करोतु [क्रमतेः सर्गार्थे व्यत्ययेन परस्मैपदम्]॥ परोऽर्द्धर्चः प्रत्यक्षकृतः। "सखायः" समानख्याना बन्धुभूता वा वयं "सानसिं" ["वनषण सम्भक्तौ (भ्वा० प०] सम्भजनीयम् "अवितारं" सर्वस्य रक्षितारं "त्वामित्" त्वामेव "ववृमहे" वृणीमहे सम्भजामहे। "हि" प्रसिद्धौ [हि-प्रयोगादनिघातः (८, १, ३४)॥ २॥ २२

५ ४ २ ४ ५र ४ ५ २र १
॥ सौभरम्॥ वया३मू३त्वामपूर्विंयोवा। स्थूरन्नक

७ १ ७ १ २ ५ १
चिद्भरा२न्ता३अवा२३। हो। स्या२३४वाः। वज्रिञ्चित्रम्।

ऽ २ १ २ ५र र ४ २
हवाऽहवा३ह। मा२हा२३४औहोवा॥(१) वज्रा२इन्द्रा३

४ ५र ४ ५ १ र र १ ७
इन्द्रंऽहवामहोवा। उपत्वाकर्मन्नूता२२याइसना २ ३ः।

१ २ ५ १ र ऽ २ १
होइ। यू२३४वा। उग्रश्चक्रा। मयोऽहा३इ। धार

* 'कर्मन्, कर्मणा यः सम्भजते तस्य सम्बोधनं हे कर्मन्'—इति वि०।

† 'उप, समीपे स्थिता'—इति वि०।

Digitized by Google

२ ५र र ५ ४ २ ४ ५र ४ ५ १र
षा२३४औहोवा ॥(२) उग्रा३स्त्रा३क्रामयोधृषोवा । त्वा
१ १ २ ५ १ र
मिध्यविता२रांववा२३ । हो । मा२३४हाइ । सखाय
ऽ २ १ २ ५र र २ १ १
इ । द्रसा३हा३इ । ना२सा२ ३ ४ औहोवा । ऊ २ ३
१ १
४ ५(३) ॥ १६ * ॥ [१]

५ २ ४र ५ ४र ५ १र १ २ १
॥ कालेयम् ॥ वयमू३त्वामपूर्विया । स्थूरान्नकात् ।
२ १ २ १ ५ २ २ १
चिद्भरा२३ । ता३ः । ञ्चा२३४ । व । स्था३वाः । वज्रा
२ २ २ ५ ४ ५
यिच्चित्रौ । वा ३ ४ ३ ओ३४वा । हवा५महायि ॥(१) व
२ ४ ५ ४र ५ २ १ २र १ २र १
ज्रिच्चा३यिञ्च्रं हवामहायि । उपात्वाका । मनूता२३ ।
२ १ ५ २ २ १ २ २
या३यि । सा२३४ः । नः । यू३वा । उग्राश्वक्रौ । वा
२ ५ ४ ५ २ ४र ५ ४
३४३ओ३४वा । मयो५धषात् ॥(२) उग्रश्वा३क्रामयो
५ २ १ २ १ २ १ २ १
धृषात् । तुवामिद्धायि । अविता२३ । रा३म् । वा
५ २ २ १ २ २ २
२३४ । वृ । मा३हायि । सखायऔ । वा३४३ओ ३ ४
५ ४ ४
वा । द्रसा५नसायिम् । हो५इ । डा(३) ॥ १० † ॥[२]२२

* ऊ० गा० १प्र० १ख० १६सा० । † ऊ० गा० २१प्र० १ख० १०सा० ।

Digitized by Google

अथ चतुर्थंदृचे—प्रथमा।

१ २क २र २ १ २ ३ १ २ १ १ २ १ १ २

अधाहीन्द्रगिर्वणउपत्वाकामइमहेससृग्महे।

१२ ३ १ २ ३ २ २

उदेवग्मन्तउदभिः॥ १ *॥

"अधाहि" सम्प्रति हि "त्वा" त्वां "कामे" काम मभिलषितमर्थम् "ईमहे"। यद्वा, "कामे" कामान् कमनीयान् स्तोमान् "उपससृग्महे" उपसृजामः त्वां प्रापयाम इत्यर्थः। तत्र दृष्टान्त माह—"उदेव" यथा उदकेन "ग्मन्तः" गच्छन्तः पुरुषाः "उदभिः" अञ्जलिनोत्क्षिप्योदकैः समीपस्थान् पुरुषान् क्रीडार्थं संसृजति तद्वदित्यर्थः॥

"कामईमहेससृग्महे"-"कामाग्महस्सउमहे"—इति च पाठाः। "उदेवग्मन्तः"-"उदेवयन्तः"—इति च पाठौ॥ १॥

अथ द्वितीया।

१ २र ३ २ ३ १ २ ३ १ २

वार्णत्वायव्याभिर्वर्द्धन्तिशूरब्रह्माणि।

३ १ २ ३ १ २

वावृध्वाꣳसञ्चिदद्रिवोदिवेदिवे॥२ †॥

* ऋ० आ० ४, १, १, ८(१ भा० ८२६ पृ०)= ऋ० वे० ६, ७, २, १।

† ऋ० वे० ६, ७, २, २।

हे "अद्रिवः" वज्रिन्! "शूर" इन्द्र! "वार्ण" यथोदक-मुदकस्थानं "यव्याभिः" नदीभिः ['अवनयः', 'यव्या'—इति (निघ० १,१३, १-२) नदीनामसु पाठात्] "वर्धन्ति" वर्धयन्ति, तथा "ब्रह्माणि" स्तोत्रैः* "वावृध्वांसं" "चित्" यथा निरुदकं देशं नदीभिः तथा न किन्तु प्रवृद्धमेव "त्वा" त्वां "दिवेदिवे" अन्वहं वर्धयन्ति स्तोतारः ॥ २ ॥

अथ तृतीया ।

२ १ ३ १ २ ३ १ २ १ २ ३ १ ३२ ३ १ २ ३ १ २
युञ्जन्तिहरीइषिरस्यगाथयोरौरथउरुयुगेवचोयुजा ।

३ १ २ ३ १ २
इन्द्रवाहास्वर्विदा ॥ ३ † ॥ २३ ‡

"इषिरस्य" गमनशीलस्येन्द्रस्य "उरुयुगे" महायुगे "उरौ" महति "रथे" "इन्द्रवाहा" इन्द्रस्य वाहनभूतौ "वचोयुजा" वचनमात्रेणैव युज्यमानौ "स्वर्विदा" स्वर्गस्य मिन्द्रस्य स्थानं जानन्तौ "हरी" एतन्नामकावश्वौ "गाथया"¶ स्तोत्रेण स्तोतारः "युञ्जन्ति" योजयन्ति ॥

---

* 'ब्रह्माणि धनानि, वेदिवचनवाणि वा, स्तोत्र-ब्रह्माणि कर्माणि वा'—इति वि० ।

† ऋ० वे० ६, ७, २, ३ ।   ‡ "वत्स नामैषम्"—इति वि० ।

¶ 'गाथया, एकवचनं बहुवचनस्य स्थाने द्रष्टव्यम्, गाथाभिः'—इति वि० ।

"उरुयुगेवचोयुजाइन्द्रस्यवाहास्वर्विदा"-"इन्द्रवाहावचोयुजा" —इति पाठौ ॥ ३ ॥ २३

॥ नाम्नं धम ॥ अधाहीन्द्रगिर्वणा३ए। उपत्वाइका। मई२मार३४हाई। सह्मम्माहा। औहौहोर३४वा। ऊ२३४देहाइ। वम्मान्ताऊ। औहौहोर३४वा। हा२ ३४भोः। एहियाह्द्दा ॥(१) वार्णत्वायव्यामी३रे। वद्मी न्तौ३भू। रब्रा२ह्मा२३४णी। वावृध्वा॰सा। औहौहो २३४वा। चा२३४इदहाइ। द्रिवोदाइवा। औहौहो २३४वाइ। एहियाहा ॥(२) युञ्जन्तिहरीइषिराहर। स्य। गा। थ। या। उरौरा३याइ। उरुयू२३४ गाइ। वचोयूजा। औहौहोर३४वा। चा२३४इन्द्रहा इ। वाहावा। औहौहोर३४वा। वा २ ३ ४ इदा। एहियाह्द्दा। होऽ५इ। डा(३) ॥ १७ * ॥ [१]

* ऊ० गा० १प्र० १ख० १७साम।

॥ द्यौतानम् ॥ हा३। ओ३हा३। ओ३हा३। हा यि। अधाह्यियार२यि। द्रुगिर्वा२३४णाः। उपत्वाका२। मईमा२३४हायि। सा३। हम्मा२३४हायि। उदेवग्मा २। तऊदा२३४भायिः॥(१) वार्णत्वा२। यवीया२३४ भौः। वर्द्धन्तिघ्नू२। रभ्राह्मा२३४णो। वा३। वृष्वा २३४९साम्। चिदद्रिषो२। दिवंदा२३४यिवायि॥(२) युञ्जन्तिहा२। रीआयिषा२३४यिरा। स्सगाथया२। उरौरा२३४थायि। उरुयुगे२। वचोयू२३४जा। इन्द्र वाहा२। सुवर्वा२३४यिदा। हा३। ओ३हा३। ओ ३हा३। हा३४। औहोवा। आओ३हो२३ ४५॥ ८ *॥ [२] २३

इति सामवेदार्थ-प्रकाशे उत्तराग्रन्थस्य प्रथमस्याध्यायस्य षष्ठः खण्डः †।

---

* ऊ० गा० १०प्र० २ख० ८गा०।

† 'अग्निष्टोम उक्थ्योक्तः। षोडशी च ब्राह्मण-समाम्नायेन छन्द-समाम्नायेन चाम्नातः। इदानीं मतिरात्रो वक्तव्यः'—इति वि०।

Digitized by Google

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ १ ॥

॥ इत्युत्तरार्च्चिके प्रथमस्यार्द्ध-प्रपाठकः ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीरबुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे प्रथमोऽध्यायः* ॥

---

* मूले तमार्द्धप्रपाठकः समाप्तः, नतु प्रपाठकः ; विवरणग्रन्थेऽपि तथैव ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे, तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १ ॥

॥ अथ द्वितीयाध्याय आरभ्यते ॥

तत्र,

पान्तमाव इति प्रथम-खण्डे—

तृचात्मके प्रथमे सूक्ते,

प्रथमा ।

२ ३ २ ३ १ २ ३ १ २ ३ १र २र
पान्तमावोअन्धसइन्द्रमभिप्रगायत ।
२ १ २ ३ १ २ ३ १ २ ३ २
विश्वासाहꣳशतक्रतुम्मꣳहिष्ठञ्चर्षणीनाम् ॥ १* ॥

हे ऋत्विजः ! "वः" युष्मदीयं "अन्धसः" सोमलक्षणमन्नं "आ पान्तम्" आभिमुख्येन पिबन्तं [पा पाने (भ्वा० प०); छान्दसः शपोलुक् (२, ४, ७२); 'सर्वे विधयश्छन्दसि विकल्प्यन्ते'—इति "न लोकाव्यय (२, ३, ६५)"—इति षष्ठी-प्रतिषेधाभावः; ततोऽन्धस इत्यस्य "कर्त्तृकर्मणोः (२, ३,

* छ० आ० २, २, २, १ (१ भा० २५५ पृ०) = ऋ० वे० ६, ६, १५, १ ।

६५)"—इति षष्ठी। षष्ठी] सोम माभिमुख्येन पिबन्त मेतादृशम् "इन्द्रम्" "अभि प्रगायत" प्रकर्षेण अभिष्टुत। कीदृशम्? "विश्वासाहं" सर्वेषां शत्रूणामभिभवितारं सर्वेषां भूतजातानां वा, अतएव "शतक्रतुं" बहुविधप्रज्ञानं बहुविध-कर्माणं वा "चर्षणीनां" मनुष्याणां "मंहिष्ठं" धनस्य दातृतमम्। यद्वा, यजमानानां यष्टव्यत्वेन पूजनीय मिन्द्रं प्रगायतेत्यर्थः॥ १॥

अथ द्वितीया।

२ १ २ ३ १ २ ३ २ १ २
पुरुहूतम्पुरुष्टुतङ्गाथान्याऽ२ऽ१सनश्रुतम्।
२ ३ १ २
इन्द्रइतिब्रवीतन॥ २*॥

हे ऋत्विग्यजमानाः! "पुरुहूतं" यज्ञेषु बहुभि राहूतं "पुरुष्टुतं" बहुभिः स्तोत्रशस्त्रादिभिः स्तुत मतएव "गाथान्यं" गानयोग्यं गातव्यं† "सनश्रुतं" सनातनया प्रसिद्धम्,‡ एवंविधं देवम् "इन्द्रइति" यूयं "ब्रवीतन" ब्रुवीध्वम् ['ब्रूञ् व्यक्तायां वाचि (अदा० उ०)'—इत्यस्य लङि व्यत्ययेन (३, ४, ८८) ध्वमस्तनबादेशः, अतएव गुणः॥ २॥

---

* ऋ० वे० ६, ६, १५, २।

† 'गाथानि स्तोत्र-शस्त्र मन्त्राणि, ताभिः नीयते यः स गाथान्यः तं गाथान्यम्'—इति वि०।

‡ 'सनशब्दः सदावाची, सदैव विश्रुतम्'—इति वि०।

अथ तृतीया।

१ २ १ २ ३१ २ ३ १र २र ३ १
इन्द्रइन्नोमहोनान्दातावाजानान्नृतुः।
२ १ २ ३ १ २
महाँ२॥अभिज्ञ्वायमत्॥ ३*॥ १

"इन्द्रइत्" पूर्वोक्तलक्षण इन्द्रएव "नः" अस्मभ्यं "महोनां" मघोनां धनवतां पश्वादि-लक्षण-धन-युक्तानां "वाजानाम्" अन्नानां "दाता" भवतु। कीदृशम्? "नृतुः" ["नृतिश्योःक्रूः"—इति क्रूप्रत्ययः, छत्वम्छान्दसः] सर्वस्य नर्त्तयिता†; यद्वा [नृ नये, (क्रमा० पा० प०) औणादिक-तु-प्रत्ययः, धातोऋत्वम्छान्दसः] स्तोतृभ्यो गवादिनेता; अतएव "महान्" स इन्द्रः "अभिज्ञु" अभिगत-जानुकम्‡ अस्मभ्यम् "आ यम त्" आयच्छतु ददातु¶। यद्वा स इन्द्रः अभिज्ञु अस्मदभिमुख मागच्छत धनं स्वहस्तयोः परिगृह्य अस्मान् नयतु,—धनं गृहीत्वा अस्मभ्यं ददात्वित्यर्थः॥

"मघोनाम्"-"महोनाम्"—इति पाठौ॥ ३॥ १

२ ४ २
॥वैतहव्यमोकोनिधनम्॥ पाऽ५न्तम्। आ३वो
४ ५ १र ७ २ ५ १
३अन्धसाः। आइन्द्रामभाइ। प्रगारयार२३४ना। विश्वा

---

* ऋ० वे० ६, ६, १५, २।

† 'नृतुः नृत्योचितः'—इति वि०।

‡ 'अभिज्ञु सर्वस्य ज्ञाता'—इति वि०।

¶ 'आयमत्—यमु बन्धने, सर्वं जगत् कर्मभवैः पाशैर्बध्नाति'—इति वि०।

२ ५ २ १ २ २ १ २ १ २
२सा२३४वाम् । आ३ताका३हूम् । म९हिष्ठच्चर्ष

१ २ ५२र २ र ४ २
णाइ । ना२मा२३४औहोवा ॥(१) पू५रूहू । ता३म्पू३

४ ५ १ र ७ २ ५ १र
रुहूताम् । पूरुहूताम् । पुरू२हू२३४ताम् । गाथा

२ ५ २ १ २ २ १ २ १ २ १
२ना२३४याम् । सा३नाश्रू३ताम् । आइन्द्रइतिब्र । वा

३ ५२र २ ४
इ । ता२ना२३४औहोवा ॥(२) आ५इन्द्रइत् । नो३

२ ४ ५ १ ३ ५ १र
मा३होनाम् । माइन्द्रइनो । मा२हो२३४नाम् । दा

२ ५ २ २ २ १ २र १ २ १र
ता२वा२३४जा । ना३१ना२र्त्तूः । माहा९अभिज्ञु । आ ।

२ ५२र २ १ १ १ १
या२मा२३४औहोवा । ओ३का२३४५ः ॥ १८* ॥ [१] १

अथ द्वितीयदृचे, प्रथमा ।

२ ३ १ २ ३ १ २ ३ १ २
प्रवइन्द्रायमादन९हर्यश्वायगायत ।

१ २ ३ १ २
सखायःसोमपाव्ने ॥ १† ॥

---

* ऊ० गा० १प्र० १ख० १८साम ।

† छ० आ० १, २, २, १ (१आ० ३५८पृ०) = ऋ० वे० ५, ३, १५, १ ।

हे "सखायः" स्तोतारः! "वः" यूयं "हर्यश्वाय" हरिनामकाश्वोपेताय "सोमपाव्ने" सोमानां पात्रे "मादनं" मदकरं हर्षकरं स्तोत्रं प्रगायत ॥ १ ॥

अथ द्वितीया ।

२उ ३ २ ३ १ २ ३ १ ३ २उ ३ १ २
शꣳसेदुक्थꣳसुदानवउतद्युक्षंयथानरः ।
२ ३ १ २
चकृमासत्यराधसे ॥ २* ॥

"उत" अपि च हे स्तोतः! "सुदानवे" शोभन-दानाय "सत्यराधसे" सत्यधनायेन्द्राय† "उक्थं" स्तोमं,‡ "यथा नरः" अन्ये स्तोतारः¶ "द्युक्षं" दीप्तेः साधनभूतं स्तोत्रं शंसति, तद्वत् त्वमपि "शंस" उच्चारय। इदिति पूरणः§। वयमपि "चकृम" स्तोत्रं करवाम ॥ २ ॥

---

* ऋ० वे० ५, ३, १५, २ ।

† 'सत्यराधसे—राधः अन्नं धनं वा, सत्यं वा। सत्यान्नाय, सत्यधनाय, सत्यस्वाय वा'—इति वि० ।

‡ 'उक्थं—उक्थानि सामानि, हे उद्गातः! गायस्व सामानि। अथवा उक्थं शस्त्रमुच्यते तच्छंस होतः! एकवचनं जात्यपेक्षम्, उक्थजातिं शंस।'—इति वि०।

¶ 'यथा नरः—यथा मनुष्याः। प्रथमैषा षष्ठीस्थाने द्रष्टव्या यथा मनुष्यस्य स्तुतिः क्रियते'—इति वि० ।

§ "अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्य-पूरणा आगच्छन्ति पद-पूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति"—इति निरु० नै० १, ९ ।

अथ तृतीया।

१ २ १२उ १ १ २
त्वन्न इन्द्र वाजयुस्त्वङ्गव्युःशतक्रतो।

१ १ ३ १२
त्वꣳ हिरण्ययुर्वसो॥ ३*॥ २†

हे "इन्द्र!" "त्वं" "नः" अस्माकं "वाजयुः" अन्नकामो भव। हे "शतक्रतो" बहुविध-कर्म्मवन्निन्द्र! ‡ "त्वं" "नः" अस्माकं "गव्युः" गोकामो भव। हे "वसो" वासयितरिन्द्र! त्वं "हिरण्ययुः" हिरण्यकामोऽपि भव। ["छन्दसि परेच्छायामपि दृश्यते (वा० ३, ३, ८)"—इति क्यच्॥ ३॥ २

१ ३२३ ५ १
॥ शात्यम्॥ प्रवइन्द्रा२। यमादा२३४नाम्। प्रवा

१ २ २ ३ ५ २ २
२इन्द्रा। औ३चो। या२३४मा। दा३नाम्। हरा

१ २ २ ३ ५ २ २
२अश्वा। औ३हो। या२३४गा। या३ता। सखा२

१ २ २ १ ५ ४ ५
यासो। औ३हो३। मायो२३४वा। आऽ५वोऽ६हा

१ ८ ३२३ ५ २
इ॥(१) शꣳसीदुक्था२म्। सुदाना२३४वाइ। शꣳसा

* ऋ० वे० ५, ३, १५, ३।

† 'गौरीवितेः तद्देवार्षम्'—इति वि०।

‡ 'शतक्रतो—बहुभिः क्रतुभिरिष्टवान् यः स शतक्रतुः। अथवा क्रतुरिति कर्म्मनाम प्रज्ञानाम वा, बहुकर्म्मा बहुप्रज्ञोवा'—इति वि०।

१ २ १ ३ ५ २ १
२इदुक्था। औ३होइ। ख२३४दा। ना३वाइ। उ

१ २ २ ३ ५ २ १ २
ता२युत्ता। औ३होइ। या२३४था। मा३राः। च

१ २ १ १ ५ ४ ५
क्रम। सा। औ३होइ। त्यारो२३४वा। धा५सो६हा

१ ३ १ २ ५ २ १
इ ॥(२) तुवन्नआ२इ। इवांजा२३४यूः। तुवा२न्नआ।

१ २ २ ५ १ २ १ २
औ३होइ। द्रा२३४वा। जा३यूः। तुवा२क्ष्व्यूः। औ

२ २ ५ २ १ १ २
३होइ। आ२३४न। क्रा३ताउ। तुवा२ऽहिरा। औ

२ १ ५ ४ ५
३होइ। त्यायो२३४वा। वा५सो६हाइ(३) ॥१८*॥[१]२

अथ तृतीयतृचे, प्रथमा।

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २
वयमुत्वातदिदर्थाइन्द्रत्वायन्तःसखायः।

१ २ ३ २ ३ १ २
कण्वाउक्थेभिर्जरन्ते ॥ १ † ॥

हे "इन्द्र!" "त्वायन्तः" त्वामात्मनइच्छन्तः "सखायः" समानख्याना वयं "तदिदर्थाः" यद्विषयं स्तोत्रं तत्तदित्, तदेवार्थः

---

* ऊ० गा० १प्र० १ख० १९सा०।

† छ० आ० २, २, २, २ (१भा० ८३० पृ०)=ऋ० वे० ५, ७, २०, १।

प्रयोजनं येषां ; तादृशाः सन्तः "त्वा" त्वां "जरामहे" स्तुमहे। "उ"—इति पूरणः। "कण्वाः" कण्वगोत्रोत्पन्नाः अस्मदीयाः पुत्रादयश्च "उक्थेभिः" उक्थैः शस्त्रैः "जरन्ते" त्वां स्तुवन्ति॥ १॥

अथ द्वितीया।

१ १ २ १र २र ३ १ २ ३ ३ ३ १ २
नघेमन्यदापपनवज्रिन्नपसोनविष्टौ।
२उ ३र १ २
तवेदुस्तोमैश्चिकेत॥ २ *॥

हे "वज्रिन्" वज्रवन्निन्द्र! "अपसः" अपस्विनः कर्म्मवतः† "तव" सम्बन्धिनि‡ "नविष्टौ" अभिनवे यागे वर्त्तमानोऽहं "अन्यत्" त्वद्विषयादन्यत् स्तोत्रं "नघेम्"¶ नैव "आपपन" अभिष्टौमि [पनतेः स्तुतिकर्म्मणः (भ्वा० आ०) उत्तमे णलि रूपम्]; "तवेदु" तवैव "स्तोमैः"§ स्तोमं स्तोत्रं "चिकेत" अभि जानामि‖ त्वामेव सर्वदा स्तौमीत्यर्थः॥ २॥

---

* ऋ० वे० ५, ७, २०, २।

† "अपस्"—इति कर्मनामसु प्रथमं नैघण्टुकम् (२, १, १)।

‡ 'तव—षष्ठी वा द्वितीयार्थे द्रष्टव्या त्वां ० ० ० चिकेत'—इति वि०।

¶ 'अ, घ, ईम्'—इति त्रयोऽप्येते उपसर्गाः'—इति वि०।

§ 'स्तोमैः—क्रतुभिः'—इति वि०।

‖ 'चिकेत—चेतनां कुर्म्मः'—इति वि०।

अथ तृतीया।

२१ १३१ २ २ ३ १२ ३२
इच्छन्तिदेवाःसुन्वन्तन्नस्वप्नायस्पृहयन्ति।

१ २३१ ३११
यन्तिप्रमादमतन्द्राः॥ ३ * ॥ ३ †

"सुन्वन्तं" सोमाभिषवं कुर्वन्तं यजमानं "देवाः" इन्द्रादयः सर्वे "इच्छन्ति" रक्षितुम्, "स्वप्नाय न स्पृहयन्ति" स्वप्नावस्थामस्य सुन्वतो नेच्छन्ति सर्वदा प्रबुद्धमेव कुर्वन्तीत्यर्थः ["स्पृहेरीप्सितः (१, ४, ३६)"—इति कर्म्मणि चतुर्थी; स्पृहईप्सायां चुरादि रदन्तः]। यतएव मतः कारणात् "अतन्द्राः" अनलसा देवाः "प्रमादं" प्रकर्षेण मदकरं‡ तदीयं सोमं "यन्ति" शीघ्रं प्राप्नुवन्ति॥ ३॥ ३

५ २ ३२ ५ १२
॥ काण्वम्॥ वयमूऽत्त्वातदिदर्थाः। ऐहिहा२

१ २ २ २ २१ १ ३
इ। वयमुत्वातदिदर्थाइन्द्रत्वायन्तःसखार३याः। कार

५ १ २१ ५ १
३४ण्वाः। ऊ। क्थाइ। भिऊर्जो२३४वा। रन्ता३या

१११ ५२२ ४२ ५ १२ १२
र३४५॥(१) नघेमाऽन्यदापपना। ऐहिहा२इ। नघे

* ऋ० वे० ५, ०, २०, ३।
† 'अथ काण्वं साम। कण्वस्यार्षम्'—इति वि०।
‡ 'प्रमादं—मदमोदनृप्तावित्यस्येदं रूपम्। प्रकर्षेण तप्यम्'—इति वि०।

Digitized by Google

२ २ ३१ २ ३ ५
मन्यदापपनवज्रिन्नपसोनवा२३इष्टाउ। ता२३४वेत्।

१ २ २२१ ५ ३२ १११ १
ऊ। स्तो। मैंखो२३४वा। वोता३या२३४५॥(२)

५ २ ४२२ ५ १२ १ २२
इच्छन्ता३इदेवाःसुन्वन्ताम्। ऐहिया२इ। इच्छन्तिदेवाः

२ २१ २ ३ ५ १ २
सुन्वन्तन्नस्वप्नायस्पृहया२३न्ती। या२३४न्ती। प्रा। मा।

२१ ५ २ ११११
दमो२३४वा। तन्द्रा३या२३४५(३)॥ २० *॥ [१] ३

अथ चतुर्थतृचे, प्रथमा।

१२ ३१२ ३१२ ३२ ३ १२
इन्द्रायमद्वनेसुतम्परिष्टोभन्तुनोगिरः।
३१२ ३ १२
अर्कमर्चन्तुकारवः॥ १ †॥

"मद्वने" [माद्यतेः (दि०, प०) क्वनिप्] मदनशीलाय "इन्द्राय" तदर्थं "सुतं" सोमं "नः" अस्मदीयाः "गिरः" स्तुतिलक्षणा वाचः परिष्टोभन्तु [स्तोभतिः स्तुतिकर्म्मा (निघ० ३, १४, ४)] सोमं स्तुवन्तु। ततः "कारवः" स्तुतिकारिणः स्तोतारश्च "अर्कं" सर्वैरर्चनीयं सोमम् "अर्चन्तु" पूजयन्तु॥ १॥

---

* ऊ० गा० १प्र० १ख० २० सा०।

† छ० आ० २, २, २, ४ (१भा० ३६२ पृ०)—ऋ० ७, ९, १८, ४।

अथ द्वितीया।

२ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २ १ २
यस्मिन्विश्वा अधिश्रियोरणन्तिसप्तसꣳसदः।

१ २ ३ १ २
इन्द्रꣳसुतेहवामहे॥ २ * ॥

"यस्मिन्" इन्द्रे "विश्वाः" सर्वाः "श्रियः" कान्तयः "अधि" अधिकं भवन्ति अतिशयेन तेजस्वीत्यर्थः†। किञ्च "सप्त" सप्तसङ्ख्याकाः "संसदः" सम्यग् यज्ञेषु कर्म्मकरणार्थं सीदन्तीति संसदो होत्रकाः‡ यस्मिन् "रणन्ति" सोमप्रदानार्थं रमन्ते; यद्वा यं शब्दयन्ति स्तुवन्ति तं पूर्वोक्तलक्षणम् "इन्द्रं" "सुते" सोमेऽभिषुते सति "हवामहे" वयं सोमपानायाह्वयामः॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ १ २ ३ १ २
त्रिकद्रुकेषुचेतनन्देवासोयज्ञमत्नत।

१ २र ३ १ २
तमिद्वर्द्धन्तुनोगिरः॥ ३ ¶ ॥ ४ §

---

* ऋ० वे० ६, ६, १८, ५।

† 'अधिश्रियः—ये अधिश्रिताः मनुजाः'—इति वि०।

‡ 'सप्तसंसदः—सप्तर्त्विजः; यथ उद्गातारः, होता, मैत्रावरुणः, ब्राह्मणाच्छंसि, अच्छावाकः—एते ऋत्विजः'—इति वि०।

¶ ऋ० वे० ६, ६, १९, १।

§ 'अत्र श्रौतकक्षं साम'—इति वि०।

"देवासः" देवाः इन्द्रादयः "त्रिकद्रुकेषु" आभिप्लविकेष्वहःसु ज्योतिर्गौरायुरिति त्रिकद्रुकाः, * तेषु "चेतनं" [चिती सञ्ज्ञाने (भ्वा॰, प॰)] चेतन्ति जानन्ति अनेन स्वर्गादिकमिति चेतनो ज्ञानसाधनो यज्ञः तम् "अत्नत" अतन्वत स्वैः स्वैः कर्म्मभिः पालनैश्च विस्तारितवन्तः [तनु विस्तारे (तना॰, उ॰) लङि "बहुलं छन्दसि (२, ४, ७३)"—इति विकरणस्य लुक्, "तनिपत्योश्छन्दसि (६, ४, ९९)"—इति उपधालोपः "तमित्" तमेव यज्ञं "नः" अस्माकं "गिरः" स्तुतिलक्षणा वाचः "वर्द्धन्तु" वर्द्धयन्तु ॥ ३ ॥ ४

१ र १ १ १र १ १र १ १
॥ शौतकक्षम् ॥ इन्द्रायमद्वनेसुतम्। इन्द्रायमोवा।
१ १ १ १ १र १ १ १
हा३नायिन्ह३ताम्। परिष्टो। भा२३। हा३हा३।
१ २ ५ १ १ १ १ १र
हुनो२गा२३४इरा:। आमर्का३। हा३हा। तुका
२ १ २ १र २ १ २ १
रा२३वा३४३: ॥(१) यस्मिन्विश्वाअधिश्रियः। यस्मिन्विश्वो

* ज्योतिर्गौरायुरितीति चतुर्थ-पञ्चम-षष्ठानां आभिप्लविकानां मध्ये नाम्नां प्रतीकमात्रम्। अस्ति गवामयनादिकं सत्रम्; तच, एकषष्ठ्युत्तरत्रिशतदिननिर्वर्त्यं भवति। तत्र, प्रायणीयोऽतिरात्रनाम प्रथमोऽहः, चतुर्विंशनाम द्वितीयोऽहः, उक्थनाम तृतीयम्, ज्योतिर्गौः चतुर्थोऽहः, आयुर्गौः पञ्चमोऽहः, आयुर्ज्योतिरितिनामकं षष्ठोऽहः, एतान्येव षडहानि आभिप्लविकान्युच्यन्ते; तेष्वेव शेषाण्यहानि चतुर्थादीनि त्रीणि त्रिकद्रुकाणीति।

Digitized by Google

वा । आ३धायिआ३याः । रणन्ति । सा२३ । हा३हा
३ । मासा२ँसा२३४दाः । आइन्द्र२ँसुते३ । हा३हा
यि । ववामा२३हा३४३यि ॥(२) त्वकद्रुकेषुचेतनम् * ।
ट†कद्रुकोवा । पू३वायिता३नाम् । देवासः । या२३ ।
हा३हा३ । मामा२त्ता२३४ता । तामिदर्ब्ब३ । हा३
हा । तुनोगा२३यिरा३४३ः । औ२३४५इ । डा (३)॥१‡॥[१]४

इति सामवेदार्थ-प्रकाशे उत्तराग्रन्थस्य द्वितीयस्याध्यायस्य
प्रथमः ¶ खण्डः ॥ १ ॥

०, † "मि"—इति ख० पु० पाठः ।
‡ ऋ० मा० २म० १ख० १सा० ।
¶ 'उक्तः प्रथमपर्य्यायः'—इति वि० ।

अथ द्वितीयखण्डस्य*—

प्रथम-तृचे, प्रथमा ।

३१ २ ३ २ ३ १२३ १ २३ १ २
अयन्त इन्द्र सोमो निपूतो अधिबर्हिषि ।
१ २ ३ १ २ ३ २ ३ १ २
एहीमस्य द्रवा पिब ॥ १ † ॥

हे "इन्द्र!" "ते" तुभ्यं त्वदर्थम् "अयं सोमः" "बर्हिषि अधि" वेद्यामास्तीर्णे दर्भे "निपूतः" नितरां दशापवित्रेण शोधितः अभिषवादिसंस्कारैः संस्कृत इत्यर्थः । "ईम्" इदानीम् "अस्य" इमं सोमं प्रति "एहि" आगच्छ । आगत्य च यत्र रसात्मकः सोमो हूयते तं देशं "परिद्रव" शीघ्रं गच्छ, तदनन्तरं सोमं "पिब" ॥ १ ॥

अथ द्वितीया ।

१ २३ १ २ ३ १र २र ३ २
शाचिगो शाचिपूजनायं रणाय ते सुतः ।
१ २ ३ १ २
आखण्डल प्र हूयसे ॥ २‡ ॥

"शाचिगो" [शाचयः शक्ता गावो यस्यासौ शाचिगुः; यद्वा, शच व्यक्तायां वाचि (भ्वा०,आ०), अस्मादौणादिक इञ् प्रत्ययः]

* 'इह मौं मध्यमोऽभिधीयते'—इति वि० ।

† उ० आ० २, १; १, ५ (१भा० ३६५पृ०)=ऋ० वे० ६, १, २४, १ ।

‡ ऋ० वे० ६, १, २४, २ ।

Digitized by Google

आचयः अश्वाः प्रख्याता गावो रश्मयो वा यस्य तादृश ! * हे "आचिपूजन" [पूज्यतेऽनेनेति पूजनम्] स्तोत्रादि-प्रख्यात-पूजन ! † "ते" तव "रणाय" रमणाय सुखजननाय "अयं" सोमः "सुतः" अभिषुतः; अतः कारणात् हे "आखण्डल" अनूनामाखण्डयितः इन्द्र ! ‡ "प्रहूयसे" प्रकृष्टाभिः स्तुतिभि-राहूयसे। इत आगत्य इमं सोमं पिबेत्यर्थः॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ १ २
यस्ते शृङ्गवृषोणपात्प्रणपात्कुण्डपाय्यः।

१र ३ १र २र
न्यस्मिन्दध्र आमनः॥ ३ ¶॥ ५ §

हे "शृङ्गवृषोणपात्" [शृङ्गवृष्नामा कश्चित् ऋषिः तस्य चेन्द्रः स्वयमेव पुत्रतया जज्ञे—इत्याख्यायिका। नपादित्य-पत्यनाम] हे शृङ्गवृष-पुत्र ! [शृणन्ति हिंसन्तीति शृङ्गाणि-रश्मयः, तैर्वर्षतीति शृङ्गवृड़ादित्यः, तस्य न पातयितः स्वकीये
१ ऽवस्थानेऽवस्थापयितः ! । "सुबामन्त्रिते (२, १, २)"—इति षष्ठ्यन्तस्य पराङ्गवद्भावेनामन्त्रितानुप्रवेशात् समुदायस्याष्टमिकं

---

* 'अचीति कर्मनाम, कर्मणि प्रयुक्ता गावः प्रदीयन्ते यस्य असौ आचिगुः'—इति वि०।

† 'आचिपूजनः—कर्मणि पूज्यते आचिपूजनः'—इति वि०।

‡ 'आखण्डलः—इन्द्रस्य नामैतत्'—इति वि०।

¶ ऋ० वे० ६, १, २४, ३।

§ 'अत्र देवोदासीर्द्वचनौ। देवोदासमतीने, चौर्द्वचनं सर्वे एकारे।' —इति वि०।

Digitized by Google

सर्वानुग्राहकत्वम् । ईदृश !] हे इन्द्र ! "ते" तव सम्बन्धि "प्रणपात्" प्रकर्षेण नपातयिता रक्षिता, "कुण्डपाय्यः" [कुण्डैः पीयते अस्मिन् सोम इति कुण्डपाय्यः क्रतुविशेषः । "क्रतौ कुण्डपाय्य-सञ्चाय्यौ (३, १, १३०)"—इति पिबतेरधिकरणे यत्-प्रत्ययो युगागमश्च निपात्यते—एतत्संज्ञो यः] क्रतुरस्ति ; "अस्मिन्" कुण्डपाय्य-क्रतौ "मनः" स्वान्तं "आ नि दध्रे" अभितो वर्त्तमानाः कुण्डपायिनामान ऋषयः पुरा निदधिरे सम्यक् त्वद्दैवत्यं क्रतुमनुष्ठितवन्त इत्यर्थः । [दधातेर्लिटि "इरयोरे (६, ४, ७६)"—इति रे-भावः* ॥ ३ ॥ ५

४ ३ ४ ३ ५ १
॥ रात्रिर्दैवोदासम् † ॥ अयन्तइन्द्रसो ऽ४मः । नार३

२५र ४ ५ ४ ५ १ र र २ १ २
४यि । पूतोअधिबर्हिषी । निपूतोअधिबर्हा २ ३ षिषी ।

र १ १ १र ३र ४
ऐहीयिमार३स्या । द्रवापार३४५यिबाई५६ ॥(१) आचि

र ३र ४ ५र ३ २ १ ५र र ४ ५
गोआचिपू । जना३ । आ२३४ । यन्तरणायतेसुताः ।

---

* अत्रैवं व्याचष्टे विवरणकार-माधवः—"यः" "ते" तव हे सोम ! "नपात्" न पिबति तस्य इव्या अन्न ; "प्रणपात्" प्रणिपत्य श्रद्धया पातव्यः । "कुण्डपाय्यः" यत्र कुण्डाकाराः कुण्डप्रतिरूपाः तैः पीयते कुण्डपाय्यः । अथवैतानीन्द्र-विशेषणानि । प्रकृत्याम् इव: प्रधानभूतो गौः, तादृश इन्द्रः ; तस्य यः प्रकर्षेण सोमपानं कल्पयति कुण्डाकारैश्चमसैरितरैश्च । नि अस्मिन् दध्रे, नि-शब्दो न-शब्दस्यार्थे द्रष्टव्यः ; न अस्मिन् यजमाने दध्रे धारयति इन्द्रः आत्मीयं मनः अनुपहाय ?"—इति ।

† 'रात्रीश्चदैवोदासम्'—इति अ० पु० पाठः ।

Digitized by Google

२१ र २१र २ र १ २ १र
अयꣳरणायतेह्व२३ता:। आखण्डा२३ला। प्रह्रया२३४५

३४र ५ ३२ १
सा६५६यि॥(२) यस्तेश्टङ्गवृषः। नपा३त्। प्रा२३४।

५र र ४५ १ र २१र २ १
णपात्कुण्डपायियाः। प्रणपात्कुण्डपाया२३याः। निय

२ १र २
स्मा २ ३ यिन्दा। धृश्मामा २ ३ ४ ५ ना ६ ५ ६:। ई २

५
३ ४ द्वा(३)॥२*॥ [१]

२१ २ १र २ १ २
॥ और्ध्वसद्मनम्॥ अयन्तइन्द्रसोमः। उवाद्दायि।

१रर १ रर
निपूतोअधिबर्हिष्युवा२३द्दोयि। निपूतोअधिबर्हिष्युवा२३

१ २र १ २ ३
द्दोयि। आयिद्दोमस्या। द्रावापा२३४५यिबा६५६॥(१)

१र १र १र २र १ १ १ र र
आचिगोआचिपूजन। उवाद्दायि। अयꣳरणायतेसुत

१ २ १ २ १
उवा२३द्दोयि। (वार२)। आखण्डला। प्राह्रया२३४५

१र २ र र १ २ १
सा६५६यि॥(२) यस्तेश्टङ्गवृषोणपात्। उवाद्दायि। प्रण

र र १ २ १
पात्कुण्डपाय्यउवा२३द्दोयि। (वार२)। नायस्मिन्दा।

* ऊ० गा० १प्र० २ख० २सा०

२, ३ १ १ २ १२ २ १ २ १
धाश्चामा२३४५नाद्६५६ः। सुवृक्तिभिर्नमादनम्भरे२षुवा
१६(३) ॥ ३ * ॥ [२] ५

अथ द्वितीयतृचे, प्रथमा।

१२ १२ २ १ २ ३ २ ३ १२ १२
आतून इन्द्र द्युमन्तञ्चित्रङ् ग्राभंसङ्गृभाय।
३ १२ १२
महाहस्तीदक्षिणेन॥ १ † ॥

हे "इन्द्र!" त्वं "महाहस्तो" महाहस्तवान्, तदानीमेव "नः" अस्मदर्थं "द्युमन्तं" शब्दवन्तं स्तुत्यमित्यर्थः। "चित्रं" चायनीयं "ग्राभं" ग्राहकं ग्रहणार्हं वा धनं "दक्षिणेन" हस्तेन "तु" क्षिप्रं "आ सङ्गृभाय" आभिमुख्येन सङ्गृहाण॥ १ ॥

अथ द्वितीया।

३ १२ १२ ३ २ ३ १ २ २ ३ १
विद्माहित्वातुविकूर्मिन्तुविदेष्णन्तुवीमघम्।
३ १२ १२
तुविमात्रमवोभिः॥ २‡ ॥

---

* ऊ० गा० १प्र० २ख० ३सा०।

† ऊ० आ० १, २, ३, ३ (१भा० ३०८ पृ०)=ऋ० वे० ६, ५, ३७, १।

‡ ऋ० वे० ६, ५, ३७, २।

Digitized by Google

हे इन्द्र! "त्वा" त्वां "विद्म हि" जानीमः खलु। कीदृशम्?—इति, "तुविकूर्म्मिं" बहुकर्म्माणं, * "तुविदेष्णं" बहुप्रदेयं, † "तुविमघं" बहुधनं "तुविमात्रं" बहुप्रमाणम् "अवोभिः" रक्षणैर्युक्तम्॥ २॥

अथ तृतीया।

१ २र ३ १र २र ३ १ २
नहित्वाशूरदेवानमर्त्तासोदित्सन्तम्।
३ २उ ३ १ २
भीमन्नगांवारयन्ते॥ ३ ‡॥ ६¶

हे "शूर!" "दित्सन्तं" दातुमिच्छन्तं "त्वा" त्वां "देवाः" "न हि वारयन्ते" न निवारयन्ति खलु; तथा "मर्त्तासः" मनुष्या अपि न वारयन्ते "भीमं न गां" भयजनकं दृप्तं वृषभं यद्वत् प्रवृत्तमिव, तं यथा वारयितुं न शक्नुवन्ति तद्वत्॥ ३॥ ६

१र २ ३ १ २ १
॥ आकूपारम्§॥ आतूनइ। द्रत्तुमाउन्ताम्। चि

---

* 'तुविकूर्म्मिं' तुविशब्दो बहुवाची, कूर्म्मिशब्दो मनुष्यवाची कर्मवाची वा इति वि०। "तुवि"—इति निघण्टौ बहुनामसु द्वितीयं पदम् (३, १)। कूर्म्मिशब्दस्तु मनुष्यनामसु कर्मनामसु वा पठितो न दृश्यते।

† 'तुविदेष्णं'—देष्णं दानं बहुदानम्'—इति वि०।

‡ ऋ० वे० ६, ५, ३७, ३।

¶ 'अथाकूपारं साम। आकूपाराङ्गिरसौ गोधा च आर्षम्'—इति वि०।

§ 'राज्ञ्याकूपारम्'—इति ख० पु० पाठः।

Digitized by Google

१ र १ २ १ र १
त्वङ्ग्राभꣳसङ्गृभा२या। चित्वङ्ग्राभꣳसम्। गृ। औ३

२ ३ ५ २र १ र र १
होयि। भा२३४या। ऐहोयि। महाहस्तीदत्ता२३हो

२र १ ३र ५ ४ ५
यि। औहो। वाहो२३४वा। णा५यिनो६हायि॥(१)

२ १र र २ २ १र र १
विद्माहित्वातुवि। कू३र्मीम्। तुविदेष्णन्तुवीमा२घाम्।

२ १ र २ २ ३ ५
तुविदेष्णन्तु। वा। औ३होयि। मा२३४घाम्। ऐ

१ र १ २र १ ३र
होयि। तुविमात्रमा२३होयि। औहो। वाहो२३

५ ४ ५ १ र र २
४वा। वो५भो६हायि॥(२) नहित्वाशूर। दा३यि

२ १ र र १ र २
वाः। नमर्त्तासोदित्सा२न्ताम्। नमर्त्तासः। दा। औ

२ ३ ५ २र १ र र २
३होयि। त्सा२३४न्ताम्। ऐहोयि। भीमन्नगांवारा२

१ २र १ ३र ५ ४
३होयि। औहो। वाहो२३४वा। या५न्तो६

५
हायि(३)॥ ४ *॥ [१] ६

---

* ऊ० गा० १प्र० २ख० ४सा०।

अथ तृतीयतृचे, प्रथमा।

२ १ २ ३१२ ३ १ २ ३ १ २
अभित्वावृषभासुतेसुतꣳसृजामिपीतये।
२ १ २ ३ १ २
तृम्पाव्यश्नुहीमदम्॥ १ * ॥

हे "वृषभ" हे इन्द्र! "त्वा" त्वां "सुते" सोमेऽभिषुते सति "सुतम्" अभिषुतं सोमं "पीतये" पानाय "अभिसृजामि"। "तृम्प" तृप्य। "मदं" मदकरं सोमं "व्यश्नुहि" च॥ १ ॥

अथ द्वितीया।

१ २ ३१ २ ३ २ ३ १ ३ २ २ ३ १ २
मात्वामूराअविष्यवोमोपहस्वानआदभन्।
१ २ ३ १ २
माकींब्रह्मद्विषंवनः॥ २ † ॥

हे इन्द्र! "त्वा" त्वां "मूराः" मूर्खा मूढाः, मनुष्याणाम‡ "अविष्यवः पालनकामाः "मा दभन्" मा हिंसन्तु। "उपहस्वानः" उपहसनपराश्च "मा" भवन्तु। "ब्रह्मद्विषं" ब्राह्मणानां द्वेष्टारं "मा कीं वनः" मा भजेथाः ¶॥

"ब्रह्मद्विषं"-"ब्रह्मद्विषः"—इति पाठौ॥ २ ॥

---

* छ० आ० १, २, २, ७ (१भा० ३३८ पृ०)=ऋ० वे० ६, ३, ४६, १।

† ऋ० वे० ६, ३, ४६, २। ‡ आत्मपरिवारमात्राणामिति भावः।

¶ 'वनः—यद्यपि वनतिः स्तुति-कर्मा तथाप्यत्र सम्भजने द्रष्टव्यः; मा यष्टेन सम्भज्यताम्'—इति वि०।

Digitized by Google

अथ तृतीया ।

२ १ २ १ २   २ १ २   २ १ २
इहत्वागोपरीणसम्महेमन्दन्तुराधसे ।
१ २ ३ १२ २२
सरोगौरोयथापिब ॥ ३ * ॥ ७ †

हे इन्द्र ! "त्वा" त्वाम् "इह" अस्मिन् यज्ञे "गोपरीणसं" गव्येन पयसा सम्मिश्रं सोमं ‡ "महे" महते "राधसे" धनाय ¶ "मन्दन्तु" मनुष्या मादयन्तु । त्वञ्च सोमं "यथा" "गौरः" मृगः "सरः" § पिबति, तथा "पिब" ‖ ॥

"परीणसं"-"परीणसा"—इति पाठौ ॥ ३ ॥ ७

२ १ २२   २ १२   २   १ २
॥ आर्षभम् ॥ अभित्वावृषभासुते । सुतꣳसृजामीपा ।
२ १   १ २२   १२   २.   १
मिपीतायारयि । सुतꣳसृजामि । पीता२३यायि । त्वा

* ऋ० वे० ६, ३, ४६, ४ । † 'अथ आर्षभं साम'—इति वि० ।

‡ 'गोपरीणसम्—गावः परि समन्तात् नीयन्ते दक्षिणा यस्य स गोपरीणस इन्द्रः'—इति वि० ।

¶ राधसे—राधः अन्नं सोमलक्षणं तस्मिन् सन्निधानभूते सोमे—इति वि० ।

§ 'सरः सरणं कृत्वा'—इति वि० । "सरः"—इति निघण्टौ उदकनामसु षड्‌विंशतमं पदम् (१, १२) ।

‖ 'गौरः यथापिब—तथाच ब्राह्मणे—"गौरमृगो ह स्म भक्ष्या अरण्यादाकाशं पिबति"—इति'—इति वि० ।

Digitized by Google

१ १ १ ५ र १ र १ २ १ १ १ १
२३म्याइ। वा२या२३४ औहोवा। श्रुधीमदा२३४५म्॥(१)
१र र २र१र २ १ २र १ २ र १
माल्वामूराअविष्यवः। मोपह्वस्वोवा। नआदाभा२न्।
१र २ १ १र १र २ १ २ १
मोपह्वस्वानः। आदा२३भान्। मा२३कौ३म्। आ२
३ ५र र २ १२११११ २ १ २र१र १र
ह्वा२३४औहोवा। द्विषवना२३४५ः॥(२) इहत्वागोपरो
र १ २ र १ १र २
णसम्। महेमन्दोवा। तुराधासा२यि। महेमन्दन्तु।
१र २ १ २ १ ३ ५र र
राधा२३सायि। सा२३रा३ः। गौ२रा२३४औहोवा।
२ र १ २ १ १ १ १
यथापिबा२३४५(३)॥ ५ *॥ [१] ७

अथ चतुर्थखण्डे—प्रथमा।

३ १ २ ३ २उ ३ २ ३ १ २ ३ १ २
इदंवसोसुतमन्धःपिबासुपूर्णमुदरम्।
१ २ ३ १ २
अनाभयिन्नरिमाते॥ १ †॥

हे "वसो" वासयितरिन्द्र! "इदं" पुरोवर्त्तमानं "सुतम्" अभिषुतम् "अन्धः" अन्नं सोमलक्षणं "पिब"। यथा—"उदरं"

* ऊ० गा० १प्र० १ख० ५सा०।

† छ० आ० २,१,२,१० (१आ० २०५ पृ०)=ऋ० वे० ५,०,१०,१।

"त्वदीयं" जठरं "सुपूर्णम्" अतिशयेन सम्पूर्णं भवति तथे-त्यर्थः। हे "अनाभयिन्" [आ समन्तात् बिभेति—इत्याभयी; बिभेतेरौणादिक इनिः; न आभयी अनाभयी तादृश!] हे इन्द्र! "ते" तुभ्यं त्वदर्थं "रयिम्" उज्ज्वलवर्णं सोमं दधुः [दाधाने (जुहो०, प०) छान्दसो (३,२,१०५) लिट्॥१॥

अथ द्वितीया।

१ २ ३ २ ३ २उ ३ २ २ २ ३ १ १
नृभिर्धौतः सुतो अश्नैरव्यावारैः परिपूतः।
२ ३ २ ३ २ ३ १ २
अश्वो न निक्तो नदीषु॥२*॥

"नृभिः" अध्वरस्य नेतृभिः ऋत्विग्भिः "धौतः" तृणाद्य-पनयनेन शोधितः [यद्वा; धौतः धूतः आधूतः, अदाभ्यग्रहे†-आधूननेन संस्कृतः, तदनन्तरम् "अश्नैः" अश्मभिर्ग्रावभिः करण-भूतैः "सुतः" अध्वर्युभिष्टुतः ततः "अव्यावारैः" अविमेषः

* ऋ० वे० ५, ७, १७, २।

† ग्रहः=गृहीतसोमं सोमपानपात्रम्। ते च प्रातःसवने उपांश्वादयः, माध्यन्दिने सवने मरुत्वतीयादयः, तृतीयसवने त्वादित्यादयः। किञ्चैतदतिरिक्ताः षोडश्यादि-यागविशेषे नियुक्ताश्च सन्ति ग्रहाः षोडशीत्यादयः। तत्सर्वातिरिक्त एकोऽदाभ्यनामकः; स च खदिरौदुम्बरे पात्रे अंशुमद्गृहीतव्यः सोमपानसंख्या निग्राभ्यास्वप्स्वाप्य चानीय तस्मिंस्त्रिः सोमलताः प्रक्षिप्याग्नये त्वादिभिस्त्रिभि र्मन्त्रैः क्रमेण गृह्यते विहितञ्चैतत् कात्यायनेन "अदाभ्यं गृह्णात्याधिषव निग्राभ्याः पात्रे तस्मिंस्तूष्णीं त्रीनंशूनवधायाग्नये त्वा गायत्रच्छन्दसमिति (श० ब्रा० ८, ४७) प्रतिमन्त्र मुपयामः सर्वत्राविशेषात् (१२, ५, १२-१५)"—इति।

Digitized by Google

तत्सम्बन्धिभिः वालैः "परिपूतः" शोधितः, दशापवित्रस्य नाभि-पूततया अर्णास्तुकया हि सोमः परिपूयते ; तदुक्तम् भगवता आपस्तम्बेन—"शुक्लामूर्णास्तुकां यजमानाय प्रयच्छति तां प्रकटे दशापवित्रस्य नाभिं कुरुते शुक्लस्य लक्ष्माः पवित्र मोतं भवति"—इति *। "नदीषु" नदनाशब्दस्तु † "अश्वोन" अश्व इव "निक्तः" निर्णिक्तः शोधितः ‡ ; यथा अप्सु स्नातो अश्वः अपगतमलः सन् दीप्तो भवति, एवं वसतीवर्याख्याभिरद्भिरभि-षुतः सोमो दीप्तो भवतीत्यर्थः । ईदृशो यः सोमः "तन्तेयवम्"—इत्युत्तरया सम्बन्धः ॥

"धौतः"-"धूतः"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

१ ३ २३ १ २ १ २ ३ १२ ३ १ २
तन्तेयवंयथागोभिःस्वादुमकर्मश्रीणन्तः ।
१ २३ १ २ ३१ २
इन्द्रत्वास्मिन्त्सधमादे ॥ ३ ¶ ॥ ८ §

"तं" पूर्वोक्तगुणं सोमं हे इन्द्र ! "ते" त्वदर्थं "यवं यथा" यवमयं सवनीय-पुरोडाशमिव "गोभिः" गवि भवैः क्षीरादिभिः

---

* अष्टमेतत् समस्तं यजुर्वेदसम्बन्धि-संहितायां सप्तमाध्यायचतुष्टये ।

† 'नदीष—वञ्चिकरबभूताद'—इति वि० ।

‡ 'निक्तः—स्नातः'—इति वि० ।

¶ ऋ० वे० ५, ७, १७, ३ ।　　　§ 'यत गारंगाल'—इति वि० ।

अपत्यद्रव्यैः "श्रीणन्तः" मिश्रीकुर्वन्तः "स्वादु" रसवत्त्वेनास्वादनीयम् "अकर्म्म" अकार्ष्म * [करोतेर्लुङि "मन्त्रे घस (२,४,८०)"—इति च्लेर्लुक्] । यस्मादेवं तस्मात् हे "इन्द्र!" "त्वा" त्वां तादृशं सोमं पातुम् "अस्मिन्" वर्त्तमाने "सधमादे" सहमादने यज्ञे आह्वयामीति शेषः॥ ३॥ ८

१ २ १ २ २ १
॥ गारम्॥ इदंवसोसुतमन्धा३ए। पिबासुपू३र्णा
० १२ १ १ २ २ ० १२ १ १
मुदरौ। हो३वा। पिबासुपूर्णामुदरौ। हो३वा। आ
२ २ १ १२ १ २ ४ ५ २ २
नाभा३यीन्। ररिमाता। औ३होवा॥(१) नृभिर्धौ
२ २ २ २ २ ३ १ ७२ १२ २
तःसुतोअश्ना३यिरे। अव्यावारै३ःपारिपूतौ। हो३वा।
१ २ २ २ ७ २ १२ २ १ १ २ १२
अव्यावारैःपारिपूतौ। हो३वा। अश्वोना३नौ। क्तो
१२ १ १ ४ ५ १ २ २ २ २ २
नदीषू। औ३होवा॥(२) तन्तेवयंयथागोभी३रे। स्वा
१ ७२ १२ २ १२ ७२ १२
दुमका३र्मा श्रीणान्तौ। हो३वा। स्वादुमकर्मा श्रीणान्तौ।

---

२र २ ३ २ २ १ र र ०
आहा३। हौ३हो३। वा। यंतोअर्जुनोअत्केअव्याता

१ १ २ ५र र २ १
२। प्रिया२३:। ह२ना२३४औहोवा। ए३। नमा२

१ ३ १ १ १ १ ५ २ ४ ५ ४ ५ १ २र
ञ्जिया२३४५: ॥(२) प्रियःहः नुर्न्नमर्जिया: । प्रायःहनु: ।

१ २ ३ २ ३ २ २ १
नमाञ्जा१या२:। तमा३यिम्। हौ३हो३वा। हिन्व

र २ १ १ ३ ५र
न्त्यपसोयया१रा१था२म्। नदा२३यि। षू२वा२३४औ

र २ १ ३ १ १ १ १
होवा। ए३। गभा२स्तियो२३४५:(३) ॥ १२ * ॥ [८]

५ र २ ४र५ ४ ५ १
॥ पौरुहन्मनम् ॥ प्रसोमा३देववीतयायि। सायि

२ र १ २ १ १ र २
न्धुर्नपि। प्येआर्णा१सा२। णासा२। आ२ऽशोःपय।

१३ २ १ २ १ २ ३ ५ १
सा। मदिरो३। मदिरो३। नाजागृ२३४वी। आ

* ऊ० गा० १८प्र० १खा० १२ष०।

१ २ १ २ १ ५ ४
च्छाकोशाम्। माधुश्चू२३४ताम्। मधू५श्चुताम्॥(१)

५ २ २ ४ ५४ ५ १ २ १२ १ १
अच्छाको३शम्मधुश्चुताम्। आच्छाकोशम्। मधूश्चू

१ १ १ १२ २
१ता२म्। श्चूता२म्। आवर्य्यतः। आ। जुनो

२ १ २ १ १ २ १ ५ १ २२ १
आ३। जुनोआ३। त्वेअव्या२३४ता। प्रायःसूनूः।

१ १ २ ५ ४ ५ २ ४ ५
नमाउर्जा२३४याः। नमा५उर्जयाः॥(२) प्रियःसू३नुर्न

४ ५ १ १२ १ १ १
मजिंयाः। प्रायःसूनुः। नमाउर्जा१या२ः। जाया२ः।

१ २ २ १२ २ १ २ १ १
तामी१हिन्व। तायि। अपसो३। अपसो३। याथा

२ ५ १ १२ १ २ १ ५ ४
रा२३४थाम्। नादीषुवा। गाभस्ता२३४योः। गभा

४
५स्तियोः। औ५ई। डा(३)॥ १३ *॥ [९]

१ २ २ २ १
॥ वारायणम्॥ प्रसोमदेवा२यिववीतयायि। सा

२ २ १ २ १२
यिन्धुर्न्नपिप्येअर्णसा। शोःपा३या। सामदिरो। न

* ऊ० गा० १८प्र० १अ० १२सा०।

Digitized by Google

जा३ष्वा। गृवी२ः। अच्छाकोशम्मधोवा३ओ२३४वा।

श्चूतोइहायि ॥(१) अच्छाकोशौहो२यिमधुश्चुताम्। आ

च्छाकोशम्मधश्चुतम्। आहार्याहितो। अज्जनोआ।

त्केआ३ष्वा। व्याता२। प्रियःसूनुर्नमोवा३ओ२३४वा।

जा५योइहायि ॥(२) प्रियःसूनौहो२यिनमज्जियाः। प्रा

यःसूनुर्नमज्जियः। तमायिंहा३यिन्वा। तियपसो।

यथा३हायि। राया२म्। नदीषुवागमोवा३ओ२३४वा।

स्ता५योइहायि(३) ॥ १४ * ॥ [१०]

॥ हिहिङ्कारंवामदेव्यम् ॥ प्रसोमा२३देववीतयायि।

सायिन्धुर्नपिप्ये अर्णसांओः पयसामदिरोऽनजीहो ३।

ऊम्मा२। गृ२३वीः। अच्छाकोशाम्मधौहो३। ऊम्मा

* ऊ० गा० १८प्र० १ख० १४गा०।

१ ४ ५ २ १र ४
२। स्वुताम्। औ२३होवा ॥(१) अच्छाको ३ २ ३ अ
५ १ र र र र र
म्मधुस्वुताम्। आच्छाकोअम्मधुस्वुतमाद्वर्य्यंतोअजुर्नो
५ २ २र २ १ १ २ १ र१ २र
आत्कऔहो३। ऊम्मा२। व्या२३ता। प्रियस्वनुर्न्नमौ
२ १ १ २ ४ ५ २१
हो३। ऊम्मा२। जिया। औ३होवा ॥(२) प्रियःस्व२
४ ५ १ र र
३नुर्नमर्ज्जियाः। प्रायःस्वनुर्न्नमर्जियस्तमीॱहिन्वन्त्यपसो
२ ३र २ १ १ २ १र २ ३र
ऽयथौहो३। ऊम्मा२। रा२३थाम्। नदीषुवाऽगभौ
२ १ १ ४ ५ ४
हो ३। ऊम्मा२। स्तियोः। औ २ ३ होवा। हो५
ई। डा(३)॥ १७ ॥ [११]

२र र १ ३र १र २ १ २ १
॥ कण्वरथंतरं ॥ प्रासोमदेववीतयायि। सिन्धुर्न्न
२ १ २ २ र र र र
पायि। ष्ये३भार्णा३सा। अॱशोःपयसामदिरोनजागृ
२ ३र २ १र ५ २
वा२३४ऐहि। अच्छाको२३४आम्। मधा३१उवा२३।
२ २ ३ २ २र र १र २ १ २ १ २ १र
ए३। स्वतमा ॥(१) आच्छाकोअम्मधुस्वुताम्। अच्छा

* ज० आ० १८प्र० २ख० १७गा०।

कोशाम्। माइधुश्चूइताम्। आहर्य्यतोअर्जुनोअत्के
अव्यता२३४ऐही। आइहार्य्योइतो। अर्जुनोअत्केअ
व्यता२३४ऐही। प्रियःसू२३४नूः। ममा३१उवा२३। ए३।
जियश्चा॥(२) प्रायःसूनुर्न्नमर्जियाः। प्रियःसूनूः। ना
इमार्ज्जीइयाः। तमीᳪहिन्वन्त्यपसोयथा२३४मैही। ना
इमायिᳪहाइयिन्वा। तियपसोयथारथा२३४मैही। नदी
षू२३४वा। गभा३१उवा२३। ए३। स्तियोवा॥६*॥[१२]२०

अथ तृतीयतृचे, † प्रथमा।

प्रसोमासोमदच्युतःश्रवसेनोमघोनाम्।
सुताविदथेअक्रमुः॥ १ ‡॥

---

* ऊ० गा० २२प्र० २ख० ६सा०।

† 'उक्थोमाध्यन्दिनः पवमानः, उक्थानि गायत्राणि ०००। आर्भवः पवमानो यज्ञ्यः तस्य ज्योतिष्टोमवत् छन्दांसि साम्नाञ्च नामधेयैरिवोपाते'—इति वि०।

‡ छ० आ० ५, २, १ (१भा० २०पृ०)=ऋ० वे० ९, ८, २२, १।

Digitized by Google

"सोमासः" सोमाः "मदच्युतः" मदस्राविणः "सुताः" अभिषुताः सन्तः "विदथे" यज्ञे "मघोनां" हविष्मतां "नः" अस्माकं "अवसे" अन्नाय कीर्त्तये वा "प्र अक्रमुः" प्र गच्छन्ति ॥

"मघोनां"-"मघोनः"—इति पाठौ ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २र ३ १ २ ३ २
आदीँ हँसोयथागणंविश्वस्यावीवशन्मतिम् ।
१ २ १ २र
अत्योनगोभिरज्यते ॥ २ * ॥

"आत्" अपिच "ईम्" अयं सोमः "हंसो† यथा" "गणं" जनसङ्घं स्वगतिविशेषेण स्वनेन वा प्रविशति, तद्वत् "विश्वस्य" सर्वस्य स्तोतृजनस्य "मतिं" स्तुतिं बुद्धिं वा "अवीवशत्" वशं नयति; स च सोमः "अत्यो न" अश्व इव "गोभिः" गव्यैरुदकै र्वा "अज्यते" सिच्यते स्निग्धीक्रियते ॥ २ ॥

अथ तृतीया ।

१ २ ३ १ ३ १ १ ३ १ २ ३ १ २
आदीन्त्रितस्ययोषणोहरिँहिन्वन्त्यद्रिभिः ।
३ २ १ २ ३ १ २
इन्दुमिन्द्रायपीतये ॥ ३ ‡ ॥ २१

* ऋ० वे० ६, ८, २२, २ ।

† 'हंसः—आदित्यः'—इति वि० ।

‡ ऋ० वे० ६, ८, २२, ३ । अत्रैव च पुनः ५, १, ४, २ । परं तत्र तु "त्रितस्य मन्या"—इति पाठः ।

Digitized by Google

"आत्" अपिच "ईम्" एनं "हरिं" हरितवर्णम् "इन्दुम्" सोमं "त्रितस्य" ऋषेः "योषणः"* अङ्गुलयः "अद्रिभिः" ग्रावभिः "हिन्वन्ति"। किमर्थम्? इन्द्राय इन्द्रस्य "पीतये" पानार्थम्॥ ३ ॥ २१

१ र २र र १ २
॥ सᳫंहितम्॥ प्रसोमासोम। दा२च्युताः। अ
१ २ १ २
वा२। सा २ ३ यिनो। मा२घोनाम्। सू२ ३ ताः।
१ ७र २
वा२यिदा। थेषा २ ३। हाउवा ३। क्रा २ ३ ४
५
मूः (१) ॥ १४† ॥ [१]

१ र २र १र २ २
॥ आष्ठुभार्गवम्॥ प्रसोमासोम। दच्यूश्ताः।
१ र२ १ २ ५ १ २
आवसेनो३। मा२घो२३४नाम्। सुतावा१यि। दा२।
३र २ १ ५ ५
थेषा३। क्रा२३४मोदाायि(१) ॥ २० ‡ ॥ [२] २१

---

* 'योषणः—युमिश्रणे, मिश्रणकर्तारः ऋत्विजः,—इति वि०।

† ऊ० गा० १प्र० १ख० १४गा०।

‡ ऊ० गा० ११प्र० १ख० १०गा०।

अथैकर्चं चतुर्थसूक्ते*—प्रथमा।

२ १ २ ३ १र २र १ २ ३ १ १
अयापवस्वदेवयूरेभन्पवित्रंपर्येषिविश्वतः।

२ ३ १ २
मधोर्धाराअसृक्षत ॥ १ ॥ †

हे सोम! "देवयुः" देवान् कामयमानः त्वम् "अया" अनया धारया "पवस्व" क्षर। ततः "रेभन्" शब्दायमानः "पवित्रं" "विश्वतः" "पर्येषि" परिगच्छसि। अनन्तरं "मधोः" मदकरस्य तव "धाराः" आत्मीयाः "असृक्षत" सृज्यन्ते ॥

अत्र द्वितीय-तृतीय-पादौ व्यत्ययेन ‡ पाठौ ॥ १ ॥

अथैकर्चं पञ्चमे—प्रथमा ¶।

१ २ ३ १उ ३ १ ३ १ २ ३ १ २
पवतेहर्यतोहरिरतिह्वराꣳसिरꣳह्या।

२क २र ३ १ २ ३ १ ३ १ २
अभ्यर्षस्तोतृभ्योवीरवद्यशः ॥ २ ॥ §

---

* मूले, गानग्रन्थे, पदकारमते, विवरणमते चेदमपि सूक्तं तुर्यं; तथाचेदमेव सूक्तमस्य प्रपाठकस्यान्त्यमिति।

† ऋ० वे० ७, ५, ११, ४।

‡ तथाच—"अयापवस्वदेवयुर्मधोर्धाराअसृक्षत। रेभन्पवित्रंपर्येषिविश्वतः"—इति ऋ० पाठः।

¶ मूलादिमते त्रियमक द्वाविंशति-सूक्तस्य द्वितीयेति।

§ छ० आ० ६, २, ३, ११ (२ भा० २२० पृ०) = ऋ० वे० ७, ५, ११, ३।

Digitized by Google

"इर्य्यत:" स्पृहणीय: "हरि:" हरितवर्ण: सोम: "रंह्या" तृतीयाया आकार: साधुवेगेन "ह्वरांसि" कुटिलानि अनृजूनि पवित्राणि "अति पवते" अतीत्य गच्छति। किं कुर्व्वन्? स्तोतृभ्य: "वीरवत्" पुत्रयुक्तं "यश:" "अभ्यर्षन्" अभिगमयन् पवते ॥ २ ॥

अथैकर्चं षष्ठं प्रथमा *।

१ २ ३ १२ २र ३ २ ३ १ २ ३ १र २र
प्रसुन्वानायान्धसोमर्त्तोनवष्टतद्वच:।
३ १ २ ३ १ २ ३ २ ३ १र १र
अपश्वानमराधसꣳहतामखन्नभृगव: ॥ ३ † ॥ २२

॥ इति प्रथम: प्रपाठक: ॥

"सुन्वानाय" [षष्ठ्यर्थे चतुर्थी (२,३,६२वा०)] सुन्वानस्य अभिषूयमाणस्य "अन्धस:" अदनीयस्य सोमस्य "तत्" प्रसिद्धं "वच:" वचनं घोषं "मर्त्त:" मारक: कर्मविघ्नकारी "न प्र वष्ट" न भजतां न शृणोत्विति यावत्। तथा हे स्तोतार:! "अराधसं" साधककर्म-रहितं "श्वानम्" "अपहत"। तत्र दृष्टान्त:—"मखं न" यथा पुरा अपराद्धं मखम् एतन्नामानं "भृगव:" अपहतवन्त: तथा अपहतेत्यर्थ: ॥

"प्रसुन्वानाय"-"सुन्वानस्य","वष्ट"-"हत"—इति पाठौ ॥१॥२२

* मूलादिमये निधनवत् द्वाविंशति-स्तवस्य तृतीयेति।

† छ० आ० ६, २, १, ८ (२भा० १६८ पृ०)=ऋ० वे० ७, ५, ७, १= अर्चीनाराणां पुन: ६, २, ३, १।

Digitized by Google

५ १र २ ३ ४ र ४
॥ आष्कारम् ॥ पव। तेद्दा३४। औद्दोपुर्य्यतोहरा
१ र २१ २ ३२ र
यिः। अतिह्वराᳩसिरᳩ। द्दा२३या३४। अर्षा। स्तो
१र २ ४५ २ ११११
तृभ्योवायि। रा३वद्य। ष्मा२३४५ः(३) ॥ १६ * ॥ [१]

५ १र २ ४ ५ १
॥ गौरोवितम् ॥ प्रस्तु। न्वाना ३। यषन्धसाः। म
र १ र २ ४
र्त्तोनवष्टतद्वचा२३ः। अःपस्वाना३१२३म्। अरा५धसा
१ र २ ४ ५ ४ ५
म्। हातामखा३१२३म्। नभोवा। गा५वोइद्दायि ॥
(३)॥ १७ † ॥ [२]

२ र र १ २ १
॥ सुष्मानम् ॥ पवतेद्दा। र्य्यतोहरायिः। अजिह्वा
१ २ १ र
रा२। सिरᳩद्दिया। अभियार्षा२। स्तोतृ। भ्यो
२ ५र र १ २ १ ११११
२र्वा२३४औद्दोवा। रवद्यमय३उपा२३४५(२) ॥१५ ‡॥[३]

२ र १र २
॥ काश्रीजम् ॥ पवतेद्दा। र्य्यतोद्दा२३रा३४यिः।

* ऊ० गा० १६प्र० २ख० १६सा०।

† ऊ० गा० १प्र० २ख० १७सा०।

‡ ऊ० गा० ६प्र० २ख० १५सा०।

२ र १ १ र र
अजिक्षरा। सिर७्हार२३या३४। अभियर्षा। स्तोतृभ्यो

र १ ३ ५र र ३
वीरवत्। या२। श्रा२३४। औहोवा। ऊ२३४

५
पा(२)॥ १६ *॥ [४]

२ १ २ ४ ५ १ २ ५
॥ पौष्कलम्॥ पवते३हर्य्य। तोहा२३४रायिः।

२ १ २ १ २ ३ ५ २ १ ७र
अतिक्षरा। सायिर७्हा२३४या। अभाअर्षा। स्तोतृ

३ २ १ ३ १ १ १ १
२भ्यो२३४५वा६५६यि। रवद्यश्रा२३४५ः॥ २ †॥ [५]२२

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य द्वितीयस्याध्यायस्य
षष्ठः खण्डः‡॥ ६॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरोदेयाद् विद्यातीर्थ-महेश्वरः॥ १॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे द्वितीयोऽध्यायः¶॥

---

* ऊ० गा० ६प्र० २ख० १६सा०।

† ऊ० गा० ६प्र० २ख० २सा०।

‡ 'विहत्स्तोमिकं प्रथममहः समाप्तम्'—इति वि०।

¶ 'समाप्तश्च प्रथमः प्रपाठकः'—इति वि० मूलादिसर्वसम्मतश्चैतदिति भम्।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे, तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १ ॥

॥ अथ तृतीयोऽध्यायः आरभ्यते * ॥

तत्र,

पवस्ववाच इति पञ्चतृचात्मके प्रथमखण्डे—

प्रथमतृचे—प्रथमा ।

१ २ २ १ १ २ १ २ २ १ २ १ १ २ २ १ १
पवस्ववाचोअग्रियःसोमचित्राभिरूतिभिः ।
२ १ १ २ २ १ २
अभिविश्वानिकाव्या ॥ १ ॥ †

हे "सोम !" "अग्रियः" मुख्यः‡ त्वं "चित्राभिः" पूजनीयैः¶ "ऊतिभिः" रक्षणीयैः सह "वाचः" अस्मदीयाः स्तुतीः

---

* 'इदानीं द्वितीयमक्षरारभ्यते द्वितीयश्च प्रपाठकः। पञ्चदशसौमिकं द्वितीयमहः'—इति वि० ।

† ऋ० वे० ७, १, २८, ५ ।

‡ 'अग्रियः प्रधानभूताः'—इति वि० । अग्रिय शब्दमेवं व्याचष्टे भगवान् यास्कः—"अग्रमग्रं नयतीति वाग्रगरणं भवतीति वाग्रसम्पादिन इति वा। अपिवाप्रमित्येतदनर्थकमुपबन्धमाददीत"—इति ६, १५।

¶ 'चित्राभिः विचित्राभिः नानाप्रकारैः'—इति वि० ।

Digitized by Google

प्रति "पवस्व"। [उत्तरार्द्धं उक्तमेवार्थं विशदयति—] "विश्वानि" सर्वाणि "काव्या" काव्यानि स्तुत्यात्मकानि वाक्यानि "अभि" पवस्वेति ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ १र २र ३ १ २
त्वंसमुद्रिया अपोग्रियोवाचईरयन्।
१ २
पवस्वविश्वचर्षणे ॥ २ ॥ *

हे "विश्वचर्षणे" सर्वस्य द्रष्टः सोम! "अग्रियः" मुख्यः त्वं "वाचः" † "ईरयन्" प्रेरयन् "समुद्रियाः" आन्तरिक्षाणि‡ "अपः" उदकानि¶ "पवस्व" धारया क्षर॥

"विश्वचर्षणे"-"विश्वमेजय"—इति छन्दोग-बहृचानां पाठो ॥ २ ॥

अथ तृतीया।

१ ३१र २र ३ १ २
तुभ्येमाभुवनाकवेमहिम्नेसोमतस्थिरे।
१ २ ३ १ २
तुभ्यन्धावन्तिधेनवः ॥ ३ § ॥ १

* ऋ० वे० ७, १, २९, १।

† 'अग्रियो वाचः—प्रधानभूताः अभ्यनुःसामलक्षणाः'—इति वि०।

‡ "समुद्रः"—इत्यन्तरिक्षनामसु निघण्टौ पञ्चदशं पदम् (१, ३)।

¶ 'समुद्रिया अपः—समुद्रे भवाः आपः समुद्रियाः। द्रोणकलशः समुद्रः'—इति वि०।

§ ऋ० वे० ७, १, २९, २।

Digitized by Google

हे "कवे" क्रान्तकर्म्मन् सोम! "तुभ्यं" तव "महिम्ने" "इमा" इमानि "भुवना" भुवनानि "तस्थिरे" तिष्ठन्ति त्वामेव पुरस्कुर्वन्तीत्यर्थः। किञ्च "धेनवः" नवप्रसूतिकाः देवानां हविःप्रदानेन प्रीणयित्र्यो गावः * "तुभ्यं" त्वदर्थमेव 'आशिरं प्रयच्छ मे'—इति "धावन्ति" आगच्छन्ति॥

"धावन्तिधेनवः"—इति छन्दोगाः, "अर्षन्तिधेनवः"—इति बह्वृचाः॥ ३॥ १

अथ द्वितीयतृचे—प्रथमा।

१२ ३१२ ३२३१ २३२ ३१२
पवस्वेन्दोवृषासुतःकृधीनोयशसोजने।
१ २ १२१२
विश्वाअपद्विषोजहि॥ १॥ †

हे "इन्दो" सोम! "सुतः अभिषुतः "वृषा" कामानां वर्षिता "पवस्व" धारया क्षर "जने" जनपदे "नः" अस्मान् "यशसः" यशस्विनः "कृधि" कुरु; "विश्वा" विश्वान् सर्वान् "द्विषः" द्वेष्टॄन् शत्रून् "अपजहि" मारय च॥ १॥

---

* 'धेनवः—गावः। अथवा धेनव आदित्यरश्मयः'—इति वि०।

† ऋ० आ० ५, १, ५, ३ (१भा० ३२३८०) = ऋ० वे० ७, १, १३, १।

अथ द्वितीया ।

१ २ ३ १ ३ १ १ २ ३ १ २ ३ २
यस्यतेसख्येवयꣳसासह्यामपृतन्यतः ।
१ २ ३ १ २ ३ २
तवेन्दोद्युम्नउत्तमे ॥ २ ॥ *

हे "इन्दो" सोम ! "यस्य" † अस्मिन् यागे वर्त्तमानस्य "ते" तव "सख्ये" सखित्वे सति वयं स्तोतारः "तव" त्वदीये "उत्तमे" श्रेष्ठे "द्युम्ने" अन्ने तृप्तिं प्राप्ताः [तथाच यास्कः— "द्युम्नं द्योततेर्यशो वान्नं वा (निरु० नै० ५, ५)"—इति] "पृतन्यतः" युद्धमितः शत्रून् ‡ "सासह्याम" अभिभवेम ¶ ॥

द्वितीय-तृतीयपादौ व्यत्ययेन पाठौ ॥ २ ॥

अथ तृतीया ।

१ २ ३ १२ ३२ ३ १ ३ २ ३ १ २
यातेभीमान्यायुधातिग्मानिसन्तिधूर्वणे ।
१ २ ३ २
रक्षासमस्यनोनिदः ॥ ३ § ॥ २

* ऋ० वे० ७, १, १२, ४ ।

† मूलपाठस्तु "यस्य"—इति ; विवरणकृतापि तथैव व्याख्यातम्, पदपाठ-मानग्रन्थादावपि तथैव श्रूयते ।

‡ 'पृतन्यतः—पृतनाः सेनाः, ताभिर्ये यान्त्यर्थ ते स्थिताः वीरपुरुषाः'—इति वि० । "पृतनाः"—इति सङ्ग्रामनामसु निघण्टौ षष्टादशं पदम् (२, १७ ।

¶ 'सासह्याम—सहेम'—इति वि० ।

§ ऋ० वे० ७, १, २२, ५, ।

हे "सोम!" "ते" तव "या" यानि "भीमानि" शत्रूणां भयङ्कराणि "तिग्मानि" तीक्ष्णानि "आयुधा" आयुधानि * "धुर्वणे" शत्रुवधार्थं सन्ति तैः "आयुधैः" "समस्य" सर्वस्य शत्रोः "निदः" निन्दायतः† "नः" अस्मान् "रक्ष" पालय ॥३॥ २

अथ तृतीयतृचे—प्रथमा ।

१ २　२ १　२ ३ १ २　३ १ २
वृषासोमद्युमाᳫँअसिवृषादेववृषव्रतः ।

२ ३ १ १
वृषाधर्म्माणिदध्रिषे ॥ १ ॥‡

हे "सोम!" "वृषा" कामानां वर्षिता त्वं "द्युमान्" दीप्तिमान् "असि" । अपिच हे "देव" द्योतमान सोम! "वृषा" त्वं "वृषव्रतः" वर्षणशीलकर्मासि । किञ्च हे सोम! "वृषा" त्वं "धर्माणि" देवानां मनुष्याणाञ्च हितानि कर्माणि "दध्रिषे" धारयसि ॥

"दध्रिषे"-"दधिषे"—इति पाठौ ॥ १ ॥

---

* 'शत्रुहिंसासतोमरादीनि'—इति वि० ।

† 'निदः--नितरां दृणाति निदः, तस्य सम्बोधनं निदः'—इति वि० ।

‡ छ० आ० छ० ६, १, २, ८ (२भा० ६३ ४०) = ऋ० वे० ७, १, ३८, १ ।

Digitized by Google

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ १ २ १ ३ १ २ ३ १ २
वृष्णस्तेवृष्ण्य॒ᳪशवोवृषावनंवृषासुतः।
१२ ३१२ ३ १२ ३१२
सत्वंवृषन्वृषेदसि॥ २ ॥*

हे "वृषन्" कामानां वर्षक सोम! "वृष्णः" वर्षितुः † "ते" तव "शवः" बलं ‡ "वृष्ण्यं" वर्षणशीलं भवति "वनं" तव भजनमपि, "वृषा" वर्षणशीलं "सुतः" अभिषुतः तव रसोऽपि "वृषा" वर्षणशीलः "स त्वं" "वृषेदसि" वर्षणशील एवासि भवसि॥

"सुतोमदः"—इति, "सत्वंसत्यम्"—इति च पाठौ॥ २॥

अथ तृतीया।

२ ३ १ २ ३ २ ३ १२ ३१२ ३ १२ ३१२
अश्वोनचक्रदोवृषासङ्गाइन्दोसमर्वतः।
१ २ ३ १२ ३१२
विनोरायेदुरोवृधि॥ ३ ¶॥३

हे "इन्दो" सोम! "वृषा" त्वं "अश्वोन" अश्वइव "सञ्चक्रदः" सङ्क्रन्दसे। अपिच "गाः" पशून् "अर्वतः" अश्वांश्च अस्मभ्यं

---

* ऋ० वे० ७, १, २९, २।

† 'वृष्णः—वृषु सेचने (भ्वा० पर०) सेचन-समर्थस्य ते'—इति वि०।

‡ "शवः"—इति बलनामसु निघण्टौ तृतीयं पदम् (२, ९)।

¶ ऋ० वे० ७, १, २९, ३।

Digitized by Google

सम्प्रयच्छसीति शेषः। किञ्च "नः" अस्माकं * "राये" धनाय "दुरः" द्वाराणि "विदुधि" विवृतानि कुरु ॥ ३ ॥ ३

अथ चतुर्थतृचे—प्रथमा ।

१ २ १ २ ३ १ १ २ ३ १ २
वृषाह्यसिभानुनाद्युमन्तन्त्वाहवामहे ।

१ २ ३ १ २
पवमानस्वर्दृशम् ॥ १ ॥ †

हे सोम! त्वं "वृषासि हि" अभिमत-फलानां वर्षिता भवसि खलु। तस्मात् हे "पवमान" पूयमान वा सोम! "स्वर्दृशं" सर्वस्य [सूर्यस्य वा] द्रष्टारं [सर्वैर्देवैर्द्रष्टव्यं वा] "भानुना" तेजसा "द्युमन्तं" दीप्तिमन्तम् अतिशयेन तेजस्विनमित्यर्थः [स्तुतिमन्तं वा], "त्वा" त्वां वयं "हवामहे" यज्ञेषु आह्वयामहे ॥ १ ॥

अथ द्वितीया ।

२ ३ १ २ २ १ २ ३ १ २ ३ १ २
यदद्भिःपरिषिच्यसेमर्मृज्यमानआयुभिः ।

१ २ ३ १ ३ १ २
द्रोणेसधस्थमश्नुषे ॥ २ ॥ ‡

* 'नः-अस्मभ्यम्'—इति वि० ।

† ऋ० आ० ५, २, ५, ४ (२भा० ३२पृ०) = ऋ० वे० ७, २, १, ४ ।

‡ ऋ० वे० ७, २, २, १ ।

Digitized by Google

हे सोम! त्वम् "आयुभिः" मनुष्यैः * ऋत्विग्भिः "मृज्य-मानः" अतिशयेन शोध्यमानः सन् "अद्भिः" वसतीवर्याख्याभिः "यद्" यदा "परि सिच्यसे" परितः सिच्यमानो भवसि, तदानीं "द्रोणे" द्रोणकलशेन गृह्यमाणः सन् "सधस्थं" सह तिष्ठन्त्यत्रेति सधस्थं स्थानं ग्रहचमसादिकम् "अश्नुषे" व्याप्नोषि॥

"मृज्यमानआयुभिः"-"मृज्यमानोगभस्त्योः"—इति, "द्रोणे"-"द्रुणा"—इति च पाठौ॥ २॥

अथ तृतीया।

१ २ ३ २ ३ १ २
आपवस्वसुवीर्य्यम्मन्दमानःस्वायुधः।
३ १ २ ३ १ २
इहोष्विन्दवागहि॥ ३ †॥४

हे "स्वायुध"! यत्र 'स्फ्य-कपालादीनि दशायुधानि-इत्यभि-धीयन्ते, शोभनानि तानि यस्य स तथोक्तः। यद्वा धनुरादीन्या-युधानि यस्य सः, तादृश हे सोम! त्वं "मन्दमानः" मोदमानः सन् [अन्तर्णीतण्यर्थः] देवान् स्वयं मादयन् ‡ "सुवीर्यं" शोभनवीर्योपेतं पुत्रादिकमस्माकम् "आ पवस्व" पवतिर्गत्यर्थः, आ प्रापय। किञ्च हे इन्दो! ग्रहेषु चमसेषु रक्षणशील सोम!

* "आयवः"—इति निघण्टौ मनुष्यनामसु सप्तदशं पदम् (२ ३)।

† ऋ० वे० ७, १, १, ५।

‡ 'मन्दमानः—शोध्यमानः तप्यमानोवा'—इति वि०।

"इह उ" इहैव * अस्मदीये यज्ञे "सु आगहि" सुष्ठु † आगच्छ ॥ ३ ॥ ‡

अथ पञ्चमतृचे—प्रथमा ।

१ २　　२ २ ३ १ २　　३ २
पवमानस्यतेवयम्पवित्रमभ्युन्दतः ।
२　१　२र
सखित्वमावृणीमहे ॥ १ ॥ ‡

हे सोम ! "पवित्रम् अभ्युन्दतः" पवित्रमभिद्यतः ¶ "पवमानस्य" क्षरतस्य "ते" तव "सखित्वं" सख्यं वयम् अस्मदीयवः आङ्गिरसाः स्तोतारः "आ वृणीमहे" प्रार्थयामहे ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १　२　३ १ २ ३ १　२
येतेपवित्रमूर्मयोभिक्षरन्तिधारया ।
१ २
तेभिर्नःसोममृडय ॥ २ ॥ §

हे सोम ! "ते" तव "ये" ऊर्मयः तरङ्गाः ‖ "पवित्र"

---

*,† 'उ, सु—इति द्वावपि पदपूरणौ,—इति वि० ।

‡ ऋ० वे० ७, १, १८, ४ ।

¶ 'अभ्युन्दतः—आर्द्रं कुर्वन्—इति वि० ।

§ ऋ० वे० ७, १, १८, ५ ।

‖ 'ऊर्मयः—त्वदीयाः, सोमतरङ्गाः—इति वि० ।

Digitized by Google

"धारया" "अभि चरन्ति" तेभिः तैः ऊर्मिभिः "नः" अस्मान् "मृड़य" सुखय ॥ २ ॥

अथ तृतीया।

१ २   ३ १२   ३२ ३ २ ३ १ ३ ३ १ २

सनःपुनानआभररयिंवीरवतीमिषम्।

१ २   ३ १ २

ईशानःसोमविश्वतः ॥ ३ * ॥ ५

हे सोम! "विश्वतः" सर्वस्य जगतः "ईशानः" ईश्वरः "सः" अभिषुतः "पुनानः" पूयमानः त्वं "नः" अस्मभ्यं "रयिं" धनं "वीरवतीं" पुत्राद्युपेतम् "इषम्" † तम् "आभर" आहर ॥ ३ ॥ ५

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य तृतीयस्याध्यायस्य प्रथमः खण्डः ‡ ॥ १ ॥

——000——

* ऋ० वे० ७, १, १९, १।

† 'इषं—इष्टिमन्नं वा—इति वि०।

‡ 'उक्तं वक्ष्यमाणम्'—इति वि०।

अथ द्वितीयखण्डे *—

प्रथमतृचे—प्रथमा।

३ २ ३१ २ ३ २ ३१२
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्।
२ ३२३१२ ३१२
अस्य यज्ञस्य सुक्रतुम्॥ १॥ †

[अग्नेर्दूतत्वमेतन्मन्त्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नायते—'अग्निर्देवानां दूत आसीदुशनाकाव्योऽसुराणाम्'—इति] तादृशं देवं "दूतम्" अग्निम् अस्मिन् कर्म्मणि वृणीमहे भजामः। कीदृशं "होतारं" देवानामाह्वातारं "विश्ववेदसं" सर्वधनोपेतं [बहुव्रीहौ विश्वं संज्ञायाम् (६, २, १०६)"—इति पूर्वपदान्तोदात्तत्वम्] "अस्य" प्रवर्त्तमानस्य यज्ञस्य निदानत्वेन "सुक्रतु" शोभन-कर्म्माणं शोभन-प्रज्ञं वा॥ १॥

अथ द्वितीया।

३ १ २ ३ १ २ ३ १ २ ३ १ २
अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम्।
३ १ २ ३ २
हव्यवाहं पुरुप्रियम्॥ २॥ ‡

---

* 'इदानीमाख्यामि'—इति वि०।

† छ० आ० १, १, १, २ (१भा० ८७ पृ०) = ऋ० वे० १, १, १२, १।

‡ ऋ० वे० १, १, १२, २।

[यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदाद्वा बहुविधत्वमभिप्रेत्य] "अग्निम्-अग्निम्"—इति वीप्सा तं "हवीमभिः" आह्वानकरणैर्मन्त्रैः "सदा हवन्त" निरन्तरमनुष्ठातार आह्वयन्ति *। कीदृशम्? "विश्पतिं" विशां प्रजानां होत्रादीनां पालकं "हव्यवाहं" यजमान-समर्पितस्य हविषः देवान् प्रति वोढारम् अतएव "पुरुप्रियं" बहूनां देवानां प्रीत्यास्पदम्॥ [अग्निमग्निम्—"नित्यवीप्सयोः (८, १, ४)"—इति वीप्सायां द्विर्भावः; "तस्य परमाम्रेडितम् (८, १, २)"—इत्युत्तरस्य आम्रेडित-सञ्ज्ञायाम् "अनुदात्तञ्च (८, १, ३)"—इत्यनुदात्तत्वम्। हवीमभिः—'ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०, उभ०); आह्वानकरणभूतेषु मन्त्रेषु स्वव्यापार-स्वातन्त्र्यात् कर्त्तृत्वविवक्षया "अन्येभ्योऽपि दृश्यन्ते (३, २, ७५)"—इति कर्त्तरि मनिन्; तस्य छान्दस ईडागमः; बहुलं छन्दसि (६, १, ३४)"—इति धातोः सम्प्रसारणम्; पर-पूर्वत्वं; गुणावादेशौ; नित्त्वादाद्युदात्तत्वं (६, १, १९७)। सदा—"सर्वैकान्येत्यादिना (५, ३, १५)" सर्वशब्दाद्दाप्रत्ययः "सर्वस्य सोऽन्यतरस्याम् (५, ३, ६)"—इति सभावः; व्यत्ययेनाद्युदात्तत्वम् (३, १, ८५)। हवन्त—ह्वेञो लट् झस्य अन्तादेशः (७,१,३); टेरेभावश्छान्दसः (६, ४, ७६) अपि "बहुलं छन्दसि (६, १, ३४)"—इति सम्प्रसारणम्; "तिङ-

---

* 'हवीमभिः—होतव्यैः सदा हवन्तः आह्वयन्तः; यानि होतव्यानि हवींषि, तैः पुरतोऽवस्थितैः सदाह्वयन्ते इति वि०।

Digitized by Google

तिङः (८, १, २८)"—इति निघातः। विश्पतिं—"पत्यावैश्वर्य्ये (६, २, १८)"—इति पूर्वपदप्रकृतिस्वरे प्राप्ते, "परादिश्छन्दसि (६, २, १९९)"—इत्युत्तरपदाद्युदात्तत्वम्। हव्यवाहम्—'वह प्रापणे (भ्वा०, उभ०), "वहश्च (३, २, ६४)"—इति ण्वि प्रत्ययः; कृदुत्तरप्रकृतिस्वरत्वम् (६, २, १३९)। पुरूणां प्रियं—समासान्तोदात्तत्वम् (८, १, २२३) ॥ २ ॥

अथ तृतीया।

१ २ ३ २ ३ १ २ ३ ३ २ १ २

अग्नेदेवाꣳइहावहजज्ञानोवृक्तबर्हिषे ।

२ ३ १ २ ३ १ २

असिहोतानईड्यः ॥ ३ * ॥ ६ †

हे "अग्ने !" "जज्ञानः"‡ अरण्योरुत्पन्नः त्वं "वृक्तबर्हिषे" आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय। तं 'यजमान मनुग्रहीतुम् "इह" कर्मणि हविर्भुजो देवानावह—"नः" अस्मदर्थं "होता" देवानामाह्वाता त्वम् "ईड्योसि" स्तुत्यो भवसि ॥ ३ ॥ ६

द्वितीयतृचे¶—प्रथमा।

१ २ ३ १ २ ३ १ १ २ १ २

मित्रंवयꣳहवामहेवरुणꣳसोमपीतये ।

२ ३ १ ३ १ २

याजातापूतदक्षसा ॥ १ ॥ §

---

* ऋ० वे० १, १, २२, ३। † "आग्नेय माज्यमुक्तम्"—इति वि०।

‡ 'जज्ञानः—जायमानः, अथवा यजमानः'—इति वि०।

¶ 'इदानीं मैत्रावरुणमुच्यते—इति वि०। आज्यमिति शेषः।

§ य० वे० ३३, ४६=ऋ० वे० १, २, ८, ४।

"वयम्" अनुष्ठातारः "सोमपीतये" * सोमपानाय ["दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम्] "मित्र" "वरुणं" च उभावाह्वयामः। कीदृशावुभौ ? "या जाता" यौ जातौ सन्तौ प्रदेशं प्रादुर्भवन्तौ, "पूतदक्षसा" प्रवृद्धौ † । [पूञ् पवने (क्र्या०, उभ०) ; "निष्ठा (३, २, १०२)"—इति क्तः, "श्र्युकः किति (७, २, ११)"—इति इट् प्रतिषेधः। पूतं दक्षो ययोस्तौ "बहुव्रीहौ प्रकृत्या (६, २, १)"—इति पूर्वपद-प्रकृतिस्वरत्वम् ॥

"याजाता"-"जज्ञाना"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

२ १ २ १ १ २ १ १ २ ३ १ २ १ २ ३ १ २
ऋतेनयावृतावृधावृतस्यज्योतिषस्पती ।
२ ३ १र २र
तामित्रावरुणाहुवे ॥ २ ‡ ॥

"यौ" मित्रावरुणौ "ऋतेन" सत्यवचनेन¶ यजमानानुग्रह-कारिणा "ऋतावृधौ" ऋतमवश्यम्भावितया सत्यं कर्मफलं तस्य वर्द्धकौ "ऋतस्य" सत्यस्य प्रशस्तस्य "ज्योतिषः" प्रकाशस्य "पती" पालकौ § [श्रुत्यन्तरे मित्रावरुणयोरदिति-पुत्रत्वेन श्रुतत्वात्

* "मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः"—इति पा० ३। ३। ९६।

† "पूतदक्षौ—पूतत्वेन दक्षत्वेन च सम्पन्नौ"—इति वि०।

‡ ऋ० वे० १, २, ८, ५।

¶ 'ऋतेन—यज्ञेन—इति वि०।

§ 'ज्योतिषः नक्षत्रजातस्य ज्योतिष्टोमस्य वा पती'—इति वि०।

Digitized by Google

हादशादित्येष्वन्तर्भूतत्वेन ज्योतिषः पालकत्वं युक्तम्, श्रुत्यन्तरे च अष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रश्च वरुणश्चेत्यादिकमाख्यातम् तौ मित्रावरुणौ । तथाविधैर्मित्रावरुणैः "सुपां सुलुमिति (७, १, ३९) पूर्वसवर्णदीर्घ आकारः] "हुवे" आह्वयामि । [ह्वेञ आत्मनेपदोत्तमपुरुषैकवचने सम्प्रसारणे (६, १, ३४) पूर्वरूपत्वे च (६, १, १०८) "बहुलं छन्दसि (२, ४, ७३)"—इति शपोलुक्; टेरेत्वम् (३, ४, ७९); "गुणे प्राप्ते "क्ङिति च (१,१,५)"—इति प्रतिषेधः; उवङादेशः (६, ४, ७७); "तिङतिङः (८, १, २८)"—इति निघातः ॥ २ ॥

अथ तृतीया ।

१ २   ३ १ २   ३ १र   २र   ३ १ २
वरुणःप्राविताभुवन्मित्रोविश्वाभिरूतिभिः ।
१ २   ३ १ २
करतान्नःसुराधसः ॥ ३ * ॥ ७

अयं "वरुणः" देवः अस्माकं "प्राविता भुवत्" प्रकर्षेण रक्षको भवतु । "मित्रः" च "विश्वाभिः ऊतिभिः" सर्वाभिः प्राविता भुवत् । तावुभावपि "नः" अस्मान् "सुराधसः" प्रभूतधनयुक्तान् "करतां" कुरुताम् । [डुकृञ् करणे (उभ०) भौवादिकः, लोटस्तस्, तसस्ताम्, अकर्त्तरि शप्, गुणोरपरत्वम्,

* ऋ० वे० १, २, ८, ९ ।

श्पः पित्त्वादनुदात्तत्वम् (३, १, ४); तिङश्च लसार्वधातुक-स्वरेण (६, १, १८६) धातुस्वरं (६,१, १६२) शिष्यते ॥३॥ ७

इन्द्रमिद्गाथिनइति चतुर्ऋचं तृतीयं सूक्तम् *,

तत्र प्रथमा।

२ ३ २ ३ १ २ ३ १ ३२ ३ १ २ ३ १ २
इन्द्रमिद्गाथिनोबृहदिन्द्रमर्केभिरर्किणः।
२ ३ १ २
इन्द्रंवाणीरनूषत ॥ १ † ॥

"गाथिनः" गीयमान-सामयुक्ता उद्गातारः "इन्द्रमित्" इन्द्रमेव "बृहत्" "त्वामिद्धिहवामहे (छ० आ० ३, १, ५, २)" —इत्यस्यामृच्युत्पन्नेन बृहन्नामकेन (आ० गा० १, १, २७) साम्ना "अनूषत" स्तुतवन्तः। [णु स्तुतौ (तु०, प०) ; "णो नः (६, १, ६५)"—इति नत्वम् ; लुङि व्यत्ययेनात्मनेपदम् (३, १, ८५) ; झस्य अदादेशः (७, १, ५) ; सिच इडभावः उकारस्य दीर्घत्वं छान्दसम् (६, १, १३३) ; धातोः कुटादित्वात् सिचो ङित्त्वेन (१, २, १) गुणाभावः (१, १, ५)] "अर्किणः" अर्चन-हेतु-मन्त्रोपेता होतारः "अर्केभिः" उक्थ-रूपैर्मन्त्रैरनूषत। ये त्ववशिष्टा अध्वर्यवः ते "वाणीः" वाग्भिः" यजूरूपाभिः इन्द्रम् अनूषत [अर्कस्य मन्त्रपरत्वं यास्केनोक्तम् (५, ४) 'अर्कोमन्त्रोयदनेनार्चन्तीति'] ॥ १ ॥

---

*'ऐन्द्रमाद्यमिदम्—इति वि०।

† छ० आ० ३, १, १, ५ (१भा० ४१७ पृ०) = ऋ० वे० १, १, १३, १।

Digitized by Google

अथ द्वितीया ।

१ २२उ २ २ ३ १ २ ३१ २३१ २
इन्द्र इद्धर्य्योः सचा सम्मिश्ल आ वचोयुजा ।
१ २३१ १३१ २
इन्द्रो वज्री हिरण्ययः ॥ २ * ॥

"इन्द्र इत्" इन्द्र एव "हर्य्योः" हरिनामकयोरश्वयोः "सचा" सह युगपत् "आ सम्मिश्लः" सर्वतः सम्यक् मिश्रयिता । कीदृ-शयोर्हर्य्योः ? "वचोयुजा" इन्द्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः । अयम् "इन्द्रः" "वज्री" वज्रयुक्तः "हिर-ण्ययः सर्वाभरणभूषित इत्यर्थः ॥ २ ॥

अथ तृतीया ।

२ ३ १ २ ३ १ २
इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
३१ ३१ २३ १ २
उग्र उग्राभिरूतिभिः ॥ ३ † ॥

हे "इन्द्र !" "उग्रः" शत्रुभिरप्रधृष्यः त्वम् "उग्राभिः" अप्रधृष्याभिः "ऊतिभिः" अस्मद्द्वेष्यपरपक्षाभिः "वाजेषु" युद्धेषु "नः" अस्मान् "अव" रक्ष । तथा "सहस्रप्रधनेषु च" सहस्र-सङ्ख्याक-गजाश्वादि-लाभयुक्तेषु महायुद्धेष्वपि रक्ष ॥ ३ ॥

---

* छ० आ० प० १, २, ३ (२भा० २६७पृ०) = ऋ० वे० १, १, १३, २ ।

† छ० आ० प० १, २, ४ (२भा० २६८पृ०) = ऋ० वे० १, १, १३, ३ ।

Digitized by Google

अथ चतुर्थी।

१ २ ३ २ ३१ १ २ ३ १२ ३२ ३ १
इन्द्रोदीर्घायचक्षसआसूर्य्यं रोहयद्दिवि।

२उ ३ १ २
विगोभिरद्रिमैरयत्॥ ४ *॥ ८ †

अयम् "इन्द्रः" "दीर्घाय" प्रौढाय निरन्तराय "चक्षसे" दर्शनाय "दिवि" द्युलोके "सूर्य्यमारोहयत्" पुरा वृत्रासुरेण जगति यदापादितं तमस्तन्निवारणेन प्राणिनां दृष्टिसिध्यर्थम् आदित्यं द्युलोके स्थापितवानित्यर्थः। स च सूर्य्यः "गोभिः" स्वकीय-रश्मिभिः "अद्रिम्" मेघम् "व्यैरयत्" विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः [अथवा इन्द्रएव "गोभिः" जलैर्निमित्तभूतैः "अद्रिं" मेघं "व्यैरयत्" विशेषेण प्रेरितवान्। पञ्चदश-सङ्ख्याकेषु रश्मि-नामसु 'खेदयः' (१) 'किरणाः' (२) 'गावः' (३)—इति पठन्ति (निघ० १, ५); त्रिंशत्सङ्ख्याकेषु मेघनामसु 'अद्रिः'(१) 'ग्रावा'(२)—इति पठितम् (निघ० १, १०)॥ ४॥ ८

* ऋ० वे० १, १, १३, ४।
† 'इहाभीमेन्द्राम्नमाध्यम्'—इति वि०।

अथ तृचात्मके चतुर्थसूक्ते—

प्रथमा।

१ २ ३ १र २र ३ १ २ ३ १र २र
इन्द्रेअग्नानमोबृहत्सुवृक्तिमेरयामहे।

३ १र २र ३ १ २
धियाधेनाअवस्यवः॥ १ *॥

"अवस्यवः" रक्षणकामाः वयम् "इन्द्रे" देवे "अग्ना" अग्नौ च "बृहत्" महत् वर्द्धकं † "नमः" हविर्लक्षणमन्नं ‡ "सुवृक्तिं" सुप्रवृत्तां स्तुतिञ्च ¶ "आईरयामहे" प्रेरयामः। तथाच "धिया" कर्मणा युक्ता § "धेनाः" ‖ [वाङ्नामैतत् (निघ० १, ११, २८)] स्तुतिरूपा वाचश्च अभिप्रेरयामः॥ १॥

अथ द्वितीया।

१र २र ३ १ २ ३ १र २र ३ १ २
ताहिशश्वन्तईडतइत्थाविप्रासऊतये।

३ २ ३ १ २
सबाधोवाजसातये॥ २ **॥

---

* ऋ० वे० ५, ६, १७, ४।

† 'बृहत्—महत्'—इति वि०।

‡ 'नमः—नमस्कारम्'—इति वि०।

¶ 'सुवृक्तिं—शोभनां स्तुतिं वचनम्'—इति वि०।

§ 'धिया बुद्ध्या'—इति वि०। "धीः"—इति कर्मनामसु निघण्टौ एकविंशतितमं पदम् (२, १)।

‖ 'धेनाः—धेट् पाने (भ्वा० प०), पानसमर्थाः'—इति वि०।

** ऋ० वे० ५, ६, १७, ५।

Digitized by Google

"ता हि" तौ खलु * इन्द्राग्नी "अवन्तः" बहवः "विप्रासः" मेधाविनः जनाः "ऊतये" रक्षणाय "इत्थम्" अनेन प्रकारेण "ईडते" स्तुवन्ति। तथा "सबाधः" समानं परस्परं बाध्यमाना जनाः "वाजसातये" अन्नसातये अन्नलाभाय ताविन्द्राग्नी ईडते। यद्वा 'वाजसातिः'—इति सङ्ग्रामनाम (निघ० २, १७, ३६) सङ्ग्रामार्थम्॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ २ ३ १ २
ता वाम्गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे।
३ १ २ ३ १ २
मेधसाता सनिष्यवः॥ ३ †॥ ६

"विपन्यवः" स्तोत्रमिच्छन्तः "प्रयस्वन्तः" हविर्लक्षणेनान्नेनोपेताः ‡ "सनिष्यवः" सनिं धनमात्मन इच्छन्तः वयं "मेधसाता" मेधानां यागानां ¶ "सातौ" सम्भजने निमित्तभूते

* 'वौति यत्माद्यर्थे'—इति वि०।

† ऋ० वे० ५, ६, १०, ६।

‡ 'प्रयस्वन्तः—प्रकर्षेण यजमाना ब्रह्मान् प्रति गच्छन्तः'—इति वि०।

¶ "मेधः"—इति निघण्टौ यज्ञनामसु चतुर्थं पदम् (३, १७)।

Digitized by Google

सति हे इन्द्राग्नी! "ता" तौ "वां" युवां "गीर्भिः" स्तुतिभिः "हवामहे" ॥

"विपन्यवः"-"विपन्यवे"—इति पाठौ ॥ ३ ॥ ९

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य तृतीयस्याध्यायस्य द्वितीयः खण्डः * ॥ २ ॥

वृषापवस्वेति तृतीयखण्डे †—

प्रथमतृचे—प्रथमा ।

१ २ ३ १ २ ३ १ २ ३ १

वृषापवस्वधारयामरुत्वतेचमत्सरः ।

२ १ १ २ ३१ २

विश्वादधानओजसा ॥ १ ‡ ॥

हे सोम ! त्वं "वृषा" स्तोतृणामभिमत-फलस्य वर्षकः सन् "धारया" त्वदीयया "पवस्व" द्रोणकलशमागच्छ [पवतिर्गति-कर्मा (निघ० २, १४, १०८) आगतस्त्वं यदा अस्माभिः इन्द्राय दीयसे तदा "मरुत्वते" सहाया मरुतो यस्य सन्ति तस्मै इन्द्राय "मत्सरः" मदकरश्च भव । कीदृशः ? "विश्वा" विश्वानि सर्वाणि व्याप्तानि वा धनानि "ओजसा" आत्मीयेन बलेन

---

* 'उक्त प्रातःसवनम्'—इति वि० ।

† 'इदानीं माध्यन्दिनं सवनमभिधीयते'—इति वि० ।

‡ ऋ० आ० ५, २, ४, ३ (१भा० १०४०) ऋ० वे० ७, १, २, ४ ।

युक्तः सन् स्तोतृभ्यः तानि "दधानः" प्रयच्छंस्त्वं मादयिता भवेति समन्वयः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ १ २ ३ १ २
तन्त्वाधर्त्तारमोण्योऽ३ऽव्यवमानस्वर्दृशम्।
३ १२ ३२ ३ १ २
हिन्वेवाजेषुवाजिनम् ॥ २ * ॥

हे "पवमान" पूयमान पुनान वा सोम! "ओण्योः" [द्यावापृथिवी नामैतत् (निघ० ४, ३०, १५)] तयोः "धर्त्तारं" धारकम् अतएव "स्वर्दृशं" सर्वस्य सर्वेव द्रष्टारं, सर्वै र्द्रष्टव्यं वा। "वाजिनं" बलवन्तं तं पूर्वोक्तगुणं प्रसिद्धं "त्वा" त्वां "वाजेषु" सङ्ग्रामेषु त्वां प्रेरयामि [यद्वा "वाजेषु" विषयेषु प्रेरयामि, अन्नादिकं प्रयच्छेत्यर्थः † ॥ २ ॥

अथ तृतीया।

३ १ ३ २ ३ २उ ३ १ २ ३ १ २
अयाचित्तोविपानयाहरिःपवस्वधारया।
२ ३ १ २
युजंवाजेषुचोदय ॥ ३ ‡ ॥ १० ¶

---

* ऋ० वे० ७, १, ३, १।

† 'वाजेषु—अन्नेषु। सङ्ग्रामेषु वा, चित्तकरणभूतेषु। वाजिनं अन्नवन्तं वेगवन्तं वा'—इति वि०।

‡ ऋ० वे०७, १, ३, २।

¶ 'इद यौक्ताश्वं साम'—इति वि०। 'यौक्ताश्व-प्रभृतीनि सामानि तेषां नाम्नो नार्थप्रतिपत्तिः'—इति च वि०।

Digitized by Google

हे "पवमान" सोम ! "अया" * [अय पय गतौ (भ्वा०, आ०) पचाद्यच् (३, १, १३४), तृतीयाया आकारः (७, १, ३९)] कर्माणमितस्ततो गच्छन्तीभिः "विपा" [विप प्रेरणे (चु०, उभ०) हवींष्यन्नो प्रेरयन्तीति विपा अङ्गुलयः । एकवचनं छान्दसं प्रत्येक-विवक्षया वा] एताभिर्मदीयाभिरङ्गुलिभिः "चितः" स्रातः निर्गतः अभिषुतः "हरिः" हरितवर्णः त्वं "धारया" सन्ततया "पवस्व" द्रोणकलशं प्रहांश गच्छ । किञ्च "युजं" † सहायम् इन्द्रं "वाजेषु" सङ्ग्रामेषु ‡ "चोदय" प्रेरय । यदाऽऽभिरिन्द्रार्थं सोमा दीयन्ते तदानीमिन्द्रः सुत्यानेन हृष्टः सन् शत्रून् हन्तीत्यर्थः ॥ ३ ॥ १०

॥ यौक्ताश्वम् ॥ औहोहोहायि । वृषा । पवस्वा३ धारायाइ । मारुत्वा२३४तायि । चोयि । चमा२३ । चमारत्मार२३४राः । औहोहोहायि । विश्वा । दधार२ नार२३४ओ । जाहार२३४औहोवा ॥(१) औहोहोहायि । तन्वा । धर्त्तारा३मोणायोइः । पावा२ मा २ ३ ४ ना ।

---

* 'अया—अनया विपा विप्रस्य प्राज्ञपिप्रया'—इति वि० ।

† 'युजं—योजम्'—इति वि० ।

‡ 'वाजेषु—यज्ञेषु'—इति वि० ।

Digitized by Google

१ ७ १ ३ ५ २र १ २
ओयि । सुवा२३ । सुवा२र्हू२३४शाम् । औहोहोहा
१ २ १र २ ५ २ २
यि । हिन्वायि । वाजा२यिषू२३४वा । जायिना२३४
र ५र २र १ २ १ २ र २
औहोवा ॥(२) औहोहोहायि । यया । चित्तोवी३पा
२ १ २ ५ १ ७
नाया३ । द्धारा२यिः । पा२३४वा । ओ । स्वधा२३ ।
१ ३ ५ २र १ २ १ २ १र
स्वधा२रा२३४या । औहोहोहायि । युजाम् । वाजा२यि
३ ५ २ २ ५र र २ २
षू२३४चो । दाया २ ३ ४ औहोवा । ओयि । ज्वर
२
आ(३) ॥ १८ * ॥ [१]

१ २ १ २
॥ सन्तनि ॥ वृषाहाउ । पावस्वधा३१उवा२३ । रा
५ २१ २र २ १ २ १ र २
२३४या । मरुत्वतेचमत्सरा१ः । विश्वाहाउ । दाधान
१ ५ १ र १ १र २र १र
ओ३आउवा२३ । जा२३४सा ॥(१) तन्त्वाधर्त्तारमोस्योः
२र १ ३ २१ ११ १ २ १ र २
पवमानस्वर्हृशा२३४५म् । हिन्वेहाउ । वाजेषु वा३
५ २ १र २ १र २ १र २र
१उवा२३ । जा२३४यिनाम् ॥(२) अयाचित्तोविपानया

* ऊ० गा० १प्र० २अ० १८गा० ।

१ २ १र २१११ १ २ १ र १ १
हरिःपवस्वधारया२३४५। युजाऽ२न्वाउ। वाजेषुचो३वा।
५
उवा२३। दा२३४या(३) ॥ १ * ॥ [२]

२र १ २ १ २ १ ५
॥ ऐडसौपर्णम् ॥ वृषापवोवा। स्वाधारा२३४या।
२ १ २ १ ७ २ ५ १
महत्वतायि। चमा२त्सा२३४राः। वा२यिस्वा। दा२
२ १ २र १ २ ४ ५ २ र १ २
३धा। नाम्रोजसा। औ३होवा ॥(१) तन्त्वाधर्तोवा।
१ २ ३ ५ २१ २र १ ७ ३ ५
रामोणा२३४योः। पवामाना। स्वा२र्हं २ ३ ४ ग्राम्।
२ १ २र १ ४ ५
दा२यिन्वे। वा२३जायि। षूवाजिनाम्। औ३होवा॥(२)
२र १२ १ १ २ ५ २१ २१
अयाचित्तोवा। वायिपाना२ ३ ४ या। हरायिःपवा।
७ ३ ५ १ २ १ २र १
स्वधा२रा२३४या। यू२जाम्। वा२३जायि। षूचोद्या।
२ ४ ५ ४
औ३होवा। हो५ई। डा(३) ॥ २ † ॥ [३]

१ २र १ २ १ २
॥ रोहितकूलीयोत्तरम् ॥ वृषापवस्वधा। रया२।
१ र२१ २ १ १ २ १
महत्वतेचमत्सा२३राः। वायिस्वा२दाधा२३। नस्रो२३४

* ऊ० गा० ४प्र० १ख० १सा०। † ऊ० गा० ४प्र० १ख० २सा०।

५ ४ ५ १ २ १ १२ १ १ २
वा। जा५सो६हायि ॥(१) तन्वाधर्त्तारमो। णियो

१ २ २ १ २ १ १
२ः। पवमानसुवर्दृ२३शाम्। हायिन्वे२वाजा२३यि।

२ १ ५ ४ ५ १ १२ २ २ २ १
प्रुवो२३४वा। जा५यिनो६हायि ॥(२) अयाचित्तोविपा।

२ १ १ १२ २ १ १
नया२। हरिःपवस्वधारा२३या। यूजा२वाजा२३यि।

२ १ ५ ४ ५
प्रचो२३४वा। दा५योई६हायि(३) ॥ ३ * ॥[४]

५ २ १ ४ ५२ २ १ २
॥ आमहीयवम् ॥ वृषोपा३वस्वधारया। मरुत्वा१

१ १२ २ १ २
जा२यि। यमा२३त्सरा:। विश्वादधा। नओ२३जसा

५ २ २ ४२ ५२ २ १
उ। वा३ ॥(१) तन्वाधा३र्त्तारमोणियो:। पवामा१

१ २ १२ १२ १
ना२। सुवा२३र्दृशाम्। हिन्ववाजायि। प्रुवा २ ३

२ ५ २ २ ४२ ५२ २ १
जिनाउ। वा३ ॥(२) अयाचा३यित्तोविपानया। हरा

२ १ २ १ १२ १
यि:पा१वा२। स्वधा२३रया। युजंवाजायि। प्रचोर

२ २२ १ १ १ २
३दयाउ। वा३। स्तौषे२३४५(३) ॥ १ † ॥ [५]

---

* ऊ० गा० ४प्र० १अ० ३सा०। † ऊ० गा० ६प्र० १अ० १सा०।

॥ हाविष्मतम्॥ हाउवृषापवस्वधारयाहाउ। मरु
त्वताइयि। चामत्सा२३४राः। ऐ२हो१आ २ ३ यिही।
विश्वादा३धा। नचो। जा२सा २ ३ ४ औहोवा॥(१)
हाउतन्त्वाधर्त्तारमोण्योर्हाउ। पवमाना३। सूवर्ह२३
४शम्। ऐ२हो१आ२३यिही। हिन्वेवा३जायि। षु
वा। जा२यिना२३४औहोवा॥(२) हावयाचित्तोविपान
याहाउ। हरिःपवा३। स्वाधारा२३४या। ऐ२हो१आ
२३यिही। युजांवा३जायि। पृचो। दा२या२३४औहो
वा। हविष्मते२३४५(३)॥ १ *॥ [६]

॥ यौक्ताश्वोत्तरम्॥ वृषाऔहोहोहायि। पवा३
स्वाधा१राया३। मारुत्वा२३४तायि। चमा३। चोयि।
चमा२त्सा२३४राः। विश्वाऔहोहोहायि। दधा२ना

* ऊ० गा० अ० १ख० १गा०।

५ १ २ ५र र २ र र १
२३४ओ । जा२सा२३४औहोवा ॥(१) तन्वाऔहोहो

२ २र १ २ २ १ २ ५
हायि । धर्त्ता३रामो१णायो३ः । पावा२मा२ ३ ४ ना ।

२ २ १ ७ २ ५ २ र र १
सुवा३ । ओयि । सुवा२ई २ ३ ४ याम् । हिन्वाऔहो

२ १र २ ५ १ २ ५र र
होहायि । वाजा२यिषू२३४वा । जा२यिना२३४औहो

र र १ २ र २ १ २
वा ॥(२) अयाऔहोहोहायि । चित्ता३वायिपा१ना

२ १ २ ५ २ १ ७
या३ । हारा२यिःपा२३४वा । स्वधा३ । ओ । स्वधा

२ ५ २र र १ २ १र २
२रा२३४या । युजाऔहोहोहायि । वाजा२यिषू२३४

५ १ २ ५र र २ २
वो । दा २ या २ ३ ४ औहोवा । ओयि । जू २ ३ ४

५
वा(३) ॥ २ * ॥ [७]

१ १ १ २ १
॥ आजिगम् ॥ वृषापावा । स्वधाराया । मरुत्व

१र १ ७ २ १ २ १र २
ते । चामत्सा२३राः । विश्वादाधा । नओजा२३सा३

१ २ १ १ १ २र १७
४३ ॥(१) तन्वाधार्त्ता । रमोणायोः । पवमान । स्वव

* ऊ० गा० ७प्र० १ख० २षा० ।

२ २ १र २
हुँ२३शाम् । हिन्वेवाजायि । षुवाजार३यिना३४३म् ॥(२)
१ २ १ २ १ २ १ २
अयाचायित्ता । विपानाया । हरिःपव । स्वाधा१रा२
२ १ २ १र २ १
३या । युजांवाजायि । षुचोदा२३या३४३ । ओ२३४५
ई । डा(३) ॥ १४ * ॥ [८]

२ र र २ ४ ३ ४र ५
॥ स्वारसौपर्णम् ॥ वृषापवस्वधारा३या । मरुत्वतेच
र १ ३ ५ १ २ १ १र
मा । ऊम् । त्सा२३४राः । वायिश्वा३उवा । दधा ।
२ १ ५ ४ ५ २ र र र
नओ२३४वा । जा५सोऽ६हायि ॥(१) तन्त्वाधर्त्तारमोणा
२ ३ ४ ५र र १ ३ ५ १
३या३योः । पवमानस्तुवा । ऊम् । हु२३४आस् । हायि
२ २ र १र २ १ ५ ४ ५
न्वा३उवा । वाजे । षुवो२३४वा । जा५यिनोऽ६हायि ॥(२)
१ र र र २ ३ ४ ३ ४ ५र १ ३
अयाचित्तोविपाना३या । हरिःपवस्वधा । ऊम् । रा२
५ १ २ २ र १र २ १ ५ ४
३४या । यूजा ३ उवा । वाजे । षुचो२३४वा । दा५
५
योऽ६हायि(३) ॥ १५ † ॥ [९]

---

* ऊ० गा० ११प्र० २ख० १४सा० ।   † ऊ० गा० ११प्र० २ख० १५सा० ।

Digitized by Google

२ १ २ २ १
॥ सुरूपोत्तरम्॥ वृषापवौहोर२। इया। स्वधारा
२ १ १ २ १ २
या२। मरुत्वतौहो२। इया। चमत्सारा२ः। विश्वा
१ १ २ १२ २ २ २
दधौहो२। इया। नओजा२३सा३ ४ इ॥(१) तन्त्वा
१ १ २ २ १ २ १२
धत्ताहो२। इया। रमोणाये२ः। पवमानौहो२।
१ २ १ २१२ १ २
इया। सुवर्दृशा२म्। हिन्वेवाजौहो२। इया। पु
१२ २ २ २ १ १
वाजा२३यिना ३ ४ ३म्॥(२) अयाचित्तौहो२। इया।
२ २ १ १ १ २ २ १
विपानाया२। हरिःपवौहो२। इया। स्वधाराया२।
१२ १ २ १२ २ १
युजंवाजौहो२। इया। घुचोदा२३या३४३। यो २ ३
४५ई। डा(३)॥ १८ *॥[१०]

२२२ २ २
॥ ऋषभःपावमानम्॥ हाहाउवृषापवा। हा३। हा
१ ३ ५ १ २ २ २ १
३यि। स्वाधा२रा २ ३ ४ या। मरुत्वतेचमा१त्सा३राः।
२ ३ ३ १ २ ४ ४ ४ ५
विश्वादा२३४धा। योमो३। नओवा। जा५सोई।

* ऊ० गा० १८प्र० १अ० १८सा०।

Digitized by Google

१ २ ५ १ र २ २ २
यि ॥(१) रामो२णा२३४यो:। पवमानसुवा१र्द३श्राम्।

र २ ५ १ २ ४ ५ ४
हिन्ववा२३४जायि। श्रोमो२। सुवोवा। जा५यिनो६

५ २र र र २ १
हायि ॥(२) हाहाक्याचित्ताः। हा३। हा३यि। वा

२ ५ १ २ २ २
यिपा२र्ना२३४या। हरि:पवसुधा१राया। युर्जवा२३४

५ १ २ ४ ५ ४ ५
जायि। श्रोमो३। सुवोवा। दा५यो६हायि(३)॥१८*॥[११]

१ २र १ २ १र २र १ २र १
॥ हरिश्रीनिधनम् ॥ वृषापवसुधारया। वृषापवा।

र १ र २ १ १ २ऽ
सुधारया२। मरुत्वतेचमाहो२। त्सारा२३ः। हाउ

१ २ १र १ ५र र
वा। विश्वादा२३धा। नश्रो। जा२सा२३४श्रौहोवा ॥(१)

१ र २ १र र १र २र १ २र १ र
तन्त्वाधर्त्तारमोणियोः। तन्त्वाधर्त्ता। रमोणियो२ः।

१ र २ १ १ २ऽ १
पवमानसुवाहो२। इश्रा२३म्। हाउवा। हिन्वेवा

२ १र २ ५र र १
२३जायि। सुवा। आ२यि। ना२३४श्रौहोवा ॥(२) श्र

१र २ १र २ १र २र १ २र १ र १
याचित्तोविपानया। श्रयाचित्ताः। विपानया२। हरि:

---

* ऊ० गा० १८प्र० १ख० १८सा०।

२ १ १ १ऽ १ २
पवस्वधाहो२। राया२३। हाउवा। युजांवा२३जा

१र २ ५ र १ १ १ १
यि। षुचो। दा२ या२३४औहोवा। हरी३श्री२३

१ १
४ पूः(३)॥ १ *॥ [१२]

१ २र १ २ १र र २ १
॥ गौषूक्तम् ॥ वृषापवस्वधौ। हौहोवाहायि। रया।

२ १ १ १
महत्वतेचमौ२। ऊवायि। ऊवा२यि। त्सारा२ः। वि

र र १ १ १
श्वादधानश्रौ२। ऊवायि। ऊवा२यि। जासा२३।

१ २ ५र र १ र २ १र२ १र र
हो२वा२३४औहोवा ॥(१) तन्त्वाधर्त्तारमौ। हौहोवा

२ १ र २ १
हायि। णियोः। पवमानसुवौ२। ऊवायि। ऊवा२

१ १ र र र २ १
यि। दृशा२म्। हिन्वेवाजेषुवौ२। ऊवायि। ऊवा

१ १ २ ५र र २ १र
२यि। जासा२३। हो२वा२३४औहोवा ॥(२) षया

२ १र २ १र र २ १ २
चित्त्राविपौ। हौहोवाहायि। नया। हरिःपवस्वधौ

१ १ १ र र २
२। ऊवायि। ऊवा२यि। राया२। युजंवाजेषु

* ऊ० गा० १०प्र० १खं० १गा०।

चौ२। ऊवायि। ऊवा२यि। दाया२३। चा२वा२३४औहोवा। अग्निराऊता२३४५ः(३) ॥ ९ * ॥ [१३]

॥ आकलम् ॥ वृषापवा२स्वधारया। मरुत्वतेचमत्सा२३राः। वायिस्वा२। दाधानओ२३। ऊम्। जा३४५ सोइहायि ॥(१) तन्त्वाधर्त्ता२रमोण्यो: । पवमानस्ववहृ२३आम्। हायिन्वे२। वाजेषुवा२३। ऊम्। जा३४५यिनाइहायि ॥(२) अयाचित्ता२विपानया। हरि:पवस्वधारा२३या। यूजा२म्। वाजेषुचो२३। ऊम्। दा३४३योइहायि(३) ॥ १० † ॥ [१४] १०

अथ द्वितीयतृचे—प्रथमा।

वृषाशोणोअभिकनिक्रदद्गा
नदयन्नेषिपृथिवीमुतद्याम्।

* ऊ० गा० २०प्र० २ख० ९सा०। † ऊ० गा० २०प्र० २ख० १०सा०।

१ २   ३ १र २र ३ १
इन्द्रस्येववग्नुराशृण्वआजौ
२ ३ १ २   ३ २ ३ २
प्रचोदयन्नर्षसिवाचमेमाम् ॥ १ * ॥

"श्येनः" श्येनवर्णः † "वृषा" कश्चिद् वृषभः "गाः" पशून् "अभि" लक्ष्य "कनिक्रदत्" ‡ शब्दं करोति [एवं "गाः" स्तुतीः "अभि कनिक्रदत्" अभिशब्दायमानः]। तदेवाह— "नदयन्" शब्दमुत्पादयन् हे सोम! त्वं "पृथिवीम्" "उत" अपिच "द्याम्" एतौ लोकौ "एषि" गच्छसि। किञ्च "वग्नुः" [वग्नु वाङ्नामैतत् (निघ० १, ११, २५) तस्य] वाक्यस्य शब्दः "आजौ" सङ्ग्रामे "इन्द्रस्येव" इन्द्रशब्द इव "शृण्वे" सर्वैः श्रूयते। ततः "प्रचेतयन्" आत्मानं सर्वेषां प्रज्ञापयन् "इमां" "वाचम्" "अर्षसि" समन्तादागमयसि उच्चैः शब्दायत इत्यर्थः ॥ १ ॥

अथ द्वितीया ।

३२ ३ १ २ ३ १ २
रसाय्यःपयसापिन्वमान
३ १ २   ३ १ २३   ३ २
ईरयन्नेषिमधुमन्तमंशुम् ।

---

* ऋ० वे० ७, ४, १२, २।   † 'श्येनः—वज्रवर्णः'—इति वि०।

‡ "दाधर्ति-दर्धर्ति-दर्धर्षि-बोभूतु-तेतिक्ते-ऽलर्ष्या-ऽऽपनीफणत्-संसनिष्यदत्-करिक्रत्-कनिक्रदद्-भरिभ्रद्-दविध्वतो-दविद्युतत्-तरित्रतः—सरीसृपतं—वरीवृजन्-मर्मृज्या-ऽऽगनीगन्तीति च (७, ४, ६५)"—इति पाणिनिस्मरणात् क्रन्दे र्लुङि पूर्वेऽह्

१२　　२१२　　२१
पवमानसन्तनिमेषिकृण्व
१२　　३१२
न्निन्द्रायसोमपरिषिच्यमानः ॥ २ * ॥

हे सोम! "रसाय्यः" [रसेरौणादिक आय्य-प्रत्ययः (उ०, ३, ८६)] आस्वाद्यः † "पयसा" "पिन्वमानः" क्षरंस्त्वम् "ईरयन्" "मधुमन्तं" माधुर्य्योपेतम् "अंशुम्" रसभावम् "एषि" प्राप्नोषि ["अंशुमश्टमात्रो भवति"—इति यास्कः (निरु० ,)]। अनेन सोमरसोऽभिधीयते। किञ्च हे सोम! "परिषिच्यमानः" अद्भिः परिषिक्तो भवंस्त्वं "पवमानः" पवित्रे पूयमानः सन् "सन्तनिं" [तनु विस्तारे (त०, प०) इ-प्रत्ययः] सन्ततां धारां "कृण्वन्" कुर्वन् "इन्द्राय" इन्द्रार्थम् "एषि" गच्छसि ॥ २ ॥

अथ तृतीया ।

३१२　　३१२　२१२
एवापवस्वमदिरोमदायो
३१२३१२　　३१
दग्राभस्यनमयन्वधस्नुम् ।
१२१२३१२　　३१२
परिवर्णम्भरमाणोरुशन्तं
३१२　३१२　　३२
गव्युर्नोअर्षपरिसोमसिक्तः ॥ ३ * ॥ ११

द्विर्वचनमभ्यासस्य चुलाभावो निपातनम्‌ । लुङ् चात्र "छन्दसि लुङ्-लङ्-लिटः (३, ४, ६)"—इति धात्वर्थ-सम्बन्धमात्रे सार्वकालिकः ।

* ऋ० वे० ७, ४, १३, ४ ।　　† 'रसाय्यः—रसवान्'—इति वि० ।

‡ ऋ० वे० ७, ४, १३, ५ ।

हे सोम ! "मदिरः" मदकरः त्वम् "उदग्राभस्य" * ["क्रिया ग्रहणं कर्त्तव्यम्"—इति कर्मणः सम्प्रदानसंज्ञा । चतुर्थ्यर्थे बहुलमिति षष्ठी] उदग्राभम् उदकग्राहिणं मेघं "नमयन्" वृष्ट्यर्थं प्रह्वीकुर्वन् । कीदृशम् ? "वधस्नुम्"† हननवधेन प्रस्नवन्तम् "मदाय" मदार्थमेव "पवस्व" पात्रेषु क्षर । किञ्च "दृशन्तम्" आरोप्यमानं श्वेतं "वर्णं" "परि भरमाणः" परितो बिभ्रत् "सिक्तः" पवित्रे सिच्यमानः त्वं "गव्युः" अस्माकं गा इच्छन् "पर्येषि" परिगच्छ ॥

"वधस्नुं"-"वधस्नैः"—इति पाठौ । ३ ॥ ११

॥ इन्द्रवद्वासिष्ठम् ॥ औहोवाहा ३ होयि । इहा । वृषाशोणो । अभिक । निक्रदङ्गाः । नदयन्नायि । यो ३ पृथि । वीमुतद्याम् । इन्द्रस्येवा । वग्नुरा । शृणव आजाउ । प्रचोदयान् । अर्षसि । वा३४३ । चा३मा ५ यिमा ई५ईम् ॥(१) रसायियाः । पयसा । पिन्वमा नाः । ईरयन्नायिषी३मधु । मन्तमꣳशूम् । पवमाना ।

---

* 'उदग्राभस्य—उदक-सङ्घातस्य वधस्नुम्, उदकसङ्घातस्य वधः येन क्रियते भवति परिवर्त्तः सोमेन स वधस्नुः'—इति वि० ।

† मन्त्रे तु प्रायो वधोऽत्ययत्वकारादिर्दृश्यते ।

२ १ २ ३ ४ ५ २ १र २ १ २
सन्तनिम्। एषिक्तणवान्। इन्द्रायसो। मा३परि। षा

२ ४ २र १र २
३४३यि। च्या३मा५ना६५६ः॥(२) एवापवा। स्वा३

१ १ २ ३ ४ ५ २ १ र २ १ २ र २
मदि। रोमदाया। उदग्राभा। स्या ३ नम। यन्वध

५ २ १ २ १ र १ २ ३ ४ ५ २र २र
स्नुम्। परिवर्णाम्। भरमा। णोरुशन्ताम्। औहो

१ २ १ ३ २ १ र २ १ ४
वा हा३होयि। इन्दा। गव्युर्नोंआ। षा३परि। सो३

२ ४
४३। मा५सा५यिक्ता६५६ः(३)॥ २ *॥ [१]

२ २ २ र १र २ १
॥ पार्थम्॥ ओ३हो३होयि। वृषाशोणो। अभिक।

१ २ ४ ५ २ १ २ १ १ २ ४ ५
निक्रदद्गाः। नदयन्नायि। षी३पृथि। वीमुतद्याम्।

२ १र २ १ र २ १ ४ ५ २ र १ २
इन्द्रस्येवा। वग्नुरा। शृणवआजाउ। प्रचोदयान्। अ

१ २ २ ४ २ र १
षसि। वा३४३। चा३मा ५ यिमा६५६म्॥(१) रसायि

१ १ र १ २ ४ ५ २र १ २ १
याः। पयसा। पिन्वमानाः। ईरयन्नायि। षी३मधु।

१ २ ४ ५ २ १र २ १ १ २ ४ ५
मन्तमꣳशूम्। पवमाना। सन्तनिम्। एषिक्तणवान्।

* ऊ० गा० २प्र० १अ० २सा०।

२ र १ २ १ २ २ ४
इन्द्रायसो । मा२परि । षा३४३यि । च्या३मा५नाई

२र र १ २ १ २ ३ ४ ५ २
५ई: ॥(२) एवापवा । स्वा३मदि । रोमदाया । उद

१र २ १ २ ३ ५ २ १ २१
आभा । स्वा३नम । यन्वधस्नूम् । परिवणाम् । भर

र १ २ ३ ४ ५ २ २ २ १र
मा । णोरुग्रताम् । ओ २ हो २ होयि । गव्युर्नोआ ।

२ १ २ २ ४
षा३परि । सो३४३ । मा२सा५यिक्ता६५ई:(३) ॥ ६* ॥[२]११

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य तृतीयस्याध्यायस्य
तृतीय: खण्ड: † ॥ ३ ॥

अथ चतुर्थखण्डे ‡ प्रमाथरूपे—

प्रथमसूक्ते—प्रथमा ।

१र २र ३ १ २र ३ १ १
त्वामिद्धिहवामहेसातौवाजस्यकारव: ।

१ ३ १ २ ३ १ २ ३ १ २ १र ३ १ १
त्वांवृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठास्वर्वत: ॥ १ ¶ ॥

---

* ऊ० गा० ७प्र० १ अ० ६ गा० ।

† "उक्तो माध्यन्दिन:"—इति वि० ।

‡ 'या ज्योतिष्टोमे देवता परिभाषा साम्नां सैवात्रापि"—इति वि० ।

¶ छ० आ० ३, १, ५, २ (१भा० ४८१ पृ०)=ऋ० वे० ६, ७, १७, १ ।

"कारवः" स्तोतारो वयं "वाजस्य" अन्नस्य "सातौ" सम्भजने निमित्तभूते सति, हे "इन्द्र!" "त्वाम् इत् हि" त्वामेव "हवामहे" स्तुतिभिराह्वयामहे। हे इन्द्र! "सत्पतिं" सतां पालयितारं श्रेष्ठं त्वां "नरः" अन्येऽपि मनुष्याः "वृत्रेषु" आवरकेषु शत्रुषु सत्सु "हवन्ते" आह्वयन्ति, तज्जयार्थम्। अपिच "अर्वतः" अश्वस्य सम्बन्धिनीषु "काष्ठासु" यथा अश्वः क्रान्त्या तिष्ठति तासु "काष्ठासु" सङ्ग्रामेषु युद्धकामाश्च त्वामेवाह्वयन्ति, अतो वयं त्वामेवाह्वयाम इत्यर्थः॥

"सातौ"-"साता"—इति पाठो॥ १॥

अथ द्वितीया।

१२ ३ २ ३ २ ३१ ३ २ १ २

सत्वन्नश्चित्रवज्रहस्तधृष्णुयामहस्तवानो अद्रिवः।

१ २२ ३ १२ ३ १ २ ३ १उ ३ १ ३ १ २

गामश्वꣳरथ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्यषे॥२*॥ १२

हे "चित्र" चायनीय! "वज्रहस्त" वज्रबाहो! "अद्रिवः" वज्रवत्† [यद्वा आदृणात्यनेनेत्यद्रिरशनिस्तद्वत्] एवम्भूत हे इन्द्र! "धृष्णुया" धृष्णुः शत्रूणां धर्षयिता‡ "महः" महान्

---

* ऋ० वे० ४, ७, २७, २।

† 'अद्रिवः—वज्रवन्। अथवा अद्रयः पर्वताः। अथवा अभिषवग्रावाणः। ते अद्रिवः'—इति वि०। अत्र "मतुवसो रुः सम्बुद्धौ छन्दसि (८, ३, १)"—इति रुत्वम्।

‡ 'धृष्णुया—धारणशीलया बुद्ध्या प्रज्ञया वा'—इति वि०।

न तादृशस्त्वं "स्तवानः" अस्माभिः स्तूयमानः सन् "गाम्" "रथ्य" रथवाहम् "अश्व" च "सं किर" सम्यक् प्रयच्छ । "जिग्युषे" जितवते पुरुषाय भोगार्थं "सना" महत् प्रभूतं * "वाजं न" अन्नमिव यथा प्रचूरं जितवते भोगार्थं बहु प्रयच्छसि तद्वत् † ॥ २ ॥ १२

२र र र १ २ २
॥ वारवन्तीयम् ॥ तुवामिद्धाऔहोहायि । हावामा२३
५ २ र र र १ ५ १र र
४हायि । सातौवाजस्यकारावो२३४हायि । त्वांवृत्रेषि
२ १र ४र ५ १ ३ ५ २
न्द्रसत्पतिन्ना३४ । औहोवा । हुहा२३४हायि । उऊ
२ ५ २१र २र १ ७ २ १र ४र ५
वा२३४राः । तुवाङ्का । ष्ठासुअर्वा ३ ४ । औहोवा ।
१ ३ ५ १र २ ४र ५
हुहा२३४हायि । औहो३१२३४ । ताः । एहियाईहा । (१)
२ र र र १ २ २ ५ २ १
तुवाङ्काऔहोहायि । सूअर्वा२३४ताः । सत्वाना२ ३ ४
५ १ २ १र ४र ५ १ ३
हायि । चित्रवज्रहस्तधृष्णू३४ । औहोवा । हुहा२३४
५ २ ३ ५ २ १ १ १ ७र २
हायि । उऊवा२ ३ ४ या । महस्त । वानोअद्रा ३ ४ ।

* 'सना—सदा'—इति वि० ।

† 'वाजम्—अन्नम् । न जिग्युषे—न शब्द उपमार्थीयः, यथा जिग्युषे ; समनशीलाय वणिजि यथा धनमुत्पद्यते तद्वत् त्वमस्मासु देहीत्यर्थः ।

Digitized by Google

२र ४र ५ १ २ ५ २र २
औहोवा। इहा२३४हायि। औहो३१२३४। वाः।
५र ५ २ र र १ २ २
एहियाइहा ॥(२) महस्तवाऔहोहायि। नोअद्रा२३४
५ २र १ ५ १ २
यिवाः। गामाश्वा२३४ऽहायि। रथियमिन्द्रसश्चा३४।
२र ४र ५ १ २ ५ २ १ र २ १र २र
औहोवा। इहा२३४हायि। उऊवा२३४रा। सनावा।
१ ७ २ २र ४र ५ १ २ ५ २र २
जान्नजिग्यू३४। औहोवा। इहा२३४हायि। औहो
५र ५ ४
३१२३४। षायि। एहियाइहा। होपुइ। डा(३) ॥१ ३*॥[१]
२र र र १ १ २
॥ काण्वबृहत् ॥ औहोतुवामिद्धा३ए। हवामा१हा
२र २ १ र २र र २ २
२३४यि। हाहोयि। सातौवाजस्यकारवः। तुवांवा१
२र २ १ २ १ २
त्रा२३४। हाहोयि। षूइन्द्रसत्। पतायिन्ना१रा२३४ः।
२र २ १ २ २र २ २ १ १
हाहोयि। तुवाङ्का१ष्ठा२३४। हाहो। सुआ३। वा
५ ५ २र र र र
२३४ताः। उऊवाइहाउ। वा ॥(१) औहोतुवाङ्काष्ठा
२ १ २ २र २ १ २
३ए। सुआर्वा१ता२३४ः। हाहोयि। सात्वनश्चि। च

* ज० गा० २२प्र० १ख० १२सा०।

१ २ ३र २ १ २ ३र २
वाज्रा१हा२३४। हाहो। स्तधाष्णू१या२३४। हाहो

१ २ ३र २ ३र १ १
यि। महास्ता१वा२३४। हाहो। नोत्रा२। द्रा२३४

५ ५ ३र र २
यिवाः। उहुवा६हाउ। वा॥(२) औहोमहस्तवा३१।

र १ २ ३र २ १ २ १
नोत्राद्रा१यिवा२३४ः। हाहोयि। गामश्रुवम्। रथा

२ ३र २ १ २ ३र
यिया१मा२३४। हाहोयि। द्रमाङ्का१यिरा२ ३ ४। हा

२ १ २ ३र २ ३ २ १
होयि। सत्रावा१जा२३४म्। हाहो। नजा३यि। ग्यू

५ ५
२३४षायि। उहुवा६हाउ। वा(३)॥ १७ *॥ [२] १२

अथ द्वितीयसूक्ते प्रगाथे—

प्रथमा।

३ १र २र ३ १ १ २ १ २ ३ १ २ ३ २
अभिप्रवःसुराधसमिन्द्रमर्च्चयथाविदे।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
योजरितृभ्योमघवापुरूवसुःसहस्रेणेवशिक्षति॥ १ ‡॥

„पुरूवसुः" पश्वादिबहुधनोपेतः, यद्वा बाहुल्यात् बहूनि वासको वा "मघवा" धनवान् "यः" इन्द्रः "जरितृभ्यः"

* ऊ० गा० २२प्र० १ख० १०सा०।

‡ छ० आ० ३, १, ५, १ (१भा० ४८३ पृ०)=ऋ० वे० ६, ४, १४, १।

स्तोतृभ्यः अस्मभ्यं "सहस्रेणेव" सहस्रसङ्ख्याकेन धनेनेव "शिक्षति" [शिक्षतिर्दानकर्मा (निघ० ३, २०,८)], पश्वादि-बहु धनम् अस्मभ्यं प्रयच्छतीत्यर्थः। स इन्द्रः "यथाविदे" यथा-स्माभिर्विज्ञायते तथा हे ऋत्विजः! "वः" यूयं "सुराधसं" शोभनधनोपेतम् "इन्द्रम्" ऐश्वर्य्ययुक्तं देवम् "अभि" आभि-मुख्येन "प्र अर्च्च" प्रकर्षेणार्च्चत ॥ १ ॥

अथ द्वितीया।

१ १ २ १ १ २ २ १ १२ ३ १ २ ३ १ २
शतानीकेवप्रजिगातिधृष्णुयाहन्तिवृत्राणिदाशुषे।
३ १ २ ३ १२ २२ २ १ २ ३ १ २
गिरेरिवप्ररसाअस्यपिन्विरेदत्राणिपुरुभोजसः ॥ २* ॥१३†

"धृष्णुया" ‡ धृष्णुः धर्षणशीलः पुरुषः "शतानीकेव" यथा शतसङ्ख्याकानि शत्रुसैन्यानि "प्रजिगाति" जयार्थं प्रक-र्षेण गच्छति, तद्वत्; इन्द्रः "दाशुषे" यजमानार्थं "वृत्राणि" यज्ञविघातकान् शत्रून् प्र जिगाति ततस्तान् "हन्ति"। किञ्च "पुरुभोजसः" बहुधनस्य "अस्य" इन्द्रस्य सम्बन्धीनि "दत्राणि" दत्तानि धनानि "प्र पिन्विरे" यजमानार्थं प्रकर्षेण वर्त्तन्ते। तत्र दृष्टान्तः—"गिरेरिव" यथा गिरेः सकाशात् "रसाः" उदकानि पिन्विरे प्रवर्त्तन्ते तद्वत् ॥ २ ॥ १३

---

* ऋ० वे० ६, ४, १४, २।

† 'वामदेव्यं, मैत्रावरुणं साम। शैत्यं, ब्रह्मसाम'—इति वि०।

‡ 'धृष्णुया—धारणस्वभावया'—इति वि०।

Digitized by Google

४ २ ४ ५र २ १ ३र ४र५
॥ श्येतम् ॥ अभिप्रवःसुरा । धसा ३ ४ औहोवा ।

१ २ १ ७ ५ ५ १र २
आयिन्द्रमर्च्च । यथाविदा२३४यि । ओ६हा । योजरि

१ १ १ २ १ ३ ५ २ १ र
तृभ्यः । माघा२३वा । पुरू२ । बा२३४सूः । सहस्रेणा

२ २ १ ३ ५र र
यिवा३शा । ऊम्मायि । चा२ता २ ३ ४ औहोवा ॥(१)

४ २ र ४र५ ३ २ ३र ४र ५ १ ३र र १
सहस्रेणेवशि । क्षता३४औहोवा । सहस्रेणे । वशा

७ ५ ५ २ १र र १र १
यिचता२३४यि । ओ६हा । शतानीकेव । प्राजा २ ३

२ १ ३ ५ १ २ २
यिगा । तिधार२ । ष्णू२ ३ ४ या । हन्तिवृत्राणी३दा ।

१ २ ५र र ३ ४ ३र ४५र
ऊम्मायि । शूर२षा२३४औहोवा ॥(२) हतिवृत्राणिदा ।

२ २ ३र ४र ५ १ २ र १ ७
शुषा३४औहोवा । हान्तिवृत्रा । णिदाशुषा२ ३ ४ यि ।

५ ५ २ १र २ १ २ १
ओ६हा । गिरेरिवप्र । रासा२३आ । स्यपा २ यि ।

२ ५ १र २ २ १
न्वा२३४यिरायि । दत्राणिपूरू३भो । ऊम्मायि । जा२

२ ५र र २ ५
सा२३४औहोवा । वा२३४हू(३) ॥ २* ॥ [१]

* ऊ० गा० २प्र० १अ० १सा० ।

५ ४ २ ४ ५र ४ ५ १
॥ अभीवर्त्तः ॥ अभा३यिप्रा ३ वःसुराधसोवा । आ

२ १ १ १ २
यिन्द्रमर्च्च । यथावा १ यिदा २यि । योजरितृ३१२३४ ।

१र ४ ५र २ १ २ २ १ २
भ्योमघवा । पुरूवा१सू२: । सहास्रे१णा२यि । वशा

१ २ १ १ १ १ ५ ४ २ ४
३यि । चा२३४५ । जा२३४५यि ॥(१) सहा३स्रे३णेऽव

५ ४ ५ १ १र र १ २ १र
शिक्षतोवा । साहस्रेणे । वशायिक्षा१ता२यि । शाता

र २ २ ४ ५र २ १ २ १
नीका३१२३४यि । वप्रजिगा । तिधार्षू१या२ । इन्ता

२ १ २ १ २ १ १ १ १
यिवा१र्त्रा २ । णिदा ३ । शू२३४५ । षा२३४५यि ॥(२)

५ ४ २ ४ ५र ४ ५ १ २र १ २
इन्ता३यिवा३र्त्राणिदा३शुषोवा । हान्तिवृत्रा । णिदाशु

१ र २ २ ४र ५ २ १ २
१षा २यि । गायिरेरिवा३१२३४ । प्ररसाअ । स्यपायिन्वा १

१ २ २ २ १
यिरा २यि । दत्राणा१यिपू २ । रूभो ३ । जा२३४५ ।

२ १ १ १ १
सा२३४५:(३) ॥ ७ * ॥ [२]

४ ३ ४ ५र ३ २ ३र ४र ५
॥ श्यैतनौधसम् ॥ अभिप्रवःसुरा । धसा३४ओहोवा ।

---

* ऊ० गा० ७प्र० १ख० ७सा० ।

१ २ १ ७ ५ ५ ८
आयिन्द्रमर्च। यथाविदा२३४यि। औ६हा। यो२३

२ १ २ १२ १ २ ३ ५ १
जा। रीतृभ्यः। मघ। वा। पूरूषा२३४सूः। सा२३

२ १ ८२ १ ५ ३ ५ ४ ३८ ४८५
ना। स्रेणेवशो२३वा। सा२३४ती॥(१) सत्रस्रेणेवशि।

३ २ ३८ ४८ ५ १ १८ ८ १ ७
क्तना३४औहोवा। सात्रस्रेणे। वशायिक्तना२३४यि।

५ ५ १ २ १८ २ १ २ १
औ६हा। शा२३ता। नौकेव। प्रजि। गा। तायि

२ ३ ५ १ २ १ ८ २ २ ५
धाष्णु२३४या। चा२३न्तायि। वार्त्राणिदो२३४वा।

३ ५ ३ ४ ३८ ४ ५८ ३ २ ३८ ४८ ५
पू२३४षे॥(२) हन्तिवृत्राणिदा। शुषा३४औहोवा।

१ २८ १ ७ ५ ५ १
हान्तिवृत्रा णिदाशुषा२३४यि। औ६हा। गा२३यि

२ १ २ १ २ १ २ २ ५
रेः। आयिव। प्रर। साः। आ। स्रापिन्वा२३४यिरा

१ २ १ २ १ ५ ३
यि। दा२३त्रा। णायिपुरुभो२३४वा। जा२३४

५
साः(३)॥ ११ *॥ [३]

२ १ २ ५८
॥ वाङ्निधनं क्रौञ्चम्॥ अभायिप्रावा३१२३४ः। सुरा।

* ऊ० गा० २२प्र० १अ० ११खा०।

२ २ २ १ २ ५र ३ १ २र १
धसा३म्। इन्द्रमर्चा३१२३४। यथा। विदा३यि। योजा
२ २र ४ ५र र २ २ २ १ २
रितू३१२३४। भ्योमघवापुरू। वसू३ः। सहास्रे णा३
४ २ १ २
१२३यि। वशापुयिच्चताउ॥(१) सहास्रे णा३१२३४यि।
५ ३ १ २ १ २ ५ २ २
वशि। च्चता३यि। सहस्रे णा३१२३४यि। वशि। च्चता
२ १ २ ३ ४ ५र २ २
३यि। शतानीका३१२३४यि। वप्रजिगातिधृ। ष्णु या
२ १ २ ४ २ १
३। हन्तायिवार्त्रा३१२३। णिदा५प्रुषाउ॥(२) हन्ता
१ ५र ३ १ २ १ २
यिवात्रा३१२३४। णि। दा। प्रुषा३यि। हन्तिवृत्रा
५र ३ १ २ १ २
३१२३४। णिदा। प्रुषा३यि। गिरेरायिवा३१२३४।
२ ४र ५ ३ २ २ १ २ ४
प्ररमाग्रस्यपि। न्विरा३यिदत्राणायिपू३१२३। ह्नभोपुज
साउ। वा॥(३) ॥ १५ ॥ [४] १३

* ऊ० गा० ११प्र० १ख० ५सा०।

अथ तृतीयप्रगाथे—

प्रथमा ।

२ ३१२ २२ ३ १ २
त्वामिदाह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
१ २ ३ १ २ ३२ ३२ ३ १ २ ३ १ २
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमागहि ॥ १ * ॥

हे "वज्रिन्" वज्रवन्निन्द्र ! यं "त्वाम्" "भूर्णयः" हविर्भरणशीलाः "नरः" कर्मणां नेतारो यजमानाः "इदा" अद्य "ह्यः" पूर्वद्युश्च "अपीप्यन्" सोममपाययन् । हे इन्द्र ! "सः" त्वं "स्तोमवाहसः" स्तोत्रवाहकस्य मम स्तोत्रम् "इह" यज्ञे "श्रुधि" शृणु "स्वसरं" गृहञ्च ["दुर्याः"(९) "स्वसराणि"(१०)—इति (निघ० ३, ४) गृहनामसु पाठात्] "उपागहि" उपागच्छ ॥

"स्तोमवाहसः"—इति छन्दोगाः, "स्तोमवाहसाम्"†—इति बह्वृचाः ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १ २ ३ १ २
मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः ।
२ ३ १ २ ३ १ २ २ १ २
तव श्रवांस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः ॥ २ ‡ ॥ १४

---

* छ० आ० ४, १, १, १० (१भा० ६१० पृ०) ऋ० वे० ६, ७, ३, १ ।

† अतएव छन्दआर्चिक व्याख्यावसरे 'अस्माकम्'—इति बहुवचनान्त' व्याख्यातम् ।

‡ ऋ० वे० ६, ७, ३, २ ।

Digitized by Google

हे "सुशिप्रिन्" शोभनहनो ! "हरिवः" हरिनामकाश्वोपेत: !" "गिर्वणः" गीर्भिर्वननीयेन्द्र ! "त्वया" त्वयि "वेधसः" परिचारकाः "आ भूषन्ति" * आभवन्ति, "मत्स्व" सोमेन मादय आत्मानम् किञ्च "तम्" त्वा वयम् "ईमहे" याचामहे । किं वाच्यम्? इत्यत्राह—"सुतेषु" सोमेषु अभिषुतेषु सत्सु "तव" "श्रवांसि" अन्नानि † "उपमानि" उपमानभूतानि, हे "उक्थ्य" प्रशस्य ! ‡ तव प्रसादात् सन्त्विति ॥

"सुशिप्रिन्"-"सुशिप्र"—इति पाठौ ॥ २ ॥ १४

३र ४ ५र २ ३ ४र
॥ माधुच्छन्दसम् ¶ ॥ त्वामिद्दा । ह्वोयि । ह्वियोन
५ ५ १ १ १ १ २ ३ ५ १
राइए । अपायिप्यन्वा । ज्ञायिन्भूर्णा२ ३ ४ याः । स
२ १र २र १ १ ३र २ ३र २
इन्द्रस्तोमवाहसः । इहाश्रुधा । औहो ३ ४ वाहायि ।
१ २ ३र २ ३र १ १र २
उपास्वासा । औहो३४वाहा । रमागा२३हा३४३यि ॥(१)
३ ४ ५ र २ ३ ४र ५ ५ १ १ १ १ २
उपस्वसा । हो । रमागहोइए । उपास्वसा । रामा
३ ५ १ र १ १ २
गा २ ३ ४ हो । मस्वासुशिप्रिन्हरिवः । तमायिमाहा ।

* 'स्वाधां कुर्वन्ति'—इति वि० ।

† 'श्रवांसि—अन्नानि पयांसि वा'—इति वि० ।

‡ 'उक्था—उक्थैः सम्भजनीयैः'—इति वि० ।

¶ 'माधुच्छन्दसं मामाच्छावाकस्य'—इति वि० ।

Digitized by Google

२र २ २र २ १ २ २र २ २र २
औहोइ४वाहायि। त्वयाभूषा। औहो३ ४ वाहा। नि

१र २ ३ ४र ५र र २ ३४र ५ ५
वेधा२३सा३४३ः॥(२) त्वयाभूषा। हो। निवेधसा६ए।

२ १ २र १ २ ३ ५ १ २ १ र २ १र २
त्वयाभूषा। निवेधा२३४साः। तवश्रवा्ँस्युपमा। नि

१ २ ३२ २ २र २ १ २ ३र
यूक्थाया। औहो २ ३ ४वाहायि। सुतायिषूवा। औ

२ २र २ १ २ १
होइ४वाहायि। द्रगिर्वा२३णा ३ ४ ३ः। ओ२३ ४ ५ई।

डा (३) ॥ ४ * ॥ [१]

१ र २१र र २ १
॥ मानवोत्तरम्॥ होवायि। त्वामिदाह्योनरः। हो

र र ३ २ र १३ र
वायि। आपीप्यन्वज्रिन्भूर्णयः। साइन्द्रस्तो। मावा

२ ३ २ ५ २ १ २ १
हसा३१ः। इहा२२३४भूधायि। उपास्वा२३सा३। रा२

२ ५र र ३ ५ १ २ १
मा२३४औहोवा। गा२३४ही॥(१) होवायि। उपस्व

१ १र२ १ र र २
सरमागहि। होवायि। ऊपस्वसरमागहि। मात्स्वासु

३ २ ३ २ ५ २ १
शि। प्रायिन्द्रहरिवा३१ः। नमा२यिमा२३४हायि। त्वया

---

* ऊ० गा० २प्र० १ख० ४सा०।

भूर३षा३ । ता२यिवे२३४औहोवा । धा२३४ साः ॥(२)

होवायि । त्वयाभूषन्तिवेधसः । होवायि । त्वायाभूष

न्तिवेधसः । तावश्रवा । साउपमा३१ । नियू२श्या२३४

या । सुतायिषू२३वा३यि । द्रा२गा२३४औहोवा । वा२

३४णाः (३)॥ ८ * ॥ [२] १४

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य तृतीयाध्यायस्य
चतुर्थः खण्डः† ॥ ४ ॥

पञ्चमखण्डे‡—

प्रथमतृचे—प्रथमा ।

यस्तेमदोवरेण्यस्तेनापवस्वान्धसा ।
देवावीरघश᳘ᳪसहा ॥ १¶ ॥

---

* ऊ० गा० १८प्र० २खा० ८सा० ।

† 'उत्त' माध्यन्दिनं सवनम्'—इति वि० ।

‡ 'तृतीयसवनमभिधीयते'—इति वि० ।

¶ छ० आ० ५, २, ४, ४ (२भा० १४ पृ०)=ऋ० वे० ८, १, २१, ४ ।

हे सोम! "ते" तव "देवावीः" देवकामः "अघशंसहा" राक्षसानां हन्ता "वरेण्यः" सर्ववरणीयः "मदः" मदकरः "यः" रसः विद्यते, "तेन" "अन्धसा" अदनीयेन "पवस्व" चर ॥ १ ॥

अथ द्वितीया।

१ २३ १ २ ३ २३ २ ३ १ २ ३ १ २
जघ्निर्वृत्रममित्रियꣳसस्निर्वाजन्दिवेदिवे।
१ २ ३ १ २
गोषातिरश्वसाअसि ॥ २ * ॥

हे सोम! त्वम् "अमित्रियं" अमित्रभवं † "वृत्रं" शत्रुं "जघ्निः असि" हन्ता भवसि। किञ्च "दिवे दिवे" प्रतिदिनं "वाजं" ‡ सङ्ग्रामं "सस्निः" सम्भक्तोऽसि ¶। अपिच "गोषातिः" गवां सातिर्दातासि, "अश्वसाः" अश्वानां दाता चासि।

"गोषातिः"-"गोषाउ"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० ८, १, २१, ५।

† 'अमित्रियम्—अमित्रकर्मकर्त्तारम्'—इति वि०।

‡ 'वाजमिति द्वितीयैकवचनम्, षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम्; वाजस्य अन्नस्य'—इति वि०।

¶ 'सस्निः—साधनस्वभावः'—इति वि०।

Digitized by Google

अथ तृतीया ।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
सम्मिश्लोअरुषोभुवःसूपस्थाभिर्नधेनुभिः ।
१ २ ३ २उ ३ १
सीदञ्छ्येनोनयोनिमा ॥ ३ * ॥ १५ †

हे सोम ! त्वं "सूपस्थाभिः" शोभनोपस्थानाभिः "धेनुभिः" गोभिः [गोविकारैः पयोभिरित्यर्थः] "सम्मिश्लः" सम्मिश्रितः "श्येनः न" यथा श्येनः शीघ्रमागत्य स्थानमासीदति तद्वत् "योनिं" स्वकीयं स्थानम् "आसीदन्", "न" [—इति सम्प्रत्यर्थे] इदानीम् "अरुषः भुवः" आरोचमानो भव ॥

"भुवः"-"भवः"—इति वा पाठौ ॥ ३ ॥ १५

अथ द्वितीयतृचे—प्रथमा ।

३ १ २ ३ २ ३उ ३ १ २ ३ १ २
अयम्पूषारयिर्भगस्सोमःपुनानोअर्षति ।
१ २ ३ १ २ ३ १ २ ३क २र ३ १ २ ३ २
पतिर्विश्वस्यभूमनोव्यख्यद्रोदसीउभे ॥ १ ‡ ॥

"पूषा" पोषकः सर्वेषां "भगः" भजनीयः "रयिः" धनहेतुः "अयं" सोमः "पुनानः" पवित्रे पूयमानः सन् "अर्षति" कलश-

* ऋ० वे० ८, १, २२, १ ।   † 'उष्णा गायत्री'—इति वि० ।

‡ छ० आ० ६, १, १, २ (२भा० १५१७०)=ऋ० वे० ७, ५, २, २ ।

मभिगच्छति। तथा "विश्वस्य" सर्वस्य "भूमनः" भूतजातस्य "पतिः" पालयिता "सोमः" "उभे रोदसी" द्यावापृथिव्यौ "व्यख्यत्" स्वतेजसा प्रकाशयति। अनेन लोकद्वयवर्त्तित्वं सूचितम्॥ १॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
समुप्रियाअनूषतगावोमदायघृष्वयः।

१ २ ३ १र २र ३ १ २
सोमासःकृण्वतेपथःपवमानासइन्दवः॥ २ *॥

"प्रियाः" प्रियतमाः "घृष्वयः" अत्यन्तदीप्ताः, [यद्वा 'अहं प्रथमतः स्तौमि', 'अहं पुरस्तात् स्तौमि'—इति परस्परं संहृ-मानाः] "गावः" स्तुति-लक्षणा वाचः † "मदाय" सोमस्य मदार्थं "समनूषत" संस्तुवन्ति; "उ" प्रसिद्धौ ‡ [यद्वा गावो धेनवः सोमस्य मदाय अब्दायन्ते]। ततः "पवमानासः" पूयमानाः "इन्दवः" दीप्ताः "सोमासः" सोमाः पथः मार्गान् "कृण्वते" चरणार्थं कुर्वन्ति॥ २॥

---

* ऋ० वे० ७, ५, २, ३।

† 'गावः—० ० ०मोसम्भवानि क्षीराणि उदकानि वा'—इति वि०।

‡ 'उ—इति पदपूरणः'—इति वि०।

Digitized by Google

अथ तृतीया।

१ २र ३ १र २र३ १ २ ३ १ २
यओजिष्ठस्तमाभरपवमानश्रवाय्यम्।
१ २र ३ १ ३१२ र७ ३१ २
यःपञ्चचर्षणीरभिरयिंयेनवनामहे॥ ३ *॥ १६ †

"ओजिष्ठः" ओजस्वितमः "यः" तृतीयो रसोऽस्ति तं "श्रवाय्यं" श्रवणीयं रसम् "आभर" अस्मभ्यमाहर। किञ्च "यः" रसः "पञ्च चर्षणीः" ‡ पञ्चजनान् निषादपञ्चमान् चतुरो-वर्णान् "अभि तिष्ठति"। अपिच "येन" रसेन वयं "रयिं" धनं च "वनामहे" सम्भजामहे ¶ [यद्वा येन त्वां रयिं याचा-महे] तमाभर॥ ३ ॥ १६

५ ३र २ ४ ५ १र
॥ गौरीवितम्§॥ अयम्। पूषा ३। रयिर्भगाः। सो
र र १ २ ४
मःपुनानोअर्षता२३यि। पतिर्विश्वा३१ २ ३। स्वभूपम
१ २ ४ ५ ४ ५
नाः। वायस्व्यद्रो३१२३। दसोवा। ऊ५भो६हायि।(३)

॥ ८ ॥ ॥ [१]

* ऋ० वे० ७, ५, २, ४। † "ज्योतिष्टोमौ ककुब्णिहौ"—इति वि०।

‡ 'पञ्चचर्षणीः—चर्षणयो मनुष्याः। चत्वारो महर्त्विजः, पञ्चमो यजमानः।

¶ 'रयिं—धनं। येन वनामहे—येन सोमेन ऊतेन रयिं धनं लभामः। वनति र्यद्यपि स्तुत्यर्थे तथाप्यत्र लाभार्थे द्रष्टव्यः—इति वि०।

§ 'महागौरीवितम्'—इति ख० पु०। ‖ ऊ० गा० १२प्र० १ख० ८सा०।

Digitized by Google

॥ तृतीयंक्रौञ्चम् ॥ अयम्पूषा। हो। रयिर्भगा ६ ए। सोमा२ःपुना२। नओा३४५। षा२३४ती। पतिर्विं श्वस्यभूमना२३४५ः। वियख्या२३द्रो। दसीउ२३भा३४ ३यि ॥(१) समुप्रियाः। हो। अनूषता ६ ए। गावो२ मदा२। यघा३४५। षा२३४याः। सोमासःकृण्वतेप था ऽ१ः। पवमा२३ना। सइन्दा२३वा३४३ः ॥(२) यओ जिष्ठाः। हो। तमाभरा६ए। पावा२माना२। श्रवा ३४५। यो२३४याम्। यःपञ्चचर्षणीरभीऽ१। रयिंया२ ३यिना। वनामा२३हा ३ ४ ३ यि। ओ२३४५ई। डा।(३)

॥ ८ * ॥ [२]

॥ गौरीवितम्† ॥ अयम्। पूषा३। रयिर्भगाः। सो मःपुनानोअर्षता२३यि। पातिर्विश्वा३१२३। स्यभूपूमनाः।

---

* ऊ० गा० २प्र० १ख० ६गा०।   † 'महागौरीवितम्'—इति ख० पु०।

Digitized by Google

१ २ ४ ५ ४ ५
वायख्यद्रो ३ १ २ ३ । दसोवा । ऊ ५ भो ६ हायि ॥(१)
५ ३ १ ५ २ ५ १२ २ २
समु । प्रिया३ः । अनूषता । गावोमदायधृष्वया२३ः ।
२ २ ४ १ २ १
सोमासःका३१२३ । एवता५यिपथाः । पावमाना३१२३ ।
४ ५ ४ ५ ५ २ ३ १ ४ २
सन्नोवा । दा५वो६हायि ॥(२) यभो । जिष्ठा३ः । तमा
५ १ २ २ १ २
भरा । पवमानश्रवायिया२३म् । याःपञ्चचा ३ १ २ ३ ।
४ १ २ १ ४ ५ ५
षणा५यिरभायि । रायिंयेना३१२३ । वनोवा । मा५
५
होऽ६हायि(३) ॥ ८ * ॥ [३]

३ १ २ ४२ ५ २ ४
॥ श्यावाश्वम् ॥ अया३१म् । पू३षा । रयिः । भा३गः ।
१ १ २ २ १ १ २
एहिया । सो । मःपुनानो । अ । षता२रयि । ऐहि
१ २ ४ ५ १२ १
या२ । पतिर्विश्वास्या३भू३ । मा२३४नाः । ऐहा२रयि ।
२ १ २ ४ २ ५
एहिया२ । वियख्यद्रोदा३सी३ । ऊ२४५भो६हायि ॥(१)
२ २ ४२ ५२ २ ४ ५ १
समू३१ । प्रो३याः । धनू । षा३त । एहिया । गा ।

---

* ऊ० गा० ७प्र० १ख० ९सा० ।

र　र　२　१　१र　र र १
वोमदाया । घृ । षया२ः । एह्हिया२ । सोमासःका
२　४　५　१र　१र
एर्वा३ता३यि । पा२३४याः । ऐह्हा२यि । एह्हिया२ ।
१र　२　४　१　५　३ १
पवमानासा३आ३यि । दा३४५वो६हायि ॥(२) यओ३
२　४　५र　२ ४　५　१
१ । जा३यिष्ठः । तमा । भा३र । एह्हिया । पा । व
र　१र　१　१र　१　२
मानआ । वा । यिया२म् । एह्हिया२ । यःपञ्चचार्षा३
४　५　२र　१र
णी३ः । आ२३४भायि । ऐह्हा२यि । एह्हिया२ । रयिं
१र　२　४　२　५
येनावा३ना३ । मा२३४५वो६हायि(३) ॥ १०* ॥ [४]

२ १ १र र　१　र
॥ आसिताद्यम् ॥ अयम्पूषारयायिः । भगाः । सो
र र　२　१　१र
मःपुनानोअर्षा२३तायि । पाता२यिश्वा२ । स्वभूमनाः ।
१　१ २　१　५　४　५
वाया२ख्याद्रो२ । दसोवा३ओ२३४वा । ऊ५भो६हा
१　२ १र २ १　र र　र
यि ॥(१) समुप्रियाअनू । षता । गावोमदायघृष्वा२३
२　१　१र　१
याः । सोमा२साःका२ । एवतेपथाः । पावा२माना

---

* ऊ० गा० ११प्र० १अ० १०सा० ।

२। सखोवा३ओ२३४वा। दा५वो६हायि॥(२) यशो
जिष्ठस्तमा। भरा। पवमानश्रवाय्या२३याम्। याःपा
२ञ्चाचा२। षणोरभायि। रायो२यायिना२। वशो
वा३ओ२३४वा। मा५हो६हायि(३)॥२०*॥[५]

॥निषेधम्†॥ अयम्पूषारा३यिर्भगाः। सोमाःपुना।
नोअर्षता२यि। इहा३। पाता३यिर्वायिश्वा। हाहो
२३४हा। स्यभूमा२३नाः। इहा३। वाया३ख्याद्री।
हाहो२३४हा। दसो३ऊ५भा६५६यि॥(१) समुप्रियाआ
३नूषता। गावोमदा। यघृषया२ः। इहा३। सो
मा३साःका। हाहो२३४हा। एवतेपा२३थाः। इहा३।
पावा३माना। हाहो२३४हा। सम्रा३यिन्दा५वा६
५६ः॥(२) यशोजिष्ठस्ता३माभरा। पवामाना। श्रवा

* ऊ० गा० ११प्र० २ख० २०गा०। † 'निषेधः'—इति ख० पु०।

Digitized by Google

१ १ २ १ २ ४ ५ २ १ ५
यिया२म्। इहा ३। याःपा३स्वाचा। हाहो२३४हा।
२ ८ १ १ १ २ १ २ ४ ५ २ १
षणीरा२३४भायि। इहा३। रायी३यायिना। हाहो२३
५ ३ २ ४ १ १ १
४हा२३ ४ हा। वना ३ मा ५ हा ६ ५ ६ यि। हे २ ३
१ १
४ ५(३)॥ २ *॥ [६]

४ ३ र ४ २ ४ ५
॥ यज्ञायज्ञीयम्॥ अयाऽ५म्पू। षा३रा३यिर्भागाः।
१ २ १ २ २ १ १
सोमःपुना। मो३आर्षा३तायि। पता२यिर्वि। स्वम्या
२ १ २ २ १ र १२
२३भू। ऊम्मायि। मा३नाः। वायख्यद्रोदसी २ उभा
१ २ १ र र र र २
उ॥(१) भायिसाम्। उप्रियाअनूषतगावोमदा। या
१ २ २ १र १ २ १
३घार्ष्वा३याः। सोमा२सः। कण्वा२३ता। ऊम्मायि।
२ २ १ र र ३२ १ २ १र
पा३याः। पावमानासआ२यिन्दवाउ॥(२) वायाः। ओ
र र २ १ र २ १ १
जिष्ठस्तमाभरपवमाना। आ३वाआ३याम्। यःपा२ञ्च।

* ऊ० गा० १२प्र० १ख० २सा०।

२ १ २ २ १ र
चर्षा२३णा । ऊम्मायि । आ३भायि । रायिंयेनवना२
३ २ १ १ १
मद्दाउ । वा३४५(३) ॥ १३ * ॥ [७]

१ १ २र १र २र १ २ र १ २
॥ यद्वाहिष्ठीयम् ॥ अयम्पूषारयिर्भगः । अयम्पूषोवा ।
१ र २ र
रयिर्भगाः । सोमःपू२३ना । नोअर्षतायि । पतिर्वा२३
२ १र २ १र २
यिश्वा । स्यभूमनाः । वियख्या२३द्रो । दसीऊ२३भा२
१ २ १र २र १ २ १र
४३यि ॥(१) समुप्रियाअनूषत । समुप्रियोवा । अनूष
र र २ १ र र २
ता । गावोमा२३दा । यघृष्वयाः । सोमासा२३ःका ।
१र १ १ २ १
ख्वतेपथाः । पवमा२३ना । सइन्दा२३वा३४३ः ॥(२) य
र २ १ र २ र १ २ १र
ओजिष्ठस्तमाभर । यओजिष्ठोवा । तमाभरा । पवमा
२ १र २ १र
२३ना । अवायियाम् । यःपञ्चा२३चा । षणीरभायि ।
२ १र २ १
रयिंया२३यिना । वनामा२३द्दा३४३यि । ओ२३४५ई ।
डा (३)॥ १४ † ॥ [८]

* ऊ० गा० १५प्र० १ अ० १२ सा० । † ऊ० गा० २२प्र० १ अ० १७ सा० ।

१ १र२ •र१ २र
॥ क्रौञ्चाद्यम् ॥ अयम्पूषौहो । रायिर्भगाः । सो

१ २ ४ २ १ र
मःपुना३ । नोआ३र्षा५ता६ ५ ६ यि । पतिर्विश्वौहो ।

२र१र २ १ २ ४
स्याभूमनाः । वियख्यद्रो३ । दासी३ऊ५भा६५६यि ॥(१)

२ १ र २र १र २र र १ २ ४
समुप्रियौहो । आनूषता । गावोमदा३ । याघा३र्षा५

२र र १ र २र १र १ र
या६५६ः । सोमासःकौहो । एवातेपथाः । पवमाना३ ।

१ २ ४ १ र १ र २र १र
साधा३यिन्दा५वा६५६ः ॥(२) यओजिष्ठौहो । तामाभ

२ र १ २ ४ २ १ र
रा । पवमाना३ । आवा३आ५या६५६म् । यःपञ्चचौ

२र १र २ र १ १ ४
हो । चार्षणीरभायि । रयिंयेना३ । वाना३मा५हा६५

६यि (३)॥ १७ * ॥ [९]

२ २र१ ४र ४
॥ ऐडक्रौञ्चम् ॥ अयं९पौपू२३ । षारयिर्भगईया ।

१र २ र १र २ १ २ १र २ १
सोमःपुनानोअर्षति । पातिर्विश्व । स्यभूमा२३नाः । वा

२ २ १ २ २ १र २ २
या३हा । ख्याद्रो३हा । दसीऊ२३भा३४३यि ॥(१) स

* ऊ० गा० १५प्र० १ख० १७गा०

र २१ ४र र ५ १र २र १ २१ २ १
मूर्द्धिप्री२३। याश्वनूषतई्या। गावोमदायघृष्वय:। सो

र २ १र २ १ २ २ १ २ २
मास:क्र। एवुतेपार२३था:। पावा३द्दा। माना३द्दा।

१ २ ३ र २र १ ४ र
सइन्दा२३वा३४३: ॥(२) यश्रोहीजार३यि। छस्तमाभर

५ १ २र १र २ १ २ १र
द्दूया। पवमानश्रवायियम्। या:पञ्चच। षणीरा२३

२ १ २ १ १ २ २ १र
भायि। रायी३२हायि। यायिना३हायि। वनामा२

२ १
३हा३४३यि। औ२३४५ई। डा (३)॥ ५ * ॥ [१०]

२ र र २ र
॥ मधुश्चुन्निधनम् ॥ अयम्पूषारयिर्भगा३ए। सोम:पु

१ १ २ २ ५ २ २ १
ना३नोअर्षता३यि। हा३हा। औ३हो३वा। आयि

१ र २ २ १ ५ २
द्दी२। पतिर्विश्वा३स्याभूमना३:। हा३हा। औ३हो

२ १ १ २ २ २ ५
३वा। आयिद्दी२। वायख्यद्रो३। हा३हायि। औ

२ २ १ १र ३ ५र र
३हो३वा। आयिद्दी२। दसी। ऊ२भा२३४औहो

२ र र र र ५१७ २
वा ॥(१) समुप्रियाअनूषता३। गावोमदा३याघृष्वथा३:।

* ऊ० गा० २०प्र० १ख० ५सा०।

हा३हा। औ३हो३वा। आयिही२। सोमासःकृ३ण्वा
तेपथा३ः। हा३हा। औ३हो३वा। आयिही२। पा
वमाना३। हा३हायि। औ३हो३वा। आयिही२।
सइ। दा२वा२३४औहोवा॥(२) यओजिष्ठस्तमाभरा
३ए। पवमाना३आवायिया३म्। हा३हा। औ३हो३
वा। आयिही२। यःपञ्चचा३र्षणीरभा३यि। हा३
हा। औ३हो३वा। आयिही२। रायियेना३। हा
३हायि। औ३हो३वा। आयिही२। वना। मा२हा
२३४औहोवा। मधुश्चुतता२३४५ः(३)॥ १८*॥ [११]

॥ कण्वबृहत्॥ औहोअयम्पूषा३ए। रयायिर्भा१गा२
३४ः। हाहोयि। सोमःपुनानोअर्षति। पतायिर्वा१यि
श्वा२३४। होहोश्वभूमा१ना२३४ः। हाहोयि। वियाख्या

* ऋ० मा० २०प्र० २ख० १८सा०।

१२ र १ २ ० १ ५
१द्रो२३४। हाहो। दसी३। ऊ२३४भायि। उऊवा
५ १२ २ २ १ २
६हाउ। वा ॥(१) औहोसमुप्रिया३ए। अनूषा१ता२
१२ १ १ २ १ २ १२ २
३४। हाहोयि। गावोमदायघृष्वय:। सोमासा१:का२
१२ १ १ २ १२ १ १
३४। हाहो। एवतायिपा१था२३४:। हाहोयि। पवा
१ १२ १ १ १ १ ५
मा१ना२३४। हाहो। सआ३यि। दा२३४वा:। उ
५ १२ २ २ २ १ १
ऊवा६हाउ। वा ॥(२) औहोयओजिष्ठा३ए। तमाभा
१२ १ १ १२ २ १ १
१रा२३४। हाहोयि। पावमानश्रवायियम्। य:पाञ्चा
१२ १ १ १ १२ १
१चा२३४। हाहो। षणायिरा१भा२३४यि। हाहोयि
१ १ १२ १ १ १ १
रयायिंया१यिना२३४। हाहो। वना३। मा२३४हायि।
५ ५
उऊवा६हाउ। वा(३) ॥ ८ * ॥ [१२] १६

अथ तृतीयतृचे—प्रथमा।

१ १ ३ १ २ ३ २उ
वृषामतीनाम्पवतेविचक्षण:
३ १ २ ३ १ २र ३ २
सोमोअन्हाम्प्रतरीतोषसान्दिव:।

* ऊ० गा० २१प्र० २ख० ९सा०।

३ १र २र ३ १ २ ३
प्राणासिन्धूनाङ्कलशाꣳअचिक्रद
१ २ ३ १ २ ३ १ २ ३ १ २
दिन्द्रस्यहार्द्यांविशन्मनीषिभिः ॥ १ * ॥

अयं "सोमः" "पवते" अभिषूयते। कीदृशः सोमः? "मतीनां" मतयः स्तोतारः तेषां "वृषा" वर्षकः, "कामानां" "विचक्षणः" विद्रष्टा, "अक्नाम्" उषसां "दिवः" द्युलोकस्य आदित्यस्य वा "प्रतरीता" प्रवर्द्धयिता किञ्च "सिन्धूनां" स्यन्दमानानाम् उदकानां "प्राणा' प्राणयिता चेष्टयिता [अनितेः (अदा० प०) शानचि, "बहुलं छन्दसि (२, ४, ७३)"—इति शब्विकरणस्य लुक्, सुपां सुलुगित्याकारः (७, १, ३९)] "कलशान्" "अचिक्रदत्" शब्दं करोति प्रवेष्टुम्। किं कुर्वन्? "इन्द्रस्य" "हार्द्दि" हृदयम् "आविशन्" प्रविशन् "मनीषिभिः" मनसईषितृभिः स्तुतिभिः स्तुत इति शेषः। व्यवहितमपि मनीषिभिरित्येतत् पवतइत्यनेन सम्बध्यते ॥

"अक्नाम्"-"अक्तः"—इति, "उषसाम्"-"उषसः"—इति, "प्राणा"-"क्राणा"—इति, "अचिक्रदत्"-"अवीवशत्"—इति च पाठाः ॥ १ ॥

---

* ऋ० सा०९, १, १, ६ (२भा० १८५ पृ०)=ऋ० वे० ७, १, १४, ४।

अथ द्वितीया ।

२ १ २ ३ २ ३ १
मनीषिभिःपवतेपूर्व्यःकविर्नृ-
१र २ २उ २ १ २
भिर्यतःपरिकोशाᳬअसिष्यदत् ।
३ २ ३ १ २ ३ १ २ २ ३ १ ३
त्रितस्यनामजनयन्मधुक्षर-
१ २ ३ २ ३ १ २ ३ १ २
न्निन्द्रस्यवायुᳬसख्यायवर्द्धयन् ॥ २ † ॥

अयं सोमः "मनीषिभिः" मेधाविभिः अध्वर्य्यादिभिः "पवते" पूयते । यद्वा अयं मनीषिभिर्द्धाराभिः "पवते" चरति । कीदृशोऽयम् ? "पूर्व्यः" पुराणः "कविः" मेधावी "नृभिः" नेतृभिः अध्वर्य्यादिभिः "यतः" सन् "कोशान्" कलशान् प्राप्तुं "परि असिष्यदत्" परितः स्यन्दते स्रवति । "त्रितस्य" त्रिषु स्थानेषु लोकेषु विस्तृतस्य "इन्द्रस्य" यजमानस्य सम्बन्धि "नाम" नामकमुदकं "जनयन्" उत्पादयन् "मधु" मधुरं रसं "क्षरन्" चरति । किं कुर्वन् ? इन्द्रस्य "सख्याय" सखित्वाय "वायुं" "वर्द्धयन्" प्रवृद्धं कुर्वन् ॥

"असिष्यदत्"-"अचिक्रदत्"—इति पाठौ, "युवां"-"वायोः"—इति च, "वर्द्धयन्"--कर्त्तवे"—इति च ॥ २ ॥

* "पूर्व्यः कवि"—इति मु॰ पाठः ।   † ऋ॰ वे॰ ७, ३, १६, १ ।

Digitized by Google

अथ तृतीया।

२१ २ ३ २ ३ १ २
अयम्पुनानउषसोअरोचय

३२ १ ३२ ३ २
दयꣳसिन्धुभ्योअभवदुलोककृत्।

३ २उ ३ १ २ ३ २ ३ ३ २
अयन्त्रिःसप्तदुदुहानआशिरꣳ

१ २ ३ १ २ ३ १ २ ३ २
सोमोहृदेपवतेचारुमत्सरः॥ ३ * ॥ १७ †

"अयं" सोमः "पुनानः" पूयमानः "उषसः" "अरोचयत्" अदीपयत्। अयं "सिन्धुभ्यः" स्यन्दमानेभ्यः वसतीवरीभ्यः ‡ "अभवत्" समुद्भवो भवति। "उ"—इति पूरणः। कीदृशो-ऽयम्? "लोककृत्" लोकानां कर्त्ता [वर्षकृत्त्वाद्वृतोधारकत्वाच्चास्य लोककृत्त्वम्]। "अयं" सोमः "त्रिःसप्त" एकविंशतिं गाः ¶ ऋङ्मुखेन "आशिरं" "दुदुहानः" दुहानः [दोहस्य प्रयोज-कत्वात् कर्त्तोपचारः] "मत्सरः" मदकरः "चारु" रमणीयं "पवते" क्षरति। किमर्थम्? "हृदे" हृदयाय हृदय-गमनाय॥

"अरोचयत्"-"विरोचयत्"—इति पाठौ॥ ३॥ १७

---

* ऋ० वे० ७, २, १६, २। † 'यामं साम'—इति वि०।

‡ 'समुद्रेभ्यो वा'—इत्यधिकं वि०।

¶ 'प्रतिसवनं सप्तसप्त गावः ० ०'—इति वि०।

Digitized by Google

१ र २

॥ यामम् ॥ आ २यि । इया । वृषामतायिना१म्प

४ २ ३ ५ १र र ७ र

वता२३यि । वा३यिचक्षणः । सोमोयज्ञाम्प्रतरीतोर २३ ।

४ २र ३ ४ १र र २ ४ २

षा३सान्दिवः । प्राणासिन्धूना१ङ्कलशा२ं२३ । आ ३ चि

३ ५ १ ७ र २ ४

क्रदत् । इन्द्रस्यहार्दियाविशा२३न् । मना३यिषा५यिभा

१ र ७ र ४ २ ३ ५

६५६यिः ॥(१) मनीषिभायिःपवतेपू२३ । वीं ३ यःकवि ।

१ ७ र ४ २ ३ ५ १

नृभिर्य्यतःपरिकोशा२ं२३ । आ३सिष्यदत् । त्रितस्यना

७ ४ २ ३ ५ १ ७

मजनया२३न् । मा३धुक्षरन् । इन्द्रस्यवायुंसखिया२

२ ४ १ ७

३ । यवा३र्वा५या६५६न् ॥(२) अयम्पुनानउषसो २३ ।

४ २र ३ ५ १ २ ४ २र

आ३रोचयत् । अयंसिन्धूभ्यो१अभवा२३त् । ऊ३लो

३ ५ १ ७ ४ २र ३ ५

कक्रत् । अयन्त्रिस्साप्तदुदुहा२३ । ना३आशिरम् । आ

१ र र ७ र २ ४

२यि । इया । सोमोहृदायिपवतेचा२३ । रुमा३त्सा

५रा६५६ः(३) ॥ १० * ॥ [१]

---

* ऋ० ९म० ९अ० १०४ा० ।

२ र १ १र १
॥ ऐडयामम्॥ वृषामातो२३। नाम्यवातार२३ यि।
१ १ १र र १ १ १
ए३। विचक्षणए३। सोमोप्ताक्षा२३म्। प्रतरायिता२
२ २ र १र र १ १र
३। ए३। उषसान्दिवए३। प्राणासायिन्धू२३। नाह्न
१ १ १ १ १
लाम्राऌ२३। ए३। अचिक्रददे३। इन्द्रस्याहा २ ३।
१ र १ २ २ र १ र
दियावायिम्रा२३न्। ए३। मनीषिभिरे३४३॥(१) मनी
१ १ १ २ २
षायिभा२३यिः। पवतायिपू२३। ए३। विंयःकविरे३।
२ १ २ १ २ २
नृभिर्याता२३ः। परिकोश्राऌ२ ३। ए३। असिष्यददे
२ १ २ १ १ २
३। चितस्याना२३। मजनाया२३न्। ए३। मधुत्त
२ १ २ १ २
रन्ते३। इन्द्रस्यावा२३। युऌसखीया२३। ए३। यव
१ १ २ १ २
र्द्धयन्ने३४३॥(२) अयम्पूना२३। नउषासा२३ः। ए३।
१ र २ १ १र १
अरोचयदे३। अयऌसायिन्धू२३। भ्योअभावा२३ त्।
२ र १ १ २ १
ए३। उलोककृदे३। अयन्त्रायिःसा२३। प्रदुदूहा२३।

Digitized by Google

२ १ २ १२ २ १ २ १
ए३। नम्राग्निरमे३। सोमोदाई२ ३ यि। पवतायि
२ १
षा२३। ए३। हुमत्सुरए३४३। ओ २३४५ई। डा(३)॥

॥ ५ * ॥ [२]

४ २ ४ १ ४ ५
॥ यज्ञायज्ञीयम्। वृषाऽ५म। ता३यिना३पवतायि।
१ २ २ २ २ २ १ २ २
वायिचक्षणः सोमोअन्हाम्प्रतरीतो। षा३सान्दा३यिवाः।
१२ १ २२ २ २ १
प्राणा२सिन्धूनाङ्कलशा२अचिक्र। ददा२३यिन्द्रा। ऊ
२ २ १२ ३२
र्म्मायि। स्या ३ हा। दीयाविशन्मना २ यिषिभाउ॥(१)
१ १ १२ २२ २
भायिर्म्मा। नीषिभिःपवतेपूर्व्यःकविर्नृभिर्यतःपरिकोशा२।
२ १ २ २ १ १ २
षा३सायिष्या३दात्। त्रिता२स्यनामजनयन्मधुक्ष। रन्ना
२ १ २ २ १ २
२३यिन्द्रा। ऊर्म्मायि। स्या३वा। यू२सखियायवा२
३ २ १ २ १ २ २ २
ईयाउ॥(२) याना। यम्पुनानउषसोअरोचयदय२सि
२ २ १ २ १ १
न्धुभ्योअभवात्। ऊ३लोका ३ कृत्। षया२न्तिःसप्तदु

* ऊ० गा० ६प्र० १ख० ५सा०।

२ १ २ १ १ २
हानआम्नि । र॒(ं)सो२३माः । ऊम्माथि । बा३ होयि ।
१ २ २ १ २ १ १ १ १
पावतेचारुमार२त्सराउ । वा२३४५(३) ॥ १७* ॥ [३] १७

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य तृतीयस्याध्यायस्य
पञ्चमः खण्डः ॥ ५ ॥

एवाह्यसीति-षष्ठे खण्डे ‡—

प्रथमतृचे—प्रथमा ।

३ १ २र ३ १२ ३ १ २र३ २ ३ २
एवाह्यसिवीरयुरेवाशूरउतस्थिरः ।
३ १ २ २ ३ १ २
एवातेराध्यम्मनः ॥ १ ¶ ॥

हे इन्द्र ! त्वं "वीरयुः" वीरान् युद्ध-कर्मणि समर्थान् शत्रून् हन्तुं कामयमानः "एव असि" भवसि खलु । "हि" प्रसिद्धो अतएव त्वं "शूरः" सामर्थ्यवान् "एव" भवसि । "उत" अपिच "स्थिरः" सङ्ग्रामे धैर्यवान् भवसि, एकत्र स्थित्वैव शत्रून् सम्प्रहरसीत्यर्थः । एवं सति "ते" तव "मनः" "राध्य"

---

* ऊ० गा० १६प्र० १खं० १७गा० ।

‡ 'यज्ञायज्ञीयमग्निष्टोमसाम । एष्यूषाकमुक्थ्यम् । एवाह्यसि सामद्वीयं द्वितीयमुक्थ्यम्'—इति वि० चर्वति शेषः ।

¶ ऋ० सा० ३, १, ४, १० (१भा० ४७५पृ०) ऋ० मे० ६, ६, २०, १ ।

Digitized by Google

स्तुतिभिः आराधनीयम् "एव"। यतोऽनेन मनसा त्वं शत्रुवधं सङ्ग्रामे धैर्यादिकं करोषीति तव मन एव सर्वैः स्तुत्यमित्यर्थः॥ १॥

अथ द्वितीया।

२ ३ २ ३ १ २　　 ३ १२　　　 ३ १ २
एवारातिस्तुवीमघविश्वेभिर्धायिधातृभिः।
१ २　　　 ३ १ २
अधाचिदिन्द्रनस्सचा॥ २*॥

हे "तुविमघ!" [तुविरिति बहु-नाम (निघ०२,१,१)] बहु-धन इन्द्र! "विश्वेभिः" सर्वैः "धातृभिः" कर्मधारकैः [यद्वा, देवानां हविर्दानेन पोषयितृभिः सर्वैः यजमानैः] तव "रातिः" गवाश्वादि-दानं "धायि" तैर्धार्यत एव [दधातेर्लुङि कर्मणि रूपम्]। "चित्" एवार्थे†। "अध"‡ अनन्तरमेव हे इन्द्र! एवंविधस्त्वं "नः" अस्माकं यष्टॄणामपि "सचा"¶ धनादि-दानेन कर्म-सहायो भव॥

"इन्द्रनस्सचा"--"इन्द्रमेसचा"—इति पाठौ॥ २॥

---

* ऋ० वे० ६, ६, २०, २।

†, ‡ 'सचा चित्—इति पद पूरणः'—इति वि०। सायणमते तु अधेत्यस्य अथेत्यर्थे, "निपातस्य च (६,३,१३६)"—इति दीर्घे भवति "अधा"—इति।

¶ 'अथवा सचा सहा'—इत्यधिकं वि०।

अथ तृतीया।

२उ ३ १ २ ३१र २र
मोषुब्रह्मेवतन्द्रयुर्भुवोवाजानाम्पते।
१ २ ३१ २ ३ १ २
मत्स्वासुतस्यगोमतः॥ ३ *॥१८

हे "वाजानाम्पते" अन्नानाम्पते! बलानां वा, हे इन्द्र! "तन्द्रयुः" † निष्कारणं निवृत्तकर्मत्वादालस्ययुक्तः "ब्रह्मेव" ब्राह्मण इव त्वं "मा उ षु भुवः" ‡ सुष्ठु मा भव, सर्वदास्मत्-कर्मरतो भवेत्याशासनम् ¶। तदेवाह—"सुतस्य" अभिषुतस्य, ततः "गोमतः" गव्येन क्षीरेण दध्ना वा मिश्रणवतः सोमस्य पानेन "मत्स्व" माद्य हृष्टो भव॥ ३॥१८

१र२ र ३ ४ ५र २र १
॥ उक्थामदीयवम्॥ एवाह्नो३ असिवीरयूः। एवा
२ १ २ १ २र२ १
प्रभू१रा२ः। उता२३स्थिरा। अयिवातेरा। धिया
२ ५र२ १ ४ ५र २ १
२३मनाउ। वा३॥(१) एवारा३तिस्तुवीमघा। विश्वा

* ऋ० वे० ६, ६, २०, ४।

† "उ षु"—इति पदपूरणौ। मा इति प्रतिषेधः, तन्द्रयुरित्याख्यातेन सम्बन्धयितव्यः; मा तन्द्रयुः आलस्यं कुरु—इति वि०।

‡ "भुवः वाजानां पते"—भुवर्लोकस्य अन्नानां धनानां वाधिपते भुवर्ग्रहणञ्च प्रदर्शनार्थं सर्वेषां लोकानां पते—इति वि०।

¶ अथच! अस्मास्वपि ब्राह्मणानामालस्य-स्वभावो वर्णितः।

Digitized by Google

२ १ २ १ २र १
यिभा१यिद्वा२। यिधा२३ तृभायिः। आधाचिद्वायि।
२ ५र २ ४र ५
द्रना२३:सचाउ। वा३ ॥(२) मोषुब्रा३ह्म वतन्द्रयुः।
२ १ २ १ २ १ २र १
भुवोवा१जा२। ना२३मताथि। मात्स्वासुता। स्वगो
२ २ र १।१ १ १
२३मताउ। वा३। स्तौषे२३४५(३)॥ ११ * ॥ [१]

५र र २ ४ ५र ४ ५ २र १र
॥ सौभरम् ॥ एवा३द्धो३असिवीरयोवा। एवाभू२
१ ० १ २ ५ १रर र र
राउता२३। द्धो। स्था२३४यिराः। एवातेरा। धिया
ऽ २ १ २ ५र र ५र ४ २ ४
३९च्चा३यि। मा२ना२३४औह्नोवा ॥(१) एवा३रा ३ ति
५र ४ ५ २ १र १ ० १ २
स्तुवीमघोवा। विश्वेभा२यिद्वायिधा२३। द्धो। तू२
५ १ र ऽ २ १ २
३४भायिः। अधाचिदि। द्रना३ह्ना३यि। सा२चा२३४
५र र ५र ४ २ ४र ५ ४ ५ २ १र
औह्नोवा ॥(२) मोषूब्रा३ह्म वतन्द्रयोवा। भुवोवा२
१ १ २ ५ १ र
जाना२३म्। ह्नो। पा२३४ताथि। मत्स्वासुत। स्व

* ऋ० मा० २अ० १ख० ११सा० ।

५ २ १ ३ ४र र ३ ११ १ १
गो३वा३यि। मा२ता२३४ औहोवा। ऊ२३४५

(३)॥ २ *॥ [२] १८

द्वितीयतृचे—प्रथमा।

२ ३ १ २ ३ १ २ ३ १ २
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः।

३ १ २ ३ २ ३ १ २ ३ १२ ३ १ २
रथीतमꣳरथीनांवाजानाꣳसत्पतिम्पतिम्॥ १†॥

"विश्वाः" सर्वाः "गिरः" अस्मदीयाः स्तुतयः "इन्द्रम्" "अवीवृधन्" वर्द्धितवत्यः [वृधेर्णिचि चङि "उर्ऋत् (७, ४, ७)"—इत्यनुवृत्तौ "नित्यं छन्दसि (७, ४, ८)"—इति ऋकारस्य ऋकार-विधानात् लघूपधगुणाभावः, निपातस्वरः (८, १ २८)] कीदृशमिन्द्रम्? "समुद्रव्यचसं" समुद्रवद् व्याप्तवन्तं, "रथीनां" रथ-युक्तानां योद्धृणां मध्ये "रथीतमम्" अतिशयेन रथ-युक्तं, "वाजानाम्" अन्नानां "पतिं" स्वामिनं, "सत्पतिं" सतां सन्मार्ग-वर्त्तिनां पालकं ["पत्यावैश्वर्य्ये (६,२, १८)"—इति पूर्वपदप्रकृतिस्वरत्वम्]॥ १॥

* ऊ० गा० २१प्र० १अ० २खा०।

† ऋ० आ० ४, २, १, २ (१भा० ६९७ पृ०)=ऋ० वे० १, १, २१, १।

अथ द्वितीया ।

२ १ २ ३ १ ३ १ २
सख्येतइन्द्रवाजिनोमाभेमशवसस्पते ।

२ ३ १ २र १ १ २ १ १ २
त्वामभिप्रनोनुमोजेतारमपराजितम् ॥ २ * ॥

हे "शवसस्पते" † बलस्य पालकेन्द्र ! "ते" तव "सख्ये" अनुग्रहप्रयुक्ते सखित्वे वर्त्तमाना वयं "वाजिनः" अन्नवन्तः भूत्वा "मा भेम" शत्रुभ्यो भीतिं प्राप्ता मा भूम । अतः "त्वाम्" अभयहेतुम् "अभि प्र नोनुमः" सर्वतः प्रकर्षेण स्तुमः [णु स्तुतौ (अदा०, प०), "णोनः (६, १, ६५)"—इति नत्वम्, यङोलुक् (२, ४, ७४), प्रत्ययलक्षणेन (१, १, ६२), "सन्यङोः (६, १, ९)"—इति द्विर्भावः, "गुणो यङ्लुकोः (७, ४, ८२)"—इत्यभ्यासस्य गुणः, प्रत्ययलक्षणेन धातुसञ्ज्ञायां (३, १, ३२) लटोमस् (३, ४, ७८), अदादिवद्भावात् शपोलुक् (२, ४, ७२)]। कीदृशं त्वाम् ? "जेतारं" युद्धेषु जयशीलं अपराजितं क्वापि पराजय-रहितम् ॥

"प्रनोनुमः"-"प्रणोनुमः"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० १, १, २१, २ ।

† 'अन्नस्य यशसोवाधिपते' - इति वि० ।

Digitized by Google

अथ तृतीया।

३ १२ २र ३ २ ३ १ २र ३ १ २
पूर्वीरिन्द्रस्यरातयोनविदस्यन्त्यूतयः।

३ १र २र३ १ २ ३ २ ३ १ २ ३ २
यदावाजस्यगोमतस्तोतृभ्योमंहतेमघम्॥ ३ * ॥ १९†

॥ इति द्वितीयस्यार्द्धः प्रपाठकः॥

"इन्द्रस्य" सम्बन्धिन्यः "रातयः" धन-दानानि "पूर्वीः" अनादि-काल-सिद्धाः, अस्येन्द्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः; एवं सति इदानीन्तनोऽपि यजमानः "स्तोतृभ्यः" ऋत्विग्भ्यः "गोमतः" गो-सहितस्य "वाजस्य" अन्नस्य पर्याप्तं "मघं" धनं "यदा" "मंहते" दक्षिणारूपेण ददाति, तदानीं "रातयः" बहु-धन-दान-पूर्वकाणीन्द्रस्यान्न-विषयाणि रक्षणानि "न वि दस्यन्ति" विशेषेण नोपक्षीयन्ते। ["यदा"-"यदि"—इति पाठौ। "मघं", "रेक्णः", "रिक्थं" —इत्यादिष्वष्टाविंशति-सङ्ख्याकेषु धननामसु (निघ० २, १०) मघशब्दः पठितः। "दाति"-"दाशति"—इत्यादिषु दशसु दानकर्मसु "मंहते"—इति पठितम् (निघ० ३, २०, १०)। पूर्वीः—पुरु-शब्दस्य "वोतोगुणवचनात् (४, १, ४४)"—इति ङीष्, आद्यस्योकारस्य दीर्घश्छान्दसः, जसि "दीर्घाज्जसिच (६, १, १०५)"—इति निषेधं बाधित्वा "वा छन्दसि (६, १, १०६)"—इति पूर्वसवर्णदीर्घत्वम्, ङीषः प्रत्ययस्वरेणोदात्त-

* ऋ० वे० १, १, ११, ३। † 'आद्यादंहूक्मुषम्'—इति वि०।

Digitized by Google

त्वम्। मंहते—अपः पित्वादनुदात्तत्वम्, तिङश्च ल-सार्वधातुक-स्वरेण, 'तिङतिङः (८, १, २८)"—इति निघातो न भवति "निपातैर्यद्यदिहन्त (८,१,३०)"—इति निषेधात् ॥३॥१९

॥ षाष्टादंष्ट्रायम् ॥ इन्द्रं विश्वा अवीवृधन्। ऐया
हायि। समुद्रा ऽ१व्या २। चसाङ्गा१यिरा२३ः। ऐया
२३हायि। रथायिता१मा २म्। रथायिना२३म्। ऐया
२३हायि। वाजाना१ᳲसा २त्। पतायिम्या१ती२३म्।
ऐया२३हा३४३यि ॥(१) सख्ये त इन्द्र वाजिनः। ऐयाहा
यि। माभायिमा१श्मा २। वसास्या१ता२३यि। ऐया२
३हायि। तुवामा१भी २। प्रनोनू१मा२३ः। ऐया २ ३
हायि। जेतारा१मा २। पराजा१यिता२३म्। ऐया२
३हा३४३यि ॥(२) पूर्वीरिन्द्रस्य रातयः। ऐयाहायि। न
वायिदा१स्या २। तियूता१या२३ः। ऐया २ ३ हायि।
यदावा१जा २। स्यगोमा१ता २ ३ः। ऐया २ ३ हायि।

Digitized by Google

र १ २ १ २ १र २
स्तोतृभ्यो१मा २। इतायिमा१घा२३म्। ऐया२३हा३४
१
३यि। ओ२३४५ई। डा(३) ॥ १२ * ॥ [१]

१ २ १ २र र १र २र १र
॥ आष्ट्रादंष्ट्रोत्तरम् ॥ इन्द्रं विश्वा अवीवृधन्नैयादौ।
२ २ १ २ १ १र
हो३वा। समुद्रव्यचसम्। गायिरा२३। ऐया २३त्।
१ र २ १ २ १ १र
औ२३होवा। रथायितमंर। थायिना२३म्। ऐया
१ र २ १र र २र १ २ १
२३त्। औ२३होवा। वाजानांसत्पतिम्। पातौ २
१र १ र २ २ १र२
३म। ऐया२३त्। औ२३होवा३४३ ॥(१) सख्ये तइन्द्र
र १ २ १र२र१र २ २ १र र २ १
वाजिनऐयादौ। हो३वा। माभेमशवसः। पाता२ ३
१र १ र २ १र२ १ २ र १
यि। ऐया२३त्। औ२३होवा। त्वामभिप्रनो। नूमा
१र १ र २ १र र २ १ २र १
२३ः। ऐया२३त्। औ२३होवा। जेतारमपरा। जा
१र १ र २ २र१र
यिता२३त्। ऐया२३। औ२३होवा३४३ ॥(२) पूर्वीरि
२ र १ १ १र २र१र २ २ १ २ र १
न्द्रस्यरातयऐयादौ। हो३वा। नविदस्यन्तियू। ता

* ऊ० गा० १प्र० १ ख० १२गा० ।

१र १ र २ १र र २ र
यार३ः। ऐया२३त्। औ२३होवा। यदावाजस्यगो।
१ १र १ र २ र १ २र १
मता२३ः। ऐया२३त्। औ२३होवा। स्तोतृभ्योमᳫं
२ र १ १र १ र २
हते। माघार३म्। ऐया२३त्। औ२३होवा३ ४ ३।
१
ओ२३४५ई। डा(३)॥ ११ *॥ [२]

५ २ ४र ५ ४र ५ २ १ २
॥ कालेयम्† ॥ इन्द्र बा३यिश्वाश्ववीवृधान्। समूद्र
१ २ २ २ १ २ १ ५
व्या। चसङ्गिरा२३ः। रथा३यि। मार३४। मᳫंर।
२ २ १र २र २ २ ५ ४
था३यिनाम्। वाजानाᳫंसौ। वा३४३ओ३४वा। पता
५ २ र २ ४ ५ ४र ५ २र १
५ यिम्पतायिम्॥(१) सख्येता३इन्द्रवाजिनाः। माभा
२ १ २ २ २ १ २ १
यिमश्वा। वसस्पता२३यि। तुवा३म्। षा२३४। भि
५र २ २ १र २ १ २ ५ ४
प्रणो। नू३माः। जेतारमौ। वा३४३ओ३४वा। परा
५ र २ ४ ५ ४र ५ २ १ २
५ जिताम्॥(२) पूर्वीरा३यिन्द्रस्यरातयाः। नवायिद
१ २ २र २ १ २ १ ५र
स्या। त्यूतया२३ः। यदा३। वा२३४। जस्यगो।

---

* ऊ० गा० ७प्र० १ख० ११गा०।   † 'महाकालेयम्'—इति ख० पु०।

Digitized by Google

१ २ १र २र २ ५र ५ ४
मा३ताः। स्तोतभ्योमौ। वा३४३ओ३४वा। चता३यि

४
मघाम्। ह्वोपुई। डा(३)॥३*॥[३]

२ र र २ १ २
॥ नार्मेधम्॥ इन्द्र विश्वा अवीवृधा३ने। स। मू। द्र

१ २ १ २ २ १ २ ५ २१
व्या। चसा३ङ्गा३यिराः। रथा३यिना२३४माम्। रथा

२ १र र ५ १ र ५ २र
यिनाम्। औहोहो२३४वा। वा२३४जाहायि। ना८

१ २ २र र ५ १ ५र
सा८पाता। औहोहो२३४वा। पा२३४तीम्। एहिया

५ २ र र २ र १ २
६हा॥(१) सख्ये तइन्द्रवाजिना३ए। मा। भायि। म।

१ २१२ २ १ २ ५ २१ २
शा। वसास्वा३तायि। तुवा३मा२३४भौ। प्रनोनूमा।

२र र ५ १ ५ २१ २ २र
औहोहो२३४वा। जा२३४यितहायि। रमापारां। औ

र ५ १ ५र ५
होहो२३४वा। जा२३४यिताम्। एहिया६हा॥(२)

२र र र २ १ २ २ २
पूर्वीरिन्द्रस्यरातया३ए। न। वायि। द। स्या। ति

१२ २ १ २ ५ २१ २ २र र
यूता३याः। यदा२वा२३४जा। स्यगोमाता। औहो

० ऋ० ग्रा० ११प्र० १ख० ३गा०।

५ १ ५ ११ १ २ १र
होर२३४वा । स्तो२३४तृहायि । ध्योमा१हाता । औ

र ५ १ ५र ५ ४
होहो२३४वा । मा२३४घाम । एहियाईहा । हो५ई ।

डा(३) ॥ १ * ॥ [४] १९

इति सामवेदार्थप्रकाशे उत्तरारण्यस्य तृतीयस्याध्यायस्य

षष्ठः खण्डः † ॥ ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्द्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ३ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-

श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-

चार्य्येण विरचिते माधवीये सामवेदार्थ-

प्रकाशे उत्तरारण्ये तृतीयोऽध्यायः ‡ ॥

---

* ऊ० गा० ११प्र० २ख० २सा० ।   † 'इति द्वितीयमर्द्धः'—इति वि० ।

‡ "अथ द्वितीयप्रपाठकस्यार्द्धः समाप्तः"—इत्येव मूल-पद-विवरणादि-सम्मतः; न तु "तृतीयो" नापि "अध्यायः"—इति ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्म्ममे, तमहं वन्दे विद्यातीर्थ-महेश्वरम्॥ १॥

॥ अथ चतुर्थोऽध्याय आरभ्यते* ॥

तत्र,

प्रथम-खण्डे—

एते असृग्रमिति प्रथमतृचे—प्रथमा।

२ १ २ १ १ २ १ २ ३ १ २ ३ १ २
एते असृग्रमिन्दवस्तिरःपवित्रमाशवः।
१ २ ३ १ ३२
विश्वान्यभिसौभगा॥ १† ॥

"तिरः पवित्रं"‡ तिर्यग् गच्छन्तं दशापवित्रं प्रति "आशवः" शीघ्रगामिनः "एते" पवमाना "इन्दवः" सोमाः "विश्वानि" सर्व्वाणि "सौभगा" सौभगानि धनानि ¶ "अभि" लक्ष्य "असृग्रम्" ऋत्विग्भिः सृज्यन्ते॥ १॥

---

* 'इदानीं तृतीयमध्यायारभ्यते'—इति वि०।

† ऋ० वे० ७, १, १४, १। ‡ 'तिरः=अधः'—इति वि०।

¶ 'विश्वानि अभिसौभगा—विश्वानि सर्वाण्यभिसौभाग्यानि'—इति वि०।

Digitized by Google

अथ द्वितीया।

१ १ २ ३ १ २ ३ २ ३ १ २ १ २ ३ १ २
विघ्नन्तोदुरितापुरुसुगातोकायवाजिनः।

१ २ ३ २ ३ १ २
त्मनाकृण्वन्तोअर्वतः॥ २* ॥

"वाजिनः" बलवन्तः† सोमाः "पुरु" बहूनि "दुरिता" दुरितानि "वि घ्नन्तः" विशेषेण नाशयन्तः "तोकाय" अस्माकं पुत्राय‡ "सुगा" अतिसुखरूपाणि धनानि¶ "अर्वतः" अश्वांश्च "त्मना" आत्मना स्वयमेव "कृण्वन्तः" ददत इत्यर्थः। ऋत्विग्भिः सृज्यन्त इति पूर्वेण सम्बन्धः॥

"त्मना"-"तना"इति—इति पाठौ, "अर्वतः"-"अर्वते"—इति च॥ २॥

अथ तृतीया।

३ २ ३ १ २ ३ २ ३क २र ३ २
कृण्वन्तोवरिवोगवेभ्यर्षन्तिसुष्टुतिम्।

१ २ ३ १ २ ३ १ २
इडामस्मभ्यꣳसंयतम्॥ ३ §॥ १

---

* ऋ० वे० ७, १, २४, २।

† 'वाजिनः—अन्नवन्तः'—इति वि०।

‡, ¶ 'सुगातोकाय—सुष्ठाय पुत्रपौत्राय'—इति वि०।

§ ऋ० वे० ७, १, २४, ३।

सोमाः अस्माकं "गवे" "अस्मभ्यं" च "संयन्त" यदस्मात् संयच्छति। तद् "वरिवः" धनम् "इडाम्" अन्नञ्च "कृण्वन्तः" कुर्वन्तः "सुष्टुतिम्" अस्मदीयां शोभनां स्तुतिम् * "अभ्यर्षन्ति" आभिमुख्येन गच्छन्ति॥ ३॥ १

अथ द्वितीयतृचे—प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १र २र
राजामेधाभिरीयतेपवमानोमनावधि।
३ १ २ ३ १ २
अन्तरिक्षेणयातवे॥ १ †॥

"मनो अधि" मनुष्ये यागं कुर्वाणे सति‡। यद्वा मनावधि मनुर्मन्तव्यो यज्ञस्तस्मिन् "पवमानः" पूयमानः पुनानो वा "राजा" [राज-शब्देन सोमोऽभिधीयते "सोमं राजानमकृण्वन् (य० मा० २८, ७२)"—इत्यादिषु दृष्टत्वात्, स राजा] सोमः "मेधाभिः" स्तुतिभिः¶ सह "ईयते" गच्छति। कुत्र? "अन्तरिक्षेण" आकाशमार्गेण द्रोणकलशं प्रति "यातवे" यातुम्। द्रोणाभिगमन-काले हि स्तोतृभिः स्तूयते खलु॥ १॥

---

* 'सुष्टुतिं—सुखेन स्तुतिम्'—इति वि०।

† ऋ० वे० ७, १,४, १।

‡ 'मनौ अधि—मनुष्ये यजमाने निमित्तभूते'—इति वि०।

¶ 'मेधाभिः ईयते—ऋत्विग्यजमानानां प्रज्ञाभिः'—इति वि०।

अथ द्वितीया ।

१ २ २ १ २ १ २ ३ १ २र
आ नस्सोम सहो जुवो रूपं न वर्चसे भर ।
३ २ ३ १ २
सुष्वाणो देववीतये ॥ २ * ॥

हे "सोम !" "देववीतये" देवानां पानाय देवानां कामाय वा † "सुष्वाणः" अभिषुतो वा त्वं "सहः" शत्रुभिभवनसमर्थं बलं "जुवः" [जु—इति गत्यर्थः ‡] शत्रून् प्रति शीघ्रगमनं ¶ यद्वा सर्वतो गमनशीलं बलं । किञ्च ["न"—इति चार्थे §] "वर्चसे" [वर्च दीप्तौ (भ्वा०, आ०) दीप्त्यै सर्वत्र प्रकाशनाय रूपञ्च "नः" अस्मभ्यम् "आ भर" आहर प्रयच्छ ॥ २ ॥

अथ तृतीया ।

१ २ ३ २ ३ १ ३ २ ३ १ २
आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम ।
२ ३ १ २ ३ १ २
वहा भगत्तिमूतये ॥ ३ ‖ ॥ २

* ऋ० वे० ७, १, ४, २ ।
† 'देववीतये० ०—देवानां दानाय भक्षणाय वा'—इति वि० ।
‡ निघण्टौ गतिकर्मसु पञ्चोत्तरशततमत्वेन पठितम् (२, १४) ।
¶, § 'जुवः—रूपम् । न—न शब्द उपमार्थीयः रूपमिव'—इति वि० ।
‖ ऋ० वे० ७, १, ४, १ ।

Digitized by Google

हे "इन्दो" पात्रेषु क्षरणशील ! दीपनशील ! वा हे सोम ! "शतग्विनं"* शतसहस्रसङ्ख्याकाभिः गोभिः युक्तं "गवां पोषं" गवादीनां पुष्टिवर्द्धनं "स्वश्व्यं" शोभनाश्व-सङ्घ-सहितं "भगत्तिं" भगदत्तिं भजनीय-धन-दानञ्च † "ऊतये" रक्षणाय "नः" अस्माकम् "आवह" प्रापय। गवादींश्च तेषां वृद्धिं प्रयच्छेत्यर्थः ‖ ३ ‖ २

तन्त्वानृम्णानीति पञ्चर्चं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २

तन्त्वानृम्णानिबिभ्रतꣳसधस्थेषुमहोदिवः।

१ २ ३ १ २

चारुꣳसुकृत्ययेमहे ‖ १ ‡ ‖

"महोदिवः" महतोद्युलोकस्य¶ "सधस्थेषु" सहस्थानेषु स्थितं, "नृम्णानि" धनानि § "बिभ्रतं" अस्मदर्थं धारयन्तं "चारुं" कल्याणं ‖ हे सोम ! "तं" तादृशं पवमान-लक्षणं "त्वा" त्वां "सुकृत्यया" शोभन-क्रियया "ईमहे" धनानि याचामहे** ‖ १ ‖

---

* 'शतग्विनं—शतसङ्ख्याकम्'—इति वि०।

† 'भगत्तिं—शोभमानप्रतिपत्तिम्'—इति वि०।

‡ ऋ० वे० ७, १, ५, १।

¶ 'महोदिवः—महाकाशात्'—इति वि०।

§ 'नृम्णानि—धनानि बलानि वा'—इति वि०।

‖ 'चारुं—शोभनम्'—इति वि०।

** "ईमहे"—इति याच्ञाकर्मसु निघण्टौ प्रथमं पदम् (३, १९)।

Digitized by Google

अथ द्वितीया।

१ २   ३क   १र २ १ २   ३ १ २
संवृक्तधृष्णुमुक्थ्यम्महामहिव्रतम्मदम्।
३ १   २र ३ १ २
शतम्पुरोरुरुक्षणिम् ॥ २* ॥

हे सोम! "संवृक्तधृष्णुं" संवृक्ताः सञ्छिन्नाः धृष्णवो धर्षणशीलाः शत्रवो येनासौ संवृक्तधृष्णुः, तम् †, "उक्थ्यं" उक्थार्हं प्रशस्यम्, ‡ "महामहिव्रतं" महीय-बहु-कर्माणं, ¶ "मदं" मदकरं "शतं" बहूनि "पुरः" शत्रूणां पुराणि "रुरुक्षणिं" विनाशयन्तम्; त्वां धनानाम् ईमहे इति § सम्बन्धः ॥ २ ॥

अथ तृतीया।

१ २   ३ १ २क२र ३ १ २   ३ २
अतस्त्वारयिरभ्ययद्राजानꣳसुक्रतोदिवः।
३ १ २ ३ १ २
सुपर्णोअव्यथीभरत् ॥ ३ ‖ ॥

---

* ऋ० वे० ७, १, ५, २।

† 'संवृक्तधृष्णुम्—अतिशयेन संवर्त्तकं, धृष्णुं धारणात्मकम्'—इति वि०।

‡ 'उक्थ्यम्—उक्थ्यानि स्तोत्राणि यत्र विद्यन्ते स उक्थ्यः, तम् उक्थ्यं सोमम्'—इति वि०।

¶ 'महामहिव्रतं—महेति महान्तं व्रतमग्रं कर्म वा यत्र, स महिव्रतः, तं महिव्रतम्'—इति वि०। महदर्थमव्ययद्वयमुभयोरतिमहत्त्वं गम्यत इति भावः।

§ पूर्वार्चिके गतम्।

‖ ऋ० वे० ७, १, ५, ३। "रयिमभिराजः"—इति च तत्र पाठः।

Digitized by Google

हे "सुक्रतो" शोभनकर्म्मन् * पवमान सोम ! "रयिः" रयिम् धनम्प्रति "अभि अयत्" † अभिगमयति "राजानं" ‡ "त्वा" त्वाम् "अतः दिवः" अमुष्मात् द्युलोकात् "अव्यथी" व्यथा-रहितः "सुपर्णः" श्येनवत् ¶ "भरत्" आहरत् । तथाच श्रूयते—'आदाय श्येनोऽभरत् सोमम् (ता० ब्रा०)'—इति ॥

"अव्यथी"-"अव्यथिः"—इति पाठौ ॥ ३ ॥

अथ चतुर्थी ।

१ २ ३ १२ ३ १ २र ३१ २

अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।

३ १ २र

अभिष्टिकृद्विचर्षणिः ॥ ४ § ॥

"अधा" अथ "विचर्षणिः" कर्मणां विद्रष्टा ‖ "अभिष्टि-कृत्" यजमानानाम् अभीष्ट-फलस्य कर्त्ता सोमः** "इन्द्रियं" स्वकीयं फलं †† "हिन्वानः" प्रेरयन् "ज्यायः" प्रशस्यतरं "महित्वं" महत्वम् "आनशे" प्राप्नोति‡‡ ॥ ४ ॥

---

* 'सुक्रतो—सुक्रतु' शोभनकर्म'—इति वि० ।

† 'अयत्—आनयत'—इति वि० ।

‡ 'राजानं—सोमम्'—इति वि० ।

¶ 'सुपर्णः—पक्षीभूत्वा'—इति वि० ।

§ ऋ० वे० ७, १, ५, ४ ।

‖ 'विचर्षणिः—विविधानां पुरुषाणां स्वामी'—इति वि० ।

** 'अभिष्टिकृत्—अभिष्टिः यजमानः तं यः करोति स अभिष्टिकृत्'—इति वि० ।

†† 'इन्द्रियम्—इन्द्रस्य रूपं सोमम्'—इति वि० ।

‡‡ 'आनशे—व्याप्नोति'—इति वि० ।

Digitized by Google

अथ पञ्चमी ।

१२ २ ३ १ २ १ ३२ ३ १ २
विश्वस्मा इत्स्वर्दृशे साधारणꣳ रजस्तुरम् ।

३ २ ३ २ ३ १ २
गोपामृतस्य विर्भरत् ॥ ५ * ॥ ३

"रजस्तुरम्" † उदकस्य प्रेरकम् "ऋतस्य" यज्ञस्य "गोपां" गोपयितारं‡ "विश्वस्मै" सर्वस्मै "स्वर्दृशे" देवाय ¶ "साधारणम् इत्" समानम् § आवसन्तं सोमं "विः" पक्षी ‖ श्येनो "भरत्" स्वर्गादाहरत् ॥ ५ ॥ ३

अथ तृचात्मके चतुर्थसूक्ते—

प्रथमा ।

२ ३ २ ३ १ २ ३ १ २ ३ १ २
इषे पवस्व धारया मृज्यमानो मनीषिभिः ।

१ २ ३ १ ३२
इन्दो रुचाभि गा इहि ॥ १ ** ॥

---

* ऋ० वे० ७, १, ५, ५ । "विश्वस्मा इत्स्व०"—इति ख० पु० पाठः । "विश्वस्मा इत्स्व०"—इति मु० पाठः ।

† 'रजस्तुरं—रजः-संयुक्तम्'—इति वि० ।

‡ 'गोपां—अतथाध्यानसंयुतम्'—इति वि० ।

¶ 'स्वर्दृशे—स्वः सर्वलोकस्य, दृशे दर्शनाय'—इति वि० ।

§ 'इत्—इति पदपूरणः'—इति वि० ।

‖ 'विः—मध्यलोकम्'—इति वि० ।

** छ० आ० ६, १, २, ८ (२ भा० ६४ पृ०) = ऋ० वे० ७, १, ३८, २ ।

Digitized by Google

हे "इन्दो" सोम ! "मनीषिभिः" ऋत्विग्भिः "मृज्यमानः" शोध्यमानः त्वम् "इषे" अस्माकमन्नाय "धारया" "पवस्व" क्षर। "रुचा" रोचमानेनान्धसा "गाः" पशून् "अभीहि" अभिगच्छ॥ १॥

अथ द्वितीया।

२ १ १र २ ३ २ १ २
पुनानोवरिवस्कृध्यूर्ज्जञ्जनायगिर्वणः।
१ २ ३ २ ३ १ २
हरेसृजानआशिरम्॥ २ *॥

हे "गिर्वणः" गीर्भिर्वननीय ! "हरे" हरितवर्ण सोम ! "आशिरं" † क्षीरं प्रति "सृजानः" विसृज्यमानः "पुनानः" पूयमानः त्वं "जनाय" ‡ जनार्थं "वरिवः" ¶ धनम् "ऊर्जम्" § अन्नञ्च "कृधि" कुरु॥ २॥

अथ तृतीया।

३ २ ३ १ २ ३१ २ ३ २
पुनानोदेववीतयइन्द्रस्ययाहिनिष्कृतम्।
२ ३ २ १ २ ३१
द्युतानोवाजिभिर्हितः॥ ३ ॥॥ ४

* ऋ० वे० ७, १, ३८, ४।

† 'आशिरं—क्षीरं दधि वा'—इति वि०।

‡ 'जनाय—यजमानार्थम्'—इति वि०।

¶ 'वरिवः—वरिष्ठम्'—इति वि०।

§ 'ऊर्जम्—अन्नं यशो बलं वा'—इति वि०।

‖ ऋ० वे० ७, १, ३८, ५।

हे सोम! "वाजिभिः" हविर्लक्षणान्नयुक्तैर्यजमानैः सह* "द्युतानः" दीप्यमानः "देववीतये" यज्ञार्थं "पुनानः" पूयमानः "हितः" हितकरः† त्वम् "इन्द्रस्य" "निष्कृतं" स्थानं "याहि" गच्छ॥

"हितः"-"यतः"—इति पाठौ॥ ३॥ ४

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य चतुर्थस्याध्यायस्य प्रथमः खण्डः‡॥ १॥

द्वितीय-खण्डे¶—

प्रथमतृचे—प्रथमा।

३ २ ३ १ २र ३ २ ३ १ २ ३ १ २
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा।
२ २ ३क २र
हव्यवाड्जुह्वास्यः॥ १ §॥

---

* 'वाजिभिः—वाजमन्नञ्च पुरोडाशादि-लक्षणं, तदेषामस्ति ते वाजिनः ऋत्विग्यजमानाः तैर्वाजिभिः; अथवा वाजसनेयैः वाजिभिः अध्वर्युभिः'—इति वि०।

† 'हितः—निहितः स्थापित इत्यर्थः—इति वि०।

‡ 'बहिष्पवमानमुक्तम्'—इति वि०।

¶ 'सप्तदशस्तौमिकं भेदमाह। इदानीमाज्यानि। आग्नेयम्—इति वि०।

§ ऋ० वे० १, १, १२, ६।

Digitized by Google

"अग्निः" आहवनीयाख्यः तस्मिन् प्रक्षिप्यमाणेन "अग्निना" निर्मन्थन-प्रणीतेन वा सह "समिध्यते" सम्यग् दीप्यते*। कीदृशोऽग्निः? "कविः" मेधावी "गृहपतिः" यजमान-गृहस्य पालकः "युवा" नित्य-तरुणः "हव्यवाट्" हविषोवोढा [वहतेः "वहश्च (३, २, ६४)"—इति ण्वि-प्रत्ययः; णित्त्वादुपधा-वृद्धिः (७, २, ११५) 'गतिकारकोपपदात् कृत् (६,२,१३९)"—इत्युत्तर-पद-प्रकृति-स्वरत्वम्] "जुह्वास्यः" जुहूरूपेण मुखेन युक्तः† [हूयते अनयेति जुहूः "हुवः श्लुवच्च (उ०, २, ६१)" —इति क्विप्; तत्सन्नियोगाद् (३, २, १७८ वा०) दीर्घश्च; श्लुवद्भावात् द्विर्भावः; चुत्व-जश्त्वे; प्रातिपदिक-स्वरेणान्तो-दात्तः (फि०१, १); जुहूरास्यं यस्येति बहुव्रीहौ पूर्वपद-प्रकृति-स्वरत्वेन स एव शिष्यते (८, २, १); शेष-निपातः; यणादेशे "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (८, २, ४)"—इत्या-कारः स्वरितः]॥ १ ॥

अथ द्वितीया।

१ २र ३ १ २ ३ १ २ ३ १ २
यस्त्वामग्ने हविष्पतिर्दूतन्देवसपर्य्यति।
१ २ ३ १ २
तस्यस्मप्राविताभव॥ २ ‡॥

---

*'अग्निनाग्निः समिध्यते—अग्नीनां वैवेत्याचोन्याकरोति। तेन निर्मथ्याग्निना अग्निः समिध्यते यवनीयः'—इति वि०।

† 'जुह्वास्यः—जुह्वते आस्ये यस्य जुह्वास्यः। अथ जुहोति क्रिया यस्य आस्ये क्रियते। अथवा जुहूनामा स्रुक् आस्यमूतो यस्य स जुह्वास्यः'—इति वि०।

‡ ऋ० वे० १, १, २३, २।

हे "अग्ने !" "देव !" "यः" "हविष्पतिः" यजमानः "दूतं" "त्वाम्" "सपर्यति" * परिचरति । तस्य यजमानस्य "प्राविता" "भव स्म" अवश्यं रक्षको भव । [हूयत इति हविः "अर्चि-शुचि (उ०,२,१०७)"—इत्यादिना इसिः, प्रत्यय-स्वरेण इकार उदात्तः (३, १, ३), हविषः पतिः हविष्पतिः, "नित्यं समासेऽनुत्तरपदस्थस्य (८, ३, ४५)"—इति षत्वम्, "पत्यावैश्वर्ये (६, २, १८)"—इति पूर्वपद-प्रकृतिस्वरत्वम् । सपर्यति—सपर-शब्दात् "कण्ड्वादिभ्यो यक् (३, १, २७)"—इति यक्, धातुप्रकरणात् गुणप्रतिषेधार्थात् यकः कित्त्वाच्च सपरशब्दस्य धातुत्वात्ततोविहितस्य यक आर्द्धधातुकत्वे सति "अतोलोपः(६,४,४८)"—इति लोपः, "सनाद्यन्ता धातवः (३,१,३२)"—इति धातुसञ्ज्ञायां तिप्, "कर्त्तरि शप् (३,१,६८)", तस्मिन् पूर्वस्य "अतोगुणे (६, १, ९६)"—इति पररूपत्वम्, यकः प्रत्यय-स्वरेणोदात्तत्वम् (३, १, ३), शपा सह एकादेशस्य "एकादेशउदात्त० (८, २, ५)"—इत्युदात्तत्वम्, "तिङ्ङतिङः (८, २, २८)"—इति निघातो न भवति "यद्वृत्तान्नित्यम् (८, १, ६६)"—इति प्रतिषेधात्] ॥ २ ॥

अथ तृतीया ।

२ ३ १ २ ३ १ २   ३ १ २   ३ १ २
योअग्निन्देववीतये हविष्माꣳआविवासति ।
३ २
तस्मैपावकमृडय ॥ ३ † ॥ ५

* "सपर्यति"—इति परिचरणकर्मसु तृतीयं नैघण्टुकम् (३, ५) ।

† ऋ० मं० १, १, १२, ९ ।

"हविष्मान्" हविर्युक्तो "यः" यजमानः "देववीतये" देवानां हविर्लक्षणहेतुयागार्थम् "अग्निम्" "आविवासति" अग्नेः समीपे विशेषेणागत्य परिचर्यां करोति *। हे "पावक" अग्ने! "तस्मै"† "मृळय" तं यजमानं सुखय। [देववीतये—'वी गति-प्रजन-कान्त्यशन-खादनेषु (अदा०, उभ०)'—इत्यस्मादश-नार्थात् क्तिन्, देवानां वीति यस्मिन् यागे स देववीतिः, "बहु-व्रीहौ पूर्वपद-प्रकृतिस्वरत्वम्, "नब्विषयस्यानिसन्तस्य (फि०, २, ३)"—इति पर्य्युदासाद्धविः-शब्दोदात्तः, मतुपः सर्वानुदात्त-त्वात् स एव शिष्यते। आविवासति—'वा गति-गन्धनयोः (अदा० प०)'—अस्मादन्तर्भावित-ण्यर्थादागमयितुमिच्छतीत्यर्थे सन्, आह्वानेच्छा; परिचर्यायां पर्यवस्यतीति विवासति-शब्दः परिचर्यार्थे निघण्टौ (३, ५, १०) पठितः, द्विर्भावः, अभ्यासस्य ह्रस्वः (७, ४, ५९), "सन्यतः (७, ४, ७९)"—इति इत्वम्, "अनित्यादिर्नित्यम् (६, १, १९७)"—इत्याद्युदात्तत्वम्, "तिङ्ङतिङः (८, १, २८)"—इति निघातो न भवति "यद्वृत्तान्नि-त्यम् (८, १, ६६)"—इति प्रतिषेधात्, "तिङि चोदात्तवती (८, १, ७१)"—इत्याङो "सहसुपेत्यत्र (२, १, ४) सहेति योगविभागादाङस्तिङा सह समासे समासान्तोदात्तत्वे प्राप्ते (८, १, २२३) "परादिश्छन्दसि बहुलम् (६, २, १९९)"—इत्युत्तर-पदाद्युदात्तत्वम्। तस्मै—"क्रियाग्रहणं कर्त्तव्यम् (२, ३, १३ वा०)"—इति सम्प्रदानत्वाच्चतुर्थी॥ २॥ ५

---

* 'आविवासति—दीपयति'—इति वि०।

† 'तस्मै पावक—चतुर्थ्येषा द्वितीया-स्थाने भवति, तं पावकम्'—इति वि०।

Digitized by Google

अथ द्वितीयतृचे*—प्रथमा।

२ १ २ ३ १ १ ३ १ २ ३ १ २

मित्रꣳहुवेपूतदक्षंवरुणञ्चरिशादसम्।

१ २ १ २ ३ १ २

धियङ्घृताचीꣳसाधन्ता ॥ १ † ॥

अहमस्मिन् कर्म्मणि हविः-प्रदानाय "पूतदक्षं"‡ पवित्र-बलं "मित्रं" "हुवे" आह्वयामि [ह्वयतेः "बहुलञ्छन्दसि (२, ४, ७३)"—इति शपोलुकि सति "ह्वः सम्प्रसारणम् (६, १, ३२)"—इत्यनुवृत्तौ 'बहुलं छन्दसि (६, १, ३४)"—इति सम्प्रसारणे उवङादेशः, "तिङ्ङतिङः (८, १, २८)"—इति निघातः]। तथा "रिशादसं" रिशानां हिंसकानाम् अदसम-त्तारम्¶ "वरुणञ्च" हुवे। कीदृशौ मित्रावरुणौ? "घृताचीं"§ घृतमुदकमञ्चति भूमिं प्रापयति या धी येन कर्म्मणा तां घृताचीं "धियम्" "साधन्ता" साधयन्तौ ‖ ['राध साध संसिद्धौ

* 'मैत्रावरुणसाम्नम्'—इति वि०।

† य० वे० ३३, ५७ = ऋ० वे० १, १, ४, २।

‡ 'पूतदक्ष'—पूतं मेध्यं, दक्षं शीघ्रम्'—इति वि०।

¶ रिशादसं—शत्रूणां हिंसकम्'—इति वि०।

§ 'घृताचीं—'घृतमुदकं तस्य प्रदानसमर्थाम्'—इति वि०।

‖ महीधरस्त्वेवमिमां व्याचष्टे—'हे मधुच्छन्दोदृष्टा गायत्री त्र्यचा मित्रावरुण-देवत्या। मित्रं वरुणञ्चाहं हुवे आह्वयामि। कीदृशम्? पूतदक्षम् पूतं पवित्रं सदाचारं दक्षयति धन-पुत्रादिभिर्वर्द्धयति पूतदक्षस्तम् दक्षवृद्धौ शीघ्रार्थे चेत्यस्मात्(?) कर्मण्यण्। रिशादसम् रिशन्ति हि सन्ति रिशा दुष्टाः तान् समन्तादस्यति नाशयति रिशादसः तम्। रिश हिंसायाम् दस उपक्षये। द्वयोर्विशेषणे। कीदृशौ

(द्वि०,प०)'—इत्यस्मादन्तर्भावितण्यर्थाल्लटः शत्रादेशे (६,१, १६१), श्नुं बाधित्वा व्यत्ययेन (३,१,८५) शप्, अदुपदेशत्वात् उपरि शत्र-प्रत्ययस्य ल-सार्वधातुकानुदात्तत्वम्. द्वितीयाद्विवचनस्य शपश्च "अनुदात्तौ सुप्पितौ (३,१,४)"—इत्यनुदात्तत्वे, "धातोः (६, १, १६२)"—इति धातुस्वर एव शिष्यते, "सुपां सु-लुक्० (७, १, ३९)"—इत्यादिना विभक्तेराकारादेशः ॥१॥

अथ द्वितीया।

२ १ २
ऋतेनमित्रावरुणावृतावृधावृतस्पृशा।
१ २ १ १ २
क्रतुम्बृहन्तमाशाथे ॥ २ * ॥

हे "मित्रावरुणौ!" [मित्रश्च वरुणश्चेति मित्रावरुणौ "देवता द्वन्द्वे च (६, ३, २६)"—इति पूर्वपदस्यानङादेशः, तादृशौ] युवां "क्रतुं" प्रवर्त्तमानमिमं सोमयागम् "आशाथे" आनशाथे व्याप्नुवन्तौ ["छन्दसि लुङ्-लङ्-लिटः (३, ४, ६)" —इति वर्त्तमाने लिट्, नुडभावश्छान्दसः]। केन? "ऋतेन" अवश्यभावितया सत्येन फलेन अस्मभ्यं फलं दातुमित्यर्थः। कीदृशौ युवाम्? "ऋतावृधौ" ['ऋतमित्युदक-नाम (निघ० १, १२, ६), सत्यं वा यज्ञं वा'—इति यास्कः†] उदकादीना-

---

वृधौ? धियं कर्म साधन्ता साधयन्तौ। कीदृशीं धियम्? घृताचीं घृतमञ्चते घृच्यते यत्र तम्'—इति।

* ऋ० वे० १, १, ४, २।

† 'ऋतमित्युदकनाम'—इत्यंशस्तु द्वितीय-पञ्चविंशे, 'सत्यं वा यज्ञं वा'—इति तु चतुर्थोनविंशे इति विवेकः।

मन्यतमस्य वर्द्धयितारौ*। अतएव 'ऋतस्पृशा' उदकादीन् स्पृशन्तौ†। कीदृशं क्रतुम्? "बृहन्तम्" अङ्गैरुपाङ्गैश्चाति-प्रौढम्॥ २॥

अथ तृतीया।

३ १ २ ३ १ २र ३ १ २ ३ १ २
कवीनोमित्रावरुणातुविजाताउरुक्षया।
१ २ ३ १ २
दक्षन्दधातेअपसम्॥ ३ ‡॥ ६

"मित्रावरुणा" मित्रावरुणौ एतौ देवौ "नः" अस्माकं "दक्षं" बलम् "अपसं"¶ कर्म च "दधाते" पोषयतः, कीदृशौ? "कवी" मेधाविनौ, "तुवि-जाता" तुविजातौ बहूनामुपकारकतया समुत्पन्नौ, "उरुक्षया" बहु निवासौ [मित्रावरुणौ—मित्र-शब्दः प्रातिपदिक-स्वरेणान्तोदात्तः (फि० १, १), वरुण-शब्दो नित्स्वरेणाद्युदात्तः (६, १, १९७)। तुविजातौ—बहूनामुपकारकतया तत्सम्बन्धित्वेन जातौ विति षष्ठीसमासे समासान्तोदात्तत्वम् (८, १, २२३), चतुर्थीसमासे हि "क्ते च (६, २, ४५)"—इति क्वचित् पूर्वपदप्रकृतिस्वरः स्यात्। उरूणां बहूनां क्षयौ उरुक्षयौ, 'क्षि निवास-गत्योः (तु० प०)'—इति धातोः क्षियन्त्यस्मिन्निति क्षय इत्यधिकरणे एव अच्-प्रत्ययान्तस्य "चितः

* 'ऋतावृधौ—ऋतमन्नं तद् वर्द्धयतः'—इति वि०।

† 'अग्निष्टोमादिकम्'—इति वि०।

‡ ऋ० वे० १, १, ४, ४।

¶ 'अपसं—धनम्'—इति वि०।

(६, १, १६३)”—इत्यन्तोदात्तत्वे प्राप्ते “चयो निवासे (६, १, २०१)”—इत्याद्युदात्तत्वं विहितम्, समासे तु “समासस्य (८, १, २२३)”—इत्यन्तोदात्तत्वं वाधित्वा कदुत्तरप्रकृति-स्वरेण (६, २, १३९) प्राप्तमुत्तरपदाद्युदात्तत्वम् यद्यपि थाथादि-स्वरेणान्तोदात्तत्वेन बाध्यते तथापि “परादिश्छन्दसि बहुलम् (६, २, १९९)”—इत्युत्तरपदाद्युदात्तत्वं द्रष्टव्यम् । दृच:—दृचतेस्तौतिकर्मणो णित्त्वादाद्युदात्त: (६, १, १९७) । आप्यते फलमनेनेत्यप: कर्म, “आप: कर्माख्यायां ह्रस्वो नुट् च वा (उ० ४, १०९ टी० वृ०)”—इत्यसन्तस्य अपसस्यारेइत्यादौ नित्त्वा (६, १, १९७) दाद्युदात्तस्यापस्-शब्दस्यात्र व्यत्ययेन प्रत्ययाद्युदात्तत्वम् (३, १, ३)] ॥ ३ ॥ ६

अथ तृतीयत्वचे*—प्रथमा ।

१ २ १ २   १र   ३ १   २र

इन्द्रेणसꣳहिदृक्षसेसञ्जग्मानोअबिभ्युषा ।

३ १ २ ३ १ २

मन्दूसमानवर्चसा ॥ १ † ॥

हे मरुद्गण ! त्वम् “इन्द्रेण” “सञ्जग्मान:” सङ्गच्छमान: “सं दृक्षसे हि” सम्यग् दृश्येथा: खलु, अवश्यमस्माभिर्द्रष्टव्य-

---

* ‘ऐन्द्रमारुतम्’—इति वि० ।

† ऋ० वे० १, १, १२, २ ।

Digitized by Google

मित्यर्थः *। कीदृशेनेन्द्रेण? "अबिभ्युषा" भीति-रहितेन कीदृशाविन्द्रमरुद्गणौ? "मन्दू" नित्य-प्रमुदितौ, † "समान-वर्चसा" तुल्य-दीप्ती ['पुरा कदाचित् वृत्र-वध-दशायाम् इन्द्रस्य सखायः सर्वे देवा वृत्र-श्वासेनापसारितास्तदानीमिन्द्रस्य वृत्र-सम्बन्धि-सकल-सेना-जयार्थं मरुद्भिः सङ्गमो भूतः'—सोऽयमर्थो "वृत्रस्यश्वसथाय (ऋ० आ० ४, १, ४, २; ६५६ पृ०)"—इति मन्त्रे सङ्गृहीतः; 'इन्द्रो वै वृत्रं हनिष्यन्'—इति ब्राह्मणे (ता०) प्रपञ्चितश्च; इन्द्रशब्दः परमैश्वर्यवन्तं मरुद्गणश्चाभिधत्ते, तदानीमिन्द्रस्य सम्बोधनं बहिरेवाध्याहर्त्तव्यम्। तथाचेयमृक् यास्केनैवं व्याख्याता—"इन्द्रेण हि सन्दृक्षसे सङ्गच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात्, समानवर्चसेत्येतेन व्याख्यातम् (४, १२)"—इति। सन्दृक्षसे—सम्पश्येथाः "दृशेश्चेति वक्तव्यम् (७, १, ७ वा०)"—इत्यात्मनेपदम्, दृशेः "लिङर्थे लेट् (३, ४, ७)"—इति प्रार्थनायां लेट्, आसस्से (३, ४, ८०), "लेटोऽडाटौ (३, ४, ९४)"—इत्यडागमः, "सिब्बहुलं लेटि (३, १, ३४)"—इति सिप्, "सञ्ज्ञापूर्वको विधिरनित्यः (प० शे० ९३)"—इति गुणाभावः, व्रश्चादिना (८, २, ३६) षत्वम्, "षढोः कः सि (८, २, ४१)"

---

* 'इन्द्रेण सं हि दृक्षसे मरुद्गण इति वाक्यशेषः। अथवा व्यत्ययेन व्याख्या क्रियते—मरुद्गणेन दृश्यसे इन्द्रः। अथवा आदित्य इन्द्रोऽभिधीयते, मरुद्गणा रश्मिमयास्तैः सह दृश्यसे। अथवा इन्द्रेण आदित्येन सङ्गमानः सङ्गच्छमानः'—इति वि०।

† 'मन्दू—मदन-स्वभावेन'-इति वि०।

—इति वत्वम्, "आदेश-प्रत्यययोः (८, ३, ५९)"—इति सिपः षत्वम्, बहुल-ग्रहणात् सिपः परस्तात्छन्दपि भवति, सिपा व्यवधानात् पश्चादेशो न भवति, शपः पित्त्वादनुदात्तत्वम् (३, १, ४), उत्तरस्य ल-सार्वधातुकानुदात्तत्वम् (६, १, १८६), धातुस्वर एव शिष्यते (६, १, १६२), हि-शब्द-योगात् "तिङ्-तिङः (८, १, २८)"—इति निघातो न भवति "हि च (८, १, ३४)"—इति प्रतिषेधात्। सञ्जग्मानः—गमेः सम्पूर्वात् छन्दसि लुङ्लङ्लिटः (३, ४, ६)"—इति वर्त्तमाने लिट्, "समोगम्यृच्छि० (१, ३, २९)"—इत्यात्मनेपद-विधानात् लिटः कानजादेशः (३, २, १०६), द्विर्भावः (६, १, ८), हलादि-शेषः (७, ४, ६०), अभ्यासस्य चुत्वम् (७, ४, ६१), "गमहन० (६, ४, ९८)"—इत्युपधा-लोपः, कानचश्चित्त्वादन्तोदात्तत्वम्, गति-समासे (२, २, १८), कृदुत्तरपदप्रकृतिस्वरत्वम् (६, २, १३९)। अबिभ्युषा—'ञि भी भये (जु०, प०), पूर्ववल्लिट् (३, ४, ६), "शेषात् कर्त्तरि० (१, ३, ७८)" —इति परस्मैपदम्, "क्वसुश्च (३, २, १०७)"—इति लिटः क्वसुरादेशः, तस्य कित्त्वाद् गुणाभावः (१, १, ५), अभ्यासस्य ह्रस्व-जश्त्वे (७, ४, ५९)—(८, ४, ५४) क्रादिनियमात् प्राप्तइट् (७, २, १३) "वस्वेकाजाद्घसाम् (७, २, ६७)"—इति नियमात् निवर्त्तते नञ्समासे तृतीयैकवचने भत्वाद् "वसोः सम्प्रसारणम् (६, ४, १३१)"—इति वकारस्य उकारादेशः, "सम्प्रसारणाच्च (६, १, १०८)"—इति पूर्वरूपत्वं बाधित्वा "एरनेकाच (६, ४, ८२)"—इति यणादेशः, अव्यय-

पूर्वपदप्रकृतिस्वरत्वम् (६, २, ११८), पूर्वेण सह संहितायामोकारस्य "एङः पदान्तादति (६, १, १०९)"—इति पररूपत्वे प्राप्ते "प्रकृत्यान्तः पादमव्यपरे (६, १, ११५)"—इति प्रकृतिभावः। मन्द—'मद स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु' (भ्वा०, आ०,), "इदितो नुम् धातोः (७, १, ५८)"—इति नुमागमः, कुरित्यनुवृत्तौ "खरु-शङ्कु-पीयु-नीलङ्गु-लिगु (उ० १, ३६)"—इत्यत्राविभक्तिक-निर्देशादन्तेष्विङ्कुरितिवद्यालन्तरादपि कुरित्युक्तम्, प्रत्ययस्वरेणान्तोदात्तः (३, १, ३), द्विवचने सौ "प्रथमयोः पूर्वसवर्णः (६, १, १०४), तृतीयैकवचने च "सुपां सु-लुक्० (७, १, ३९)"—इत्यादिना पूर्वसवर्णदीर्घत्वम्, समानं वर्णौ ययोरिति वा यस्येति बहुव्रीहिः, द्विवचने "सुपां सु-लुक्० (७, १, ३९)"—इत्याकारः, समान-पदस्य प्रातिपदिकान्तोदात्तत्वम् (फि० १, १), बहुव्रीहौ पूर्वपद-प्रकृति-स्वरेण (८, २, १), तदेवावशिष्यते ॥ १ ॥

अथ द्वितीया।

१ २र ३ २उ ३ १ २ ३ १ २ ३ २
आदह स्वधामनु पुनर्गर्भत्वमेरिरे।
१ २ ३ १२३ १ २
दधाना नाम यज्ञियम् ॥ २ * ॥

अहेत्यवधारणार्थः†]। "आत् अह" वर्षात्तौरनन्तरमेव "स्वधामनु" इतःपरं जनिष्यमाणमन्नमुदकं वा अनुलक्ष्य महतो

* ऋ० वे० १, १, ११, ४।
† "अहरति च ह इति च विनिग्रहार्थीयौ पूर्वेण सम्प्रयुज्यते। अयमहेदं करोतु अयमिदं च करिष्यतीति"—इति निरु० १, ५

देवाः "पुनः गर्भत्वम् आ ईरिरे" मेघ-मध्ये जातस्य गर्भाकारं प्रेरितवन्तः* [प्रतिसंवत्सर मेवं कुर्वन्तीति दर्शयितुं पुनः-शब्दः प्रयुक्तः]। कीदृशा मरुतः? "यज्ञियं" यज्ञार्हं "नाम" "दधानाः" धारयन्तः। [सप्तसु गणेषु मरुतामीदृक् चान्यादृक् चेत्यादीनि यज्ञ-योग्यानि नामान्यन्यत्राम्नातानि। "अन्धः" —इत्यादिष्वष्टाविंशति-सङ्ख्याकेष्वन्ननामसु "उक्" (१५), "रसः" (१६), "स्वधा" (१७)—इति पठितम्, (निघ० २, ७) "अर्णः"—इत्यादिष्वेकशत-सङ्ख्याकेषूदक-नामसु च "तेजः" (८६), "स्वधा" (८७), "अमृतम्" (८८)—इति पठितम् (निघ० १, १२)। "आत्"-"अह"-निपातावाद्युदात्तौ (फि० ४, १२)। स्वधा—स्वं लोकं दधाति पुष्णातीति स्वधा, "आतोऽनुपसर्गे कः (३, २, ३), कृदुत्तरप्रकृतिस्वरत्वम् (६, २, १३९)। अनु-पुनः-शब्दौ निपातावाद्युदात्तौ (फि०, ४, १२)। गर्भस्य भावो गर्भत्वं प्रत्ययस्वरः (३, १, ३)। एरिरे—अन्तर्भावितण्यर्थात् 'इण् गतौ (अदा०, प०)'—इत्यस्मादनुदात्तेतः परस्य लिटो झस्य इरेच्, चित्त्वादन्तोदात्तः (६, १, १६२), "सह सुपा (२, १, ४)"—इत्यत्र "सुपा" योगविभागादाङा सह तिङः "समासस्य (८, १, २२३)"—इत्यन्तोदात्तत्वम्, "इजादेश्च गुरुमतोऽनृच्छः (३, १, ३६)"—इत्याम् न भवति मन्त्रत्वात् † अह-शब्द-योगान्निघाताभावः "तु-पश्य-

---

* 'आदित्य-रश्मय उदपचन्तं, सविता यत् अर्च्छन्ति, तैः पुनरश्मिते सविनरि गर्भत्वं यान्ति'—इति वि०।

† "कास्प्रत्ययादाममन्त्रे लिटि (३, १, ३५)"—इति सूत्रादिह 'अमन्त्रे'—इत्यनुवृत्तेरिति भावः।

Digitized by Google

प्रश्नताद्यैः पूजायात् (८,१,३८)"—इति निषेधात् । दधानाः—शानचश्चित्वादन्तोदात्तत्वे प्राप्ते (६, १, १६२) "अभ्यस्तानामादिः (६, १, १८८)"—इत्याद्युदात्तत्वम् । यज्ञमर्हति यज्ञियम्, "यज्ञर्त्विग्भ्यां घ-खञौ (५, १, ७१)"—इति घ-प्रत्ययः "आयनेयीनीयियः फ-ढ-ख-छ-घां प्रत्ययादीनाम् (७,१,२)"—इतीयादेशः प्रत्ययस्वरेण इकार उदात्तः (३, १, ३)] ॥ २ ॥

अथ तृतीया ।

३ १२ १ २ ३ १ २ ३१ २
वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।
१ २ ३ २ ३ १ २
अविन्द उस्रिया अनु ॥ ३ * ॥ ७

अस्ति किञ्चिदुपाख्यानम्—'पणिभिर्देवलोकाद् गावोऽपहृताः अन्धकारे प्रक्षिप्ताः तास्वेन्द्रो मरुद्भिः सहाजयत'—इति । एतच्च बह्वृचानुक्रमणिकायां सूचितम्—"पणिभिरसुरैर्निगूढा गा अन्वेष्टुं सरमादेत शुनीन्द्रेण प्रेषिता ता ऋग्भिः पणयोऽमित्रीयन्तः प्रोचुः"—इति । मन्त्रान्तरेऽपि दृष्टान्ततया सूचितम्—"निरुद्धा आपः पणिनेव गावः"—इति] तदेव उपाख्यान मभिप्रेत्योच्यते—हे "इन्द्र !" "वीळु चित्"† दृढमपि दुर्गमस्थानम् "आरुजत्नुभिः" ‡ अभिभञ्जद्भिः "वह्निभिः" वोढृभिः अन्यत्र

* ऋ० वे० १, १, ११, ५ ।

† 'चित्—इति पदपूरणः । वीळु अन्तरिक्षे स्थितः'—इति वि० ।

‡ 'अन्तरिक्षे स्थिता अमस्कोभयन्ति आरुजत्नवः'—इति वि० ।

¶ 'इन्द्रनामकैरग्निभिः—इति वि० ।

मेतुं समर्थैः मरुद्भिः सहितस्त्वं "गुहा चित्" गुहायामपि स्थापिता "उस्रियाः" गाः "अन्वविन्दः † अन्विष्य लब्धवानसि । ["ओजः" (१), "पाजः"(२)—इत्यादिष्वष्टाविंशति-सङ्ख्याकेषु बल-नामसु "दक्षः"(१३) "वीळु"(१४) "च्यौत्नम्" (१५)—इति पठितम् । (८, ९) नव-सङ्ख्याकेषु गो-नामसु "अघ्न्या"(१), "उस्रा" (२), "उस्रिया" (३)—इति पठितम् निघ० (२, ११) । वीळु—प्रातिपदिक-स्वरः (फि० १, १) । चित्—आद्युदात्तः । आरुजत्नुभिः—'रुजो भङ्गे (तु० प०) इत्यस्मादौणादिकः कत्नुच् प्रत्ययः, कित्त्वात् (१, १, ५) गुणाभावः, चित्त्वादन्तोदात्तत्वम् (६, १, १६) समासे कृदुत्तर-पदप्रकृतिस्वरत्वञ्च (६, २, १६०) । गुहा—सप्तम्यां डादेशः (७, १, ३९), "ग्रामादीनाञ्च (फि०, २, १५)"—इत्याद्युदात्तः । वह्निभिः—"वहि-श्रि-श्रु-यु-द्रु-ग्ला-हा-त्वरिभ्यो नित् (उ० ४, ५१)"—इति नि-प्रत्ययः, नित्त्वादाद्युदात्तः । अविन्दः—'शेमुचादीनाम् (७, १, ५९)"—इति नुमागमः, लुङ्-लङ्-लृङ्क्ष्वडुदात्तः (६, ४, ७१) । वसन्तीति उस्रियाः वसेः कर्त्तरि यक् प्रत्ययः, षत्वाभावश्च बाहुलकादूहनीयः (३, १, ८५), उक्तं हि 'यत्र पदार्थविशेष मुक्तं प्रत्ययतः प्रकृतेश्च तदूह्यम् (३, १, ८५ भा०)'—इति, इकारः प्रत्ययस्वरेणान्तोदात्तः (३, १ ३) ॥ २ ॥ ७

---

० 'उस्रियाः—आदित्यरश्मयः—इति वि० ।

† 'अविन्दः विदल्लाभे (अदा० प०)—इत्यस्येदं रूपम्'—इति, 'अनु—आनुपूर्व्येण' इति च वि० ।

अथ चतुर्थे तृचे* प्रथमा ।

१ २ ३ १   २ ३   १ ३ १   ३र ३ २ ३ २

ताहुवेययोरिदम्पप्रे विश्वम्पुराकृतम् ।

३   १   ३र

इन्द्राग्नीनमर्द्धतः ॥ १† ॥

"तपोः" † शत्रूणां तापकस्य सोमस्य "पवित्र" शोधक-मङ्ग "दिवस्पदे" द्युलोकस्योत्थिते स्थाने "विततं" विस्तृतम् ["तृतीयस्यामितो दिवि सोम आसीत्"—इति ब्राह्मणम्] "अस्य" "तन्तवः" अंशवः ‡ "अर्चन्तः" दीप्यमानाः "व्यस्थि-रन्" विविधं तिष्ठन्ति पृथिव्यां हविर्द्धाने वा "अस्य" सोमस्य "आशवः" शीघ्रगामिनः रसाः "पवितारं" पावयितारं यज-मानम् "अवन्ति" रक्षन्ति होमद्वारा पश्चाद्भुता "दिवः" द्युलो-कस्य "पृष्ठं" पृष्ठभागम् उन्नतदेशम् "तेजसा" स्वप्रकाशेन सार्द्धं "अधिरोहन्ति" आरोहणं कुर्वन्ति ॥

"अर्चन्तः"-"शोचन्तः"—इति पाठौ, "अधिरोहन्तितेजसा"-"अधितिष्ठन्तिचेतसा"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० ७, ३, ८, २।

† 'हे तपोः'—इति वि०।

‡ 'अस्य दशापवित्रस्य तन्तवः'—इति वि०।

Digitized by Google

अथ तृतीया।

१ २ १ २ १ १ २ १ २
अरूरुचदुषसः पृश्निरग्रिय

२ १ २ २ १ १ १ २
उक्षामिमेतिभुवनेषुवाजयुः।

२ १ २ २ १ २
मायाविनोममिरेअस्यमायया

२ १ २ १ २ ३ २ २ १ २
नृचक्षसःपितरोगर्भमादधुः॥ ३ *॥ १६

"उषसः" सम्बन्धि "पृश्निः" आदित्यः ["पृश्निरादित्यो भवति प्राश्नुत एनं वर्णः"—इति निरुक्तम् (२, १४)] "अग्रियः" मुख्यः सोऽयं "अरूरुचत्" रोचयति। स "उक्षा" जलस्य सेक्ता "भुवनेषु" भूतजातेषु "मिमेति" मिनोति उदकं प्रक्षिपतीत्यर्थः। "वाजयुः" † तेषामन्नमिच्छन् "मायाविनः" माया प्रज्ञा तद्वन्तः देवा "अस्य" सोमस्य "मायया" प्रज्ञया "ममिरे" निर्मितवन्तः, सोमस्यैकांशपानबला अन्यादयः स्व-स्व-व्यापारेण जगत् सृजन्तीत्यर्थः। तथा "अस्य" मायया "नृचक्षसः" नृणां द्रष्टारः "पितरः" पालका देवाः अङ्गिरसः पितरो वा "गर्भम्" "आदधुः" धारयन्ति ओषधीषु च। अत्र सूर्य्यात्मकः सोमः स्तूयते। सूर्य्यरश्म्यनुगमाधीन-

* ऋ० वे० ७, ३, ८, ३।

† 'वाजयुः—वाजमन्नं तदिच्छुः अथवा वाजयुः वाजप्रदः अथवा वाजयुः वेगवान्'—इति वि०।

Digitized by Google

वर्द्धनाच्चन्द्रस्य अयमुषसः पृश्निः सविता अरूरुचत् रोचते रोचयति वासवं श्रिष्टं समानं तत्सम्बन्धिनः नृचक्षसः नृणां द्रष्टारः पितरो जगद्रक्षका रश्मयो गर्भमादधुः वृष्ट्यर्थम् ॥

"मिमेतिभुवनेषु"-"विभर्त्तिभुवनानि"—इति पाठौ ॥३॥ १६

२र १ २ १ र २ १
॥ स्वारसाम ॥ पवौहोवा । चन्तं विततंम्रा । ह्मणस्पा

१ र र २ १
ता२यि । प्रभुर्गात्राणिपरियायि । षिविश्वाता २ ३ः ।

१ २ ४५ २ २ ५ २ ३र २ २
आता३प्ताता । नूर्न्नाता२३४दा । हौ । मोश्नाश्नू२३४

५ २ १ २ ४५ २ २ ५
तायि । होइयि । श्रार्त्ता३साइत् । वाहन्तो२३४ःसा ।

२ २ २ ४ २र १ २ १
हौ । तदा३शा५नाई५६ ॥(१) तपौहोवा । पवित्रं वित

२ १ १ र २
ताम् । दिवस्पादा२यि । अर्चन्तोअस्यतन्तवो । विय

१ १ २ ४ ५ २ २ ५
स्थायिरा२३न् । आवा३न्तीया । स्यापावी २ ३ ४ ता ।

२ ३ २ २ ५ २ १ २ ४ ५
हौ । रमात्मा२३४वाः । होइयि । दायिवा३ःपार्ष्ठम् ।

२ २ ५ २ ३ २ ४
आधीरो२३४हा । हौ । तिता३यिजा५सा ६ ५ ६ ॥(२)

२र १ २ १ २ १ १ र
अरौहोवा । रुचदुषसःपा । श्निरम्रायार२ः । उक्षामि

मेतिभुवनायि । षुवाजायू२३: । मायाइवायिनो । मा

मौरे२३४षा । द्यौ । स्यमाया२३४या । द्योइयि । ना

द्यौइत्वासाः । पायितारो२३४गा । द्यौ । भमाइदा५धू

६५६:(३) ॥ १ * ॥ [१]

॥ कावम्† ॥ पवोवा । त्वन्ते विततंब्रा । ह्मणस्था ।

ता२यि । प्रभुर्गात्राणिपरियायि । षिविस्वाता२: ।

अतप्ततनूर्नतदा । मोअस्न ता२३यि । श्रात्ताइसाईत् ।

वहन्ता:सा२३म् । तादाइश्रापुता६५६ ॥(१) तपोवा ।

पवित्रंवितताम् । दिवस्पादा२यि । अर्चन्तोअस्यतन्त

वो । वियस्थायिरा२न् । अवन्त्यस्यपविता । रमाश्रा

वा२३: । दायिवाइ:पार्ष्ठाम् । अधिरोहा२३ तायि

ताइयिजापुसा६५६ ॥(१) अरोवा । रुचदुषस:पा । श्नि

* उ० गा०७प्र० २ख० १खा० ।

रय्याया२ः । उत्वामिमेतिभुवनायि । षुवाजाय्२ः ।

मायाविनोममिरेश्रा । स्वमायाया२३ । नार्श्वा३त्वासाः ।

पितरोगा२३ । भामा३दा५धू६५६ः(३) ॥ ३ * ॥ [२]

॥ यज्ञायज्ञीयम् ॥ पवा ऽ५यित्रम् । ता३यिवा३यिततंब्रा ।

ह्माणस्पतेप्रभुर्गात्राणि । प:रियायि । षी३वायिस्वा३ताः ।

अता२प्ततनूर्नतदामोअश्नु । तेश्रा२३र्त्ता । ऊम्मायि ।

सा३ई३त् । वाहन्तःसन्तस्ता२श्रनाउ ॥(१) ताता । पोष्प

वित्रंविततन्दिवस्पदेर्चन्तोअस्यतन्तवो । वा३यास्था३यि

रान् । अवा२न्त्यस्यपवितारमाश्र । वोदा २ ३ यिवाः ।

ऊम्मायि । पा३ष्ठीम् । आधिरोहन्तिता२.यिजसाउ ॥(२)

साश्रा । ऽरुरुचदुषसःपृश्निरग्रियउत्वामिमेतिभुवनायि ।

षू३वाजा३यूः । माया२विनोममिरेअस्यमाय् । याना२

* उ० मा० १२प्र० २ख० ३सा० ।

२ १ १ २ १ २ ४ १ २

३र्वा। ऊम्मायि। श्वा३सा:। पायितरोगभंमा२दधा

२ १ १ १

उ। वा३४५(३)॥ १ *॥[३] १६

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य चतुर्थस्याध्यायस्य

पञ्चमः खण्डः † ॥ ५ ॥

अथ षष्ठे खण्डे ‡—

प्रथमसूक्त-प्रगाथे—

१ २र १ १ २ २ १ २ १ २

प्रमꣳहिष्ठायगायतऋताव्ने बृहतेशुक्रशोचिषे।

२ १ २ ३ १ २

उपस्तुतासोअग्नये ॥ १ ¶ ॥

हे "उपस्तुतास:" उपस्तोतार:! यूयं "मंहिष्ठाय" दातृतमाय "ऋताव्ने" ऋतवते यज्ञवते वा "बृहते" महते "शुक्रशोचिषे" दीप्ततेजसे "अग्नये" "प्र गायत" स्तोत्रं पठत ॥ १ ॥

---

* ऊ० गा० १५प्र० १ख० १सा०।

† 'यज्ञायज्ञीयमग्निष्टोम साम'—इति वि०।

‡ 'इदानीमुक्थानि भवन्ति'—इति वि०।

¶ छ० आ० २, १, २, १ (१ भा० १७४ पृ०) = ऋ० वे० ६, ७, १४, १।

Digitized by Google

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २

आवꣳसतेमघवावीरवद्यशःसमिद्धोद्युम्न्याहुतः।

३ १ २ ३ १ ३२ ३ २ ३ २ ३ १ २

कुविन्नोअस्यसुमतिर्भवीयस्यच्छवाजेभिरागमत्॥ २* ॥१७

"मघवा" धनवान् "द्युम्नी" अन्नवान् यशस्वी वा। [तथाच यास्कः—"द्युम्नं द्योततेर्यशोवान्नं वा (५, ५)"—इति "समिद्धः" सम्यग् दीप्तः "आहुतः" आभिमुख्येन हुतः अग्निः "वीरवत्" पुत्रवत् "यशः" यशस्करम् अन्नम् "आवंसते" यजमानेभ्य आ प्रयच्छति तस्य "अस्य" अग्नेः "भवीयसी" अस्मासु अतिशयेन भवितुं योग्या "सुमतिः" अनुग्रह-बुद्धिः "नः" अस्मान् "अच्छ" प्रति "वाजेभिः" अन्नैः सह "कुवित्" बहु-सलिलम् † [कुविदिति बहु-नाम (निघ० ३, १, १२)] "आगमत्" आगच्छतु॥

"भवीयसी"-"नवीयसी"—इति पाठो॥ २ ॥ १७

५ र ४र ५र १

॥ प्रमꣳहिष्ठीयम्॥ प्रमꣳहा३यिष्ठायगायता। ऋ

१ १ र २ ४ ५ २ १

ताव्ने२। बृहतेशुक्रा३शोऽ३। चा२३४यिषायि। उपा

* ऋ० वे० ६, ७, १४, ४।

† 'कुवित्—कदाचन'—इति वि०।

२ २ १ २ ४ २ ५
औ३हो। स्तोतासो३आ३। गा३४५यो ६ हायि॥(१)
५ २ ४र र ५ २र १ १र
उपस्त्व३तासोअग्रयायि। आव२७साता२यि। मघवाना
२ ४ ५ २ १ २ २ १ २
यिरा३वा३त्। या२३३भाः। समाऔ३हो। धोद्यूम्नी
४ २ ५ ५ २ ४ ५र
३या३। इ३४५तो६हायि॥(२) समिद्धो३ग्नीयाहुताः।
२ १ १ २ ४ ५
कुवायिन्नो२। अस्यसुमतातिर्भा३वी३। या२३४सायि।
२ १ २ २ १र १ ४ २ ५
अच्छाऔ३हो। वाजायिभी३रा३। गा३४५मो६हायि(३)॥

॥ ५ * ॥ [१] १७

अथ द्वितीयर्च्चे†—प्रथमा।

२ ३ १ २ ३१२ ३१ २ ३ २
तन्ते मदङ्गृणीमसिवृषणम्पृत्सुसासहिम्।
३ १२ ३ १ २
उलोककृत्नुमद्रिवोहरिश्रियम्॥ १ ‡॥

हे "अद्रिवः" वज्रवन् इन्द्र! "ते" त्वदीयं तं "मदं" सोम-पान-जनितं हर्षं "गृणीमसि" गृणीमः प्रशंसामः ['गृ शब्दे'

* क० गा० १प्र० २ख० ५सा०।

† 'हारिवर्णं साम'—इति वि०।

‡ छ० आ० ४, २, ५, २ (१भा० ७८८ पृ०) = ऋ० वे० ६, १, १७, ४।

क्यादिः "पादीनां ह्रस्वः (७, ४, ८०)", "इदन्तोमसि (७, १, ४६)"—इति मसइगागमः]। कीदृशम्? "वृषणं" वर्षितारं कामानां "पृत्सु" पृतनासु सङ्ग्रामेषु "सासहिं" शत्रूणाम् अभिभवितारं "लोककृत्नुं" लोकस्य स्थानस्य कर्त्तारं हरिश्रियं "हरिभ्याम्" अश्वाभ्यां "श्रयणीयं" सेव्यम् ["उ"शब्द एषः समुच्चये पादपूरणे वा]॥

"पृत्सु"-"पृत्सु"—इति पाठौ ॥ १ ॥

अथ द्वितीया ।

२ ३ १ २ ३ २ ३ १ २ ३ १ २
येनज्योतीꣳष्यायवेमनवेमनवेचविवेदिथ ।
३ २ ३ १ २ २ ३ १ २
मन्दानोअस्यबर्हिषोविराजसि ॥ २ * ॥

हे इन्द्र! "येन" आत्मीयेन मदेन "आयवे" औवंशेयाय † "मनवे" विवस्वतः पुत्राय च "ज्योतींषि" सूर्यादीनि वृत्रादिभिरावृतानि तदा तेषां "विवेदिथ" अलम्भय प्रज्ञापितवान् प्रकाशितवानसीत्यर्थः ; तेन मदेन "मन्दानः" मोदमानस्त्वम् "अस्य बर्हिषः" वृद्धस्य यज्ञस्य "विराजसि" विशेषेण दीप्यसे [यद्वा अस्येति तृतीयार्थे षष्ठी, अनेन बर्हिषा वृद्धेन मदेन हृष्यन् विराजसि विशेषेण दीप्यसे ॥ २ ॥

---

* ऋ० वे० ६, १, १०, ३ ।

† 'आयवे—यजमानाय'—इति वि० ।

Digitized by Google

अथ तृतीया ।

२ ३ १ ३ १ १ २र ३१ २
तदद्याचित्तउक्थिनोनुष्टुवन्तिपूर्वथा ॥

१ २ ३ १ २ ३ १ २
वृषपत्नीरपोजयादिवेदिवे ॥ ३ * ॥ १८

हे इन्द्र ! "ते" त्वदीयं "तत्" प्रसिद्धं बलं "अद्याचित्" † अद्यापि ‡ "पूर्वथा" ¶ पूर्वस्मिन् काले इव "उक्थिनः" शस्त्रिणः स्तोतारः "अनुष्टुवन्ति" क्रमेण प्रशंसन्ति । स त्वं "वृषपत्नीः" वृषा वर्षन्तः पर्जन्याः पतिर्यासां तादृशीः "अपः" "दिवेदिवे" प्रतिदिवसं "जय" § स्वायत्तं कुरु ॥ ३ ॥ १८

१ र र १ २
॥ हारिवर्णम् ॥ तन्तेमदा२गृणीमसायि । चार्षणं

१ २ २ १ २ २ १ १ २
प । त्सुसासा३हो३म् । होवा३हायि । उलोका३कृ३ ।

१ २ २ १ २ ५र र २
होवा३हा । त्सुम । द्रा२यिवा२३४औहोवा । हरि

---

* ऋ० वे० ६, १, १८, १ ।

† "निपातस्य च (६, ३, १३६)"—इति दि० ।

‡ 'चित्—इति पदपूरणः'—इति वि० ।

¶ "दिक्शब्देभ्यः (५, ३, २७)"—इति था ।

§ मन्त्रे अचेति दीर्घान्तः, तत्र "द्व्यचोऽतस्तिङः (६, ३, १३५)"—इति दीर्घः ।

Digitized by Google

१ ११११ १र र र १
श्रियार३४५म्॥(१) येनज्योता२यिॐषिआपवायि। मा
२र १ २ २ १ २ २ १ २
नवेच। विवायिदी३था३। होवा३हायि। मन्दानो३
२ १ २ २ १ ५र र
था३। होवा३हा। अयब। हा२यिषा२३४औहोवा।
२र१ ११११ १ र १
विराजसार ३ ४ ५ यि॥(२) तदद्याचा२यित्तउक्थिनाः।
२ २१ २ १ २ २ १ २२
आनुष्टुव। तिपूर्वा३था३। हावा३हायि। वृषापानी३ः।
१२ २ १ ३ ५र र २ र
होवा ३ हायि। अपः। जा२या२३४औहोवा। दिवे
२ ११११
दिवा२३४५यि(३)॥६*॥ [१]
२र र र १ २ ३ ५ २
तन्तेमदाऔहोहायि। गार्णायिमा२३४सायि। वृ
१ ५ १ र र २ ३र ४र ५
षाणा२३४ॐहायि। पृत्सुसासहिमुलोका३४। औहोवा।
१२ ५ २ २ ५ २ १२ १० २
हूहा२३४हायि। उरुवा२३४कृ। नमद्रि। वोहरिआ
३र ४र ५ १ २ ५ ३र २
३४। औहोवा। हूहा२३४हायि। औहो३१२३४।
५र ५ २र र र र १ २
याम्। एहियाहहा॥(१) येनज्योता। औहोहायि।

० उ० आ० २प्र० २ख० ६सा०।

२ ५ २ १ ५ १ र
षोआया२३४बायि। मनावा२३४ई हायि। चविवेदिथम

र १ ३र ४र ५ १ २ ५ २ ३
न्दाना३४। औहोवा। इहा२३४हायि। उऊवा२३४

५ २ १ २ १ ७ र २ ३र ४र ५ १ २
आ। स्रुवर्हि। षोविराजा३४। औहोवा। इहा२३४

५ ३र २ ५र ५
हायि। औहो३१२३४। सायि। । एहियाई्हा॥(२)

२ रर र १ २ ३ ५ २१
तद्द्याचाऔहोहायि। ताउच्छा२३४ईनाः। अनूष्ट२३

५ १ र र २ ३र ४र ५ १ ३ ५
४हा। वन्तिपूर्वथावृषपा३४। औहोवा। इहा२३४हा

२ ३ ५ २१र२ १ ७र२ ३र
यि। उऊवा२३४नीः। अपोज। यादिवेदा३४। औ

४र ५ १ ३ ५ ३र २ ५र
होवा। इहा२३४हायि। ओहो३१२३४। वायि। ए

५
हियाई्हा(३)॥ १३ † ॥ [२]

५ ४ २ ४ ५र ४ ५ १
॥ सौभरम्॥ तन्ता३यिमा३इङ्गृणीमसीवा। वृषणं

र १ ७ १ २ ५ १
पृक्षुसासा२हायिमुतो२३। हो। का२३४कृ। तमद्रि

ऽ २ १ २ ५र र ५र ४
वः। हरा३यिहा३यि। आ२या२३४औहोवा॥(१) येना

० ऋ० मा० १२प्र० १ष० १२सा० ।

२ ४ ५र ४५ १ र र १०
इज्यो३तीꣳषिआयवोवा । मनवेचविवेदा२यिथामन्दा

१ ३ ५ १ ऽ २
२३। हो। नो२३४वा। स्वर्वर्हिंषः। विरा३हा३यि।

१ ३ ५र र ५४ २ ४ ५ ४ ५
जा२सा२३४औहोवा ॥(२) तदा३द्या३चित्तउक्थिनोवा।

१ र १० १ ३ ५ १
अनुष्टु वन्तिपूर्वा२थावृषा२३। हो। पा२३४नीः। अ

र र ऽ २ १ ३ ५र ० २
पोजया। दिवे३हा३यि। दा२यिवा२३४औहोवा। ऊ

१११११
२३४५(३) ॥ १८ * ॥ १८

अथ तृतीयतृचे† — प्रथमा ।

२ १ २र ३ २उ ३ १ २ ३ १ २
श्रुधीहवन्तिरश्च्याइन्द्रयस्त्वासपर्यति ।

३ १ २ ३१ २ ३ १ २ ३ १ २
सुवीर्यस्यगोमतोरायस्पूर्द्धिमहाꣳअसि ॥ १‡ ॥

हे इन्द्र! यः "त्वा" त्वां "सपर्यति" [सपरशब्दः कण्ड्वादिः¶] हविर्भिः परिचरति। तादृशस्य "तिरश्च्याः"—एतन्नामकस्य ऋषेर्मम "हवं" स्तुतिभिस्त्वद्विषयमाह्वानं "श्रुधि" शृणु।

---

* उ० गा० १८प्र० १ख० १८सा० ।

† 'तैरश्च्यं तृतीयमुक्थ्यम्'—इति वि० ।

‡ ऋ० सा० ४, २, १, ५ (७०७ पृ०) = ऋ० वे० ६, ६, २०, ५ ।

¶ अतः "कण्ड्वादिभ्यो यक् (३, १, २७)"—इति यकि रूपमिति भावः ।

Digitized by Google

श्रुत्वा च हे इन्द्र! त्वं "सुवीर्यस्य" शोभन-वीर्योपेतस्य [यद्वा, वीरे पुत्रे भवं वीर्यं, सुपुत्रवतः] "गोमतः" गवादि-पशुमतः "रायः" धनस्य दानेन अस्मान् "पूर्द्धि" पूरय। एतत्सामर्थ्यं कुत इत्यत आह—त्वं "महान्" गुणाधिकः श्रेष्ठश्च "असि" भवसि खलु ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ २ ३ १ ३क
यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत्।
३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम्॥ २ * ॥

हे "इन्द्र!" "यः" यजमानः "नवीयसीं" नवतरां † पुनःपुनः क्रियमाणतया "मन्द्रां" मदकरीं "गिरं" स्तुतिलक्षणां वाचं "ते" त्वदर्थम् "अजीजनत्" उदपीपदत् अकार्षीदित्यर्थः। तस्मै "स्तोत्रे" त्वं "प्रत्नां" पुरातनीम् ‡ "ऋतस्य" सत्यस्य¶ सम्बन्धि [यद्वा तृतीयार्थे षष्ठी (२, ३, ६३)] सत्येन "पिप्युषीं" प्रवृद्धां ["सिलकाजोस (६, १, २९)"—इति प्यायतेः पी-भावः] तादृशः "चिकित्वित् मनसं" ['कित ज्ञाने' क्वसो रूपम्, आकारस्येकारश्छान्दसः] चिकित्वांसि ज्ञानानि

---

* ऋ० वे० ६, ६, २०, ६।

† 'नवीयसीं—नवतरां बहुपदवर्णस्तोत्रादारचयुक्ताम्'—इति वि०।

‡ 'ऋग्यजुःसामलक्षणाम्'—इति वि०।

¶ 'ऋतस्य पिप्युषीं—ऋतो यज्ञः अथवा ऋतमन्नम् अथवा ऋतः प्रजापतिः अथवा ऋतं सत्यं परं ब्रह्म, तस्य पिप्युषीं पोषणसमर्थाम्'—इति वि०।

Digitized by Google

सर्वेषां हृदयानि यथेति अभवद्भियमाणं यत्तव रक्षणं तत् सर्वेषां हृदयं प्रज्ञापयतीति । ततः अतीन्द्रियार्थदर्शिकं "धिय" त्वदीयं रक्षणाख्यं कर्म तस्मै कुरु ॥

"यस्तइन्द्र"-"इन्द्रयस्ते"—इति व्यत्ययेन पाठो ॥ २ ॥

अथ तृतीया ।

१ २　२ ३र　३ १ २ ३　१ ३ २ ३
तमुष्टवामयङ्गिरइन्द्रमुक्थानिवावृधुः ।
३ १ २ ३ १　२　१ २
पुरूण्यस्यपौंᳫस्यासिषासन्तोवनामहे ॥ ३ * ॥ १९

॥ इति द्वितीयः प्रपाठकः ॥

हे ऋषयः "तम्" परस्परमाहुतं पूर्वोक्तलक्षणम् "उ"—इत्यवधारणे तमेव "इन्द्रम्" "स्तवामः" स्तुतिभिः स्तुमः "यम्" इन्द्रं "गिरः" अस्माकं स्तुतयः "उक्थानि" शस्त्राणि च "वावृधुः" प्रावर्धयत् तं स्तुमः ; ततो वयम् "अस्य" इन्द्रस्य "पुरूणि" बहूनि "पौंस्याणि" वीर्याणि "सिषासन्तः" ['षण सम्भक्तौ' सनीड्भावपक्षे आत्वे कृते रूपं. "सनोतेरनः (८, ३, १०८)"—इति सांहितिकं षत्वम्] तानि वीर्याणि सम्भक्तुमिच्छन्तः सन्तो "वनामहे" तमिन्द्रं स्तुतिभिः सम्भजामहे ॥ ३ ॥

---

* ऋ० वे० ६, ६, ३१, १ ।

Digitized by Google

५ र १ ४ ५ ४ ५ २ १ २ १
॥ तैरश्चम् ॥ अधीहाइवन्निरश्विया: । इन्द्रायस्त्वा ।
२ १ ७ १ ५र ३ २ २ ५ १
सपर्य्यतार२३४यि । सुवी । रिया । स्यार२३४गो । मा
१ २ २ २ ४
ता२: । रायास्पूर्द्धि । हाइहायि । महा५ऽअसी ॥(१)
५ २ ४ ५ ४र ५ २ १ २ १ २ ३र
यस्त्वाइयिन्द्रनवीयसायिम् । गिराम्मन्द्राम् । अजी
२ १ ५ २ २ २ ५ १
जना२३४त् । चिकि । त्विम्मा । ना२३४साम् । धाया
१ २ २ २ ४
२म् । प्रत्नामात्त्री । हाइहा । स्यपाऽ५यिप्पुषीम् ॥(२)
५ २ ४र ५ ४ ५ २ १ २ १ २ ३र २ १
तमुष्टाइवामयङ्गिरा: । इन्द्रामुक्था । निवावृधू२३४: ।
५र २ २ २ ५ १ १ २
पुरू । णिया । स्या२३४पौ । साया२ । सिषासान्ताइ: ।
२ २ ४ ४
हाइहायि । वना५मद्दायि । हो५ई । डा(३) ॥ ७ *॥ [१]
२ र र र १ २ २
॥ वारवन्तीयम् ॥ अधीहवाओहोहायि । ताइ रस्वार२३
५ २ र १ ५ १ र र
४या: । इन्द्रयस्त्वासपर्य्यातोर२३४हायि । सुवीर्य्यस्यगो

---

* क० गा० २प्र० २ख० ७सा०।

२ ३र४३ ५ १ २ ५ २ ३ ५
मा३४। औहोवा। इहा२३४हायि। उहुवा२३४ताः।

२र १ २र १ ७ र २ ३र ४र ५ १ २
रायस्पू। धायिमहा७भा३४। औहोवा। इहा२३४

५ ३र २ ५र ५ २
हायि। औहो३१२३४। सायि। एहियाइहा॥(१) य

र र १ २ २ ५ २
स्तइन्द्राऔहोहायि। नावीया२३४सायिम्। गिरश्च

र र १ ५ १ २ ३र
न्द्रामजीजानो२३४हायि। चिकित्विन्मनसन्धा३४। औ

४र ५ १ २ ५ २ १ ५ २ १र १
होवा। इहा२३४हायि। उहुवा२३४याम्। प्रत्नामृ।

१ ७ २ ३र ४र ५ १ २ ५ ३र २
तस्यपिप्यू३४। औहोवा। इहा२३४हायि। औहो

५र ५ २ र र १ २
३१२३४। षीम्। एहियाइहा॥(२) तमुष्टवाऔहोहा

२ ५ २ र र १
यि। मायज्ञा२३४यिराः। इन्द्रमुक्थानिवावार्धो२ ३ ४

५ १ र र २ ३र ४र ५ १ २
हायि। पुरूण्यस्यपौ७सा३४। औहोवा। इहा२३

५ २ ३ ५ २ १र २ १ ७ र १ ३र
४हायि उहुवा२३४या। सिषास। तोवनामा३४। औ

Digitized by Google

४र ५ १ २ ५ ३र १ ५र
होवा। इहा२३४हायि। औहो३१२३४। हायि। ह

५ ४
यियाईहा। होपुई। वा(३)॥ १४ *॥ [२] १८

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य चतुर्थाध्यायस्य
षष्ठः खण्डः † । ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ ४॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे चतुर्थोऽध्यायः ‡ ॥

---

* ऊ० गा० १३प्र० १अ० १४गा०।

† 'तृतीयमषः समाप्तः' इति वि०।

‡ द्वितीयश्च प्रपाठकः समाप्तः'—इति वि० मूल-पदकारादि-सम्मतश्चेति-भ्रम्।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्म्ममे, तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ ५ ॥

॥ अथ पञ्चमाध्यायः आरभ्यते* ॥

तत्र,

प्रथमे खण्डे प्रतआश्विनीरिति† त्र्यचं प्रथमं सूक्तम्,

तत्र प्रथमा—

२ ३ १ २   ३ १ २

प्रतआश्विनीःपवमानधेनवो

३ १ २   ३ १ २ ३ १ २

दिव्याअसृग्रन्पयसाधरीमणि ।

१२   ३२ ३ १   २   ३

प्रान्तरिक्षात्स्थाविरीस्तेअसृक्षत

१ २ ३ १ २   ३ १ २

येत्वामृजन्त्यृषिषाणवेधसः ॥ १ ‡ ॥

हे "पवमान" सोम! "ते" तव "आश्विनीः" व्याप्ताः ['अशू व्याप्तौ (स्वा० आ०)' तस्मादौणादिका विनिः, ततोऽण्, व्यत्ययेनाद्युदात्तः] "धेनवः" प्रीणयित्र्यः "दिव्याः" दिवि भवाः

---

* 'अथ चतुर्थस्याधरारभ्यते द्वितीयस्त्रिरात्रः । प्रकृतच्छन्दाः प्रथमस्त्रिरात्रः । अथोत्तरस्य छन्दांसि व्यूहन्ति जगत्यः प्रतिपदः, जगती-स्थाने त्रिष्टुभः, त्रिष्टुभां स्थाने जगत्यः'—इति वि० ।

† "एषा चतुर्थस्य प्रतिपत्"—इति वि० ।

‡ ऋ० वे० ७, ३, १९, ४ ।

Digitized by Google

दिव: पतन्त्यो धारा: "पयसा" युक्ता: * "धरीमणि" धारके द्रोणकलशे "प्र असृग्रन्" गच्छन्ति "ये" "वेधस:" विधातार: ऋत्विज: हे सोम ! "ऋषिषाण" ऋषिभि: सम्भक्तत्वात् "त्वा" त्वाम् "मृजन्ति" अभिषुण्वन्ति, "ते" वेधस: "स्थाविरी:" स्थविरा धारा"‡ "अन्तरिक्षात्" सकाशात "प्र असृक्षत" पात्रं प्रति सृजन्ति ॥

"धेनवे"-"धीजुवो"—इति पाठौ, "प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत"--"प्रातऋ षय:स्थाविरीरसृक्षत"—इति च ॥ १ ॥

अथ द्वितीया ।

२ १ ३ १ २ ३ १ २
उभयत:पवमानस्यरश्मयो
३ १ २ ३ १र २र ३ १ २
ध्रुवस्यसत:परियन्तिकेतव: ।
१ २ ३ २ ३ १ १ २ १ २ ३
यदीपवित्रे अधिमृज्यतेहरि:
२ ३ १र २र ३ १ २
सत्तानियोनौकलशेषुसीदति ॥ २ ¶ ॥

"पवमानस्य" पूयमानस्य "ध्रुवस्य" स्वयमविचलितस्य "सत:" विद्यमानस्य सोमस्य "केतव:" प्रज्ञापका रश्मय: "उभयत:" इतश्चामुतश्च "परि यन्ति" परितो गच्छन्ति अभिषव-

---

* 'पयसा—तृतीयैकवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् पयांसि'—इति वि० ।   † 'धरीमणि—यज्ञ'—इति वि० ।

‡ 'स्थाविरी: स्थिरा: स्थूला वा स्थविरीर्वा गाव: रश्मय:'—इति वि० ।

¶ ऋ० वे० ७, ३, १३, १ ।

Digitized by Google

समये एवं भवति । “यदि” यदा ‘‘पवित्रे’* दशापवित्रे “हरिः” हरितवर्णोऽयं सोमः “अधि मृज्यते” तदानीं “सत्ता” सदनशीलोऽयं “योनौ”† योनिषु स्थानेषु “कलशेषु” द्रोणकलशादिषु पात्रेषु “निषीदति” निषस्मो भवति ॥

“योनौ”—“योना”—इति च पाठो ॥ २ ॥

अथ तृतीया ।

२ ३ १ २　　३ १ २
विश्वाधामानिविश्वचक्षऋभ्वसः

३ १ २ ३ १र २र　　३ १ २
प्रभोष्टसतःपरियन्तिकेतवः ।

३　१ २　　३ १ २ ३
व्यानशीपवसेसोमधर्मणा

२ ३ १ २ ३ १ २
पतिर्विश्वस्यभुवनस्यराजसि ॥ ३ ‡ ॥ १

हे “विश्वचक्षः” सर्वस्य द्रष्टः ! सोम ! “प्रभोः” परिवृढस्य “सतः” “ते” तव “ऋभ्वसः” “[ऋभ्वा”—इति महन्नामसु पठितम्]¶ महान्तः “केतवः” रश्मयः “विश्वा” विश्वानि सर्वाणि

* ‘पवित्रे अधि—सप्तम्येक-वचनमिदं पञ्चम्येकवचनस्य स्थाने द्रष्टव्यम्, पवित्रादधि’—इति वि० ।

† ‘नितरां योनिर्नियोनिः, अथवा नीचैः स्थिता पवित्रस्य योनिर्नियोनिः, तस्मिन् नियोनौ’—इति वि० ।

‡ ऋ० वे० ७, ३, १२, ५ ।

¶ सायणमतेऽदःपदं निघण्टौ महन्नामसु (३, ३) पाठभेदेन पठ्यते । विवरणकारस्तु ‘ऋभ्वसः—प्रभुत्वस्य’—इति व्याचष्टे ।

"धामानि" तेजः-स्थानानि देव-शरीराणि* "परियन्ति" परितो गच्छन्ति प्रकाशयन्तीत्यर्थः। हे "सोम!" "व्यानशी" व्यापनशीलस्त्वं "धर्मणा" धारकेण रसनिष्यन्देन "पवसे" पूयसे। किञ्च "विश्वस्य भुवनस्य" "पतिः" स्वामी त्वं "राजसि" ईश्वरो भवसि† ॥

"प्रभोष्टेसतःपरियन्ति"-"प्रभोस्तेसतःपरियन्ति"—इति पाठौ, "व्यानशी"-"व्यानशि"—इति, "धर्मणा"-"धर्मभिः" —इति च ॥ २ ॥ १

॥ लौशाद्यम् ॥ प्रतआश्वि। नीःपवमा२३। नाइधे नवः। दिव्याधरु। ग्न्पयसा२३। धा३रीमणि। प्रा न्तरिक्षात्। स्थाविरीक्षे२३। आ३इक्षत। येत्वाम् जा। तिक्ष्णषिषा२३। णवा३यिधा५वा६५६ः ॥(१) उभ यतः। पवमाना२३। स्वा३रश्मयः। ध्रूवस्य। तः परिया२३। ती३केतवः। यदीपवि। चेत्रधिमा२३।

---

* 'विश्वा धामानि—विश्वानि स्थानानि जन्मानि नामानि वा'—इति वि०।

† 'राजसि—दीप्यसे शोभसे वा'—इति वि०।

Digitized by Google

४ २र २५ २ २र २ ५ १र २
व्याऽ३तेहरिः। सत्तानियो। नौकलशाऽ२ऽयि। धुसा३

२ २र२ २र५र १
यिदाऽ५नाऽ६५ऽ६यि॥(२) विश्वाधामा। निविश्वचा २३।

४ २ २ ५ २ २र२र५ १ ४ २र२५
आ३स्थभ्वसः। प्रभोष्टेस। तःपरियार३। तौ३केतवः।

२ २र२ २५र १ र ४ २२५र २ २ २५
वियानशौ। पवसेसो२३। मा३धर्मणा। पतिर्विश्वा।

१ २ ४
स्यभुवना२३। स्वराऽ३जाऽ५साऽ६५ऽ६यि(३)॥ २* ॥ [१]

अथ द्वितीयतृचे—प्रथमा।

१ २ २ १ २ १र २र२ १
पवमानोअजीजनद्दिवश्चित्रन्नतन्यतुम्।

१ २ २२२२
ज्योतिर्वैश्वानरंबृहत्॥ १ † ॥

"पवमानः" पूयमानः सोमः "बृहत्" महत् "वैश्वानरं" वैश्वानराख्यं "ज्योतिः" तेजः "दिवः" द्युलोकस्य "चित्र" विचित्रं "तन्यतुं न" अशनिमिव "अजीजनत्" अजनयत्॥ १ ॥

---

* ऊ० गा० ८प्र० १अ० २सा०।

† ऋ० बा० ५, १, ५, ८ (२भा० १८ पृ०) = ऋ० वे० ७, १, ११, १।

Digitized by Google

अथ द्वितीया ।

१ २ ३ १ ३ १ २ १ ३ ३ २
पवमानरसस्तवमदोराजन्नदुच्छुनः ।
२ड २
विवारमव्यमर्षति ॥ २ * ॥

हे "राजन्" दीप्यमान ! "पवमान" पूयमान ! सोम ! "तव" त्वदीयः "मदः" मदकरः "अदुच्छुनः"† रक्षोवर्जितः "रसः" "अव्यम्" अविमयं "वारं"‡ वालं दशापवित्रम् "वि अर्षति" अभिगच्छति ॥

"पवमानरसस्तव"-"पवमानस्यते रसः"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

१ २ ३ १ ३ १ २ १ २ ३ २
पवमानस्यतेरसोदक्षोविराजतिद्युमान् ।
२ ३ १ ३ २र ३ २
ज्योतिर्विश्वंᳪस्वर्दृशे ॥ ३ ¶ ॥ २

हे सोम ! "पवमानस्य" "ते" त्वदीयः "रसः" "दक्षः" § "द्युमान्" दीप्तिमान्‖ "विराजति" प्रकाशते** । न केवलं

---

* ऋ० वे० ७, १, २१, २ ।

† 'दुच्छुनः दुष्टजनः, न दुच्छुनः अदुच्छुनः'—इति वि० ।

‡ 'विवारं—वि-अवारितं च, वारं=याज्ञम्'—इति वि० ।

¶ ऋ० वे० ७, १, २१ ३ ।

§ 'दक्षः शीघ्रगामी, अथवा दक्षरक्षणक्रियायाः कर्म'—इति वि० ।

‖ 'द्युमान् द्युलोकवान्'—इति वि० ।

** 'विविधं दीप्यते शोभते वा'—इति वि० ।

स्वयमेव प्रकाशते किन्तु "विश्वं" व्याप्तं *"स्वः" सर्वं "ज्योतिः" तेजः "दृशे" द्रष्टुं करोतीति शेषः†॥

"पवमानस्यतेरसः"-"पवमानरसस्तव"—इति पाठौ ॥३॥२

१ २र र १ २
॥ सᳫंहितम्॥ पवमानोअ। जा२यिजनात्। दि

१ २ १ १ २
वा२ः। चा२३यित्राम्। नता२न्याद्धम्। ज्यो२३तीः।

१ ७ २ ५
वा२यिश्वा। नरा२३म्। हाउवा३। ब२३४हात्॥(१)

१ २र १ २ १ २ १
पवमानर। सा२स्तवा। मदो२। रा२३जान्। अ

१ २ १ ०
दू२च्छूनाः। वा २ ३ यिवा। रा२मा। व्यमा २ ३।

२ ५ १ २र १
हाउवा३। षा२३४तौ॥(२) पवमानस्य। ता२यिरसाः।

२ १ १ १ १
दत्तो२। वा२३यिरा। जता२यिद्यूमान्। ज्यो २ ३

२ १ ० २
तीः। वा२यिश्वाम्। सुवा२३। हाउवा ३। ह२३४

५
शे(३)॥ १२ ‡॥ [१]

---

* 'विश्वं सर्वम्'—इति वि०।

† 'दृशे—स्वर्गलोकस्य गमनाय; न केवलं स्वर्गलोकस्य, सर्वस्य जगतो दर्शनायेत्यर्थः'—इति वि०।

‡ ऊ० गा० १२प्र० १ख० १२सा०।

Digitized by Google

२ र १ २ १ र १-२
॥ जराबोधीयम् ॥ पवमानोवा । ष्योजीजनात् ।

२ १ १ १ र २
दिवाश्चार२३यिचाम् । नतन्यातूम् । ज्योतायिर्वा१यि

४५ ५ २ १ १ र १ २
श्वार२३ना । रम् । बृहो३४५ई । डा ॥(१) पवमानोवा ।

१ २ १ २ १ २ १ २
रासस्तवा । मदोरार२३जान् । अदुच्छू नाः । विवारा

४५ ५ २ २ २ र १
१मार२३व्याम् । ष । षतो३४५ई । डा ॥(२) पवमानो

२ १ र२१ २१ २ २
वा । स्यातेरसाः । दचोवार२३यिरा । जतिद्यूमान् ।

र २ ४५ ५ २२
ज्योतायिर्वा १ यिश्वा २ ३९सूऽ । वः । हमो ३ ४ ५ ई ।

डा(३) ॥ ८ * ॥ [२]

५ २ ४र ५र १
॥ औपगवोत्तरम् ॥ पवमा३नोष्यजीजनात । दिवश्चि

२र १
त्रन्नतन्यतुम् । ज्योती२ । र्वौ२ । ऊवा २ ३ यि ।

२ ५ २ ११ ५ २ ४ ५ १र
वा३४यिश्वा । नरम्बृहात् ॥(१) पवमा३नरसस्तवा । मदो

र २ १ २
राजन्नदुच्छु नाः । विवौ२ । वौ२ । ऊवा२३यि । रा

* ऋ० मा० १८प्र० १ख० १८खा० ।

५ २ १ २ ५ ५ ४ ५र १ र
३४मा। व्यमर्षतायि ॥(२) पवमाउनस्यतेरसाः। दक्षो

र २र १
विराजतिद्युमान्। ज्योतौ२। षौ२। ऊवा२३यि।

२ ५ २ १ २ र १ २
वा३४यिश्वाम्। सुवर्दृशायि। ऐ। हा२ए२३। हिया

५र र २ १२ १११२
३४औहोवा। ए३। उपा३१२३४५(३)॥८*॥[३]२

अथ प्रयज्ञावइति षडृचं तृतीयं सूक्तम्,

तत्र प्रथमा।

१उ ३१ २र ३२ ३२ ३ १२
प्रयज्ञावोनभूर्णयस्त्वेषाअयासोअक्रतुः।

१२ ३ २उ ३१२
घ्नन्तःकृष्णामपत्वचम्॥१†॥

"यत्" ये अभिषुताः सोमाः "गावः न" उदकानीव [तानि यथा तूर्णमधः पतन्ति तद्वत्; गाव एव वीपमीयन्ते, ता यथा स्वं गोष्ठं प्रत्याशु गच्छन्ति तद्वत्; अथवा गावः स्तुतिवचनाः यथा स्तुत्यं प्रति क्षिप्रं प्राप्नुवन्ति तद्वत्], "भूर्णयः" क्षिप्राः, "त्वेषाः" दीप्ताः "अयासः" अयाः गमनशीलाः, "कृष्णं" कृष्णवर्णम् "अपत्वचम्" अपकृष्टां त्वचं "घ्नन्तः" विनाशयन्तः, ईदृग्भूता ये सोमाः "प्र अक्रमुः" तां स्तुम इति शेषः॥

"यत्"-'ये'—इति पाठो॥१॥

---

* ऊ० गा० १८प्र० १ख० ८गा०।

† ऋ० सा० ६, १, १, ५ (२भा० ४७पृ०)=ऋ० वे० ९, ८, २१, १

अथ द्वितीया।

२ १२ ३१ ३१२१ ३क २र
सुवितस्यवनामहेतिसेतुन्दुराय्यम्।
३ २ ३१ २ ३२
साह्यामदस्युमव्रतम्॥ २ *॥

"सुवितस्य"† शोभनं प्राप्तस्य सोमस्य सम्बन्धिनम् "अति-सेतुम्"‡ रक्षोविषयं बन्धनं "वनामहे"¶ सोमकर्त्तृकं रक्षसां बन्धनं स्तुमइत्यर्थः। कीदृशम्? "दुराय्यम्" दुष्प्रापणीयम् § किञ्च "अव्रतम्" यज्ञादि-कर्म-रहितं "दस्युं"‖ अपि "साह्याम" अभिभवेम॥

"दुराय्यं"-"दुराव्यं","साह्याम"-"साह्यांस"—इति पाठाः॥२॥

अथ तृतीया।

३ २३१२ ३ १र २र ३ १ २
शृण्वेवृष्टेरिवस्वनःपवमानस्यशुष्मिणः।
१२ ३१२ ३ २
चरन्तिविद्युतोदिवि॥ ३ **॥

"शृण्वे" श्रूयते। कः? "स्वनः"। किमिव? "वृष्टेः"

* ऋ० वे० ६, ८, ११, १। "वनामहे"—इति च तत्र क्वचित् पाठः।

† 'सुवितस्य—अभिषुतस्य'—इति वि०।

‡ 'अतिसेतु'—मर्य्यादां तामपि अतिक्रम्य स्थानतया'—इति वि०।

¶ 'वनतिः स्तुतिकर्मा, स्तुतिं कुर्मः'—इति वि०।

§ 'दुराय्यं'—दुर्वार्यम्, अथवा दुराप्यं दुष्प्राप्यम्''—इति वि०।

‖ 'व्रत-वर्जितम्'—इति वि०।

** ऋ० वे० ६, ८, ११, ३।

Digitized by Google

वर्षणस्य स्वनइव [तस्य यथा महान् स्वनः श्रूयते तद्वत् प्रभूत-रस-पात-समये श्रूयते]। कस्य स्वन इति? तत्राह—"पव-मानस्य" पूयमानस्य "शुष्मिणः" बलवतः तस्यैव "विद्युतः" दीप्तयः* "दिवि" अन्तरिक्षे चरन्ति ॥ ३ ॥

अथ चतुर्थी ।

१ २ ३ १उ २ १ २ ३ १ २
आपवस्वमहीमिषङ्गोमदिन्दोहिरण्यवत् ।
१ २ ३ २ २
अश्ववत्सोमवीरवत् ॥ ४ † ॥

हे "इन्दो!" "सोम!" अभिषुतः त्वं "महीम् इषम्" महद्-न्नम् "आ पवस्व" ‡। कीदृशम् अन्नम्? "गोमद्" गोभि-र्युक्तम्, "हिरण्यवत्" सुवर्णोपेतम्, "अश्ववत्" अश्वोपेतम्, "वीरवत्" पुत्रयुक्तम् ॥

"अश्ववत्सोमवीरवत्"-"अश्वावद्वाजवत्सुतः"—इति पाठौ॥४॥

---

* 'विद्युतः—विद्युत्संयुक्तस्य'—इति वि० ।

† ऋ० वे० ६. ८, ३१, ४ ।

‡ 'आपवस्व महीमिषम्'—आभिमुख्येन पवस्व महीमिषम् महतीमिषं वृष्टिमन्नं वा'—इति वि० ।

Digitized by Google

अथ पञ्चमी।

१ २ ३ २ ३ १ २र
पवस्वविश्वचर्षणआमहीरोदसीपृण।

३ २उ ३ १ २ ३ १ २
उषाःसूर्योनरश्मिभिः॥ ५ * ॥

हे "विश्वचर्षणे" विश्वस्य द्रष्टः सोम! स त्वं "पवस्व" चर रसम्। तथा कृत्वा तेन रसेन "मही"† "रोदसी" द्यावापृथिव्यौ "आ पृण" आ पूरय। "उषाः" उषसः [एकदेश-वाचिनोष:-शब्देनाहान्युपलक्ष्यन्ते तत्प्राधान्यात्] अहानि "रश्मिभिः" "सूर्योन" सूर्यइव॥

"पवस्वविश्वचर्षणे"-"पवस्वविश्वचर्षण"—इति पाठौ॥ ५॥

अथ षष्ठी।

१ २ ३ २ ३ १ २ ३ १ २
परिनःशर्मयन्त्याधारयासोमविश्वतः।

१ २ ३ १ ० ३ १ २
सरारसेवविष्टपम्॥ ६ ‡॥ ३

हे सोम! "नः" अस्मभ्यं "शर्मयन्त्या" सुखयन्त्या धारया¶ "विश्वतः" सर्वतः "परि सरा" परिसर परिचर। "रसेव"

---

* ऋ० वे० ६, ८, ३१, ५।

† 'मही—महती'—इति वि० महत्यौइत्यर्थः।

‡ ऋ० वे० ६, ८, ३१, ६।

¶ 'शर्मयन्त्या—शर्म-सुखं, तद्भावयन्त्या धारया'—इति वि०।

रसेनेव "विष्टपं" भूलोकं* [यद्वा रसा नदी स्थानं सा प्रवणरूपमिव]॥

"परिनः"-"परिणः"—इति पाठौ॥ ६॥ ३

इति सामवेदार्थ-प्रकाशे उत्तराग्रन्थस्य पञ्चमाध्यायस्य प्रथमः खण्डः॥ १॥

अथ द्वितीय खण्डे—

आशुरर्षेति षड्टचं प्रथमं सूक्तम्, तत्र प्रथमा।

२ ३१ २ ३१२ ३२ ३१ २
आशुरर्षबृहन्मतेपरिप्रियेणधाम्ना।

१ २१ २उ ३ १२
यत्रदेवाइतिब्रवन्॥ १†॥

हे "बृहन्मते"‡ महामते सोम! "प्रियेण" देवानां प्रियतमेन "धाम्ना" शरीरेण¶ "धारया" "आशुः" शीघ्रः सन्

---

* 'विष्टपं स्वर्गं लोकम्,—इति वि०।

† ऋ० वे० ९, ८, २९, १। "अ्रुवन्"—इति मु०पाठः, अस्मंदे च क्वचित् पाठः।

‡ 'बृहन्मते—बृहद्गुहे'—इति वि०।

¶ 'परिप्रियेण—परि समन्तात् प्रियेण धाम्ना प्रियेण स्थानेन'—इति वि०।

Digitized by Google

"पर्य्येषि" परिगच्छ, "यत्र" "देवाः" इन्द्रादयः वर्त्तन्ते—"इति" "ब्रुवन्" उच्चारयन्, तं देशं गच्छामीति ब्रुवन्नित्यर्थः॥ १ ॥

अथ द्वितीया।

१ १२ २२ ३ १ २ ३१२१२
परिष्कृण्वन्ननिष्कृतञ्जनाययातयन्निषः।
३२ ३१ ३२
वृष्टिन्दिवःपरिस्रव॥ २ *॥

"अनिष्कृतम्" असंस्कृतम् † यजमानं स्थानं वा "परिष्कृण्वन्" संस्कुर्वन् "जनाय" "इषः" अन्नानि "यातयन्" ‡ निर्गमयन् "दिवः" अन्तरिक्षात् "वृष्टिं" ¶ "परि स्रव"॥ २॥

अथ तृतीया।

३ २उ ३१२ ३२ ३ १ १ ११११
अयꣳसयोदिवस्परिरघुयामापवित्रआ।
१ २ ३ १ ३२
सिन्धोरूर्म्माव्यक्षरत्॥ ३ §॥

"सः" "अयं" सोमः "पवित्रे आ" सिच्यमानः [—इति

---

* ऋ० वे० ६, ८, २९, २।

† 'अनिष्कृतम्—आभिमुख्येन निष्कृतम्'—इति वि०। इह लेतविन्यमत प्रत्यर्थं आभिमुख्यं कुतो लभ्यतइति।

‡ 'यातयन्'—प्रापयन्—इति वि०।

¶ मुद्रित-मूले तु "वृष्टिम्"—इति पाठः ऋग्वेदेपि तथा।

§ ऋ० वे० ६, ८, २९, ३।

Digitized by Google

शेषः *] "सिन्धोः" जलस्य † "ऊर्म्मा" ‡ ऊर्म्मौ सङ्घाते "वि अचरत्" विविधं चरति । स इत्युक्तम्, कः? इत्याह— "यः" "दिवस्परि" द्युलोकस्योपरि "रघुयामा" लघुगमनः ¶ देवप्राप्तौ, सोयमिति सम्बन्धः ॥ ३ ॥

अथ चतुर्थी ।

२ १ २   ३ २ ३ २उ   ३ १ २ ३ १ २

सुतएतिपवित्रआत्विषिन्दधानओजसा ।

३ १ २   ३ १ २

विचक्षाणोविरोचयन् ॥ ४ § ॥

"सुतः" अभिषुतः सन् "पवित्रे" दशापवित्रे ["आ" —इत्यनर्थकः] "ओजसा" बलेन "शीघ्रम्" "एति" गच्छति । कीदृशः सन्? "त्विषिं" दीप्तिं "दधानः" धारयन्, "विचक्षाणः" सर्वं पश्यन्, ‖ "विरोचयन्" दीपयंश्च; किम्? देवानिति शेषः ॥ ४ ॥

---

* 'पवित्रे—अधिकरण-सप्तम्या; पवित्रे अधिकरणभूते । आ-इत्ययमुपसर्गः अचरदित्याख्यातेन सम्बन्धयितव्यः; आ अचरत्'—इति वि० ।

† 'सिन्धोः—समुद्रस्य नदीमात्रोदकस्य वा'—इति वि० ।

‡ 'ऊर्मयः सङ्घाताः'—इति वि० । ऊर्म्मा इति तूर्म्मिशब्दस्य सुपां सुलुगिति सुपो डादेशे डि-लोपे रूपम् ।

¶ 'रघुशब्दो लघुवाची'—इति वि० ।

§ ऋ० वे० ९, ८, १९, ४ ।

‖ 'विचक्षाणः—विविधं पश्यमानः अयं वा विश्वं जगत् पश्यमानः'— इति वि० ।

Digitized by Google

अथ पञ्चमी ।

२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ २
आविवासन्परावतोअथोअर्वावतःसुतः ।

१ २ ३ १ २
इन्द्रायसिच्यतेमधु ॥ ५ * ॥

"सुतः" अभिषुतः सोमः "परावतः" [दूरनामैतत् †] दूरस्थान् "अथो" ‡ अपिच "अर्वावतः" अन्तिकस्थांश्च ¶ देवान् "आ विवासन्" रसेन परिरक्षणायेत्यर्थः । "इन्द्राय" इन्द्रार्थम् "मधु" मधुरद्रव्यः सोमः "सिच्यते"॥ ५ ॥

अथ षष्ठी ।

२ १ २ ३ १ २ ३ १ २
समीचीनाअनूषतहरिᳲहिन्वन्त्यद्रिभिः ।

२ ३ १ २ ३ १ २
इन्दुमिन्द्रायपीतये ॥ ६ § ॥ ४

"समीचीनाः" सम्यगञ्चिताः सङ्गताः स्तोतारः ‖ "अनूषत" स्तुवन्ति किञ्च सोमं "हरिं" हरितवर्णं "हिन्वन्ति"

---

* ऋ० वे० ६, ८, २९, ५ ।

† "परावतः"—इति निघण्टौ तृतीय-षड्विंशे दूरनामसु पञ्चमत्वेन पाठात् ।

‡ "अथ उ"—इति वि० ।

¶ अन्तिकनामसु "अर्वाके"—इति पाठात् (निघ० २, १६, ८) ।

§ ऋ० वे० ६, ८, २९, ६ । "योनावृतस्यसीदत"—इति तत्र तृतीयः पादः ।

‖ 'समीचीनाः—आसन्नवर्तिनः'—इति वि० ।

Digitized by Google

प्रेरयन्ति गमयन्ति "अद्रिभिः" ग्रावभिः । किमर्थं हिन्वन्ति ? "इन्दुं" सोमम् "इन्द्राय" इन्द्रस्य "पीतये" पानाय ॥ ६ ॥ ४

अथ तृचात्मके द्वितीयसूक्ते—प्रथमा ।

३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २
हिन्वन्तिसूरमुस्रयःस्वसारोजामयस्पतिम् ।
२ १ १२ ३ १ २
महामिन्दुम्महीयुवः ॥ १ * ॥

"उस्रयः" कर्मार्थं निवसन्त्यः सर्वत्र गन्त्र्य इत्यर्थः, "जामयः" एकस्याः पाणेः उत्पन्नत्वात् परस्परं बन्धुभूताः, "स्वसारः" [अङ्गुलि-नामैतत् (निघ० २, ५, १३) । सुष्ठु कर्मसु प्रेर्यन्ते ऋत्विग्भिरिति स्वसारः] अङ्गुलयः, "महीयुवः" सोमाभिषवं कामयमानाः सन्तः "सूरं" सुवीर्यं [सोमे पीते वीर्यं भवतीति ; शोभनं वीर्यं कारणं वा, सर्वेषां कर्मणि प्रेरकं वा, तादृशम्] "पतिम्" सर्वस्य स्थावर-जङ्गम-जातस्य स्वामिनं, यस्माद् देवार्थमिज्यतेऽतएव "महाम्" देवेभ्यो दीयमानत्वेन महान्तं मंहनीयं वा "इन्दुम्" ग्रहेषु स्यन्दमानं सोमं "हिन्वन्ति" प्रेरयन्ति ["हिवि प्रीति-गत्योः (भ्वा० प०)"—इति धातोरेतद्रूपं स्यादि] † ॥ १ ॥

---

* ऋ० वे० ७, ९, १, १ ।

† 'हिन्वन्ति सूरम् उस्रयः = सेवयन्ति सूर्यम् आदित्यरश्मयः । स्वसारः जामयः पतिम् = स्वसारः भगिन्यः जामयः आदित्यरश्मयः ; यथा परस्परं भगिन्यः एकस्यैव भर्त्तुः परमहमिकया सेवां कुर्वन्ति, तद्वदादित्य-रश्मयः परमहमिकया आदित्यं सेवन्ति । एवं, महामिन्दुमभीयुवः = महिमानमभिच्छन्त्यः सोमरश्मयः उदकानि वा'—इति वि० ।

अथ द्वितीया।

१ २ ३ १ २ ३ १ १ ३ १ २ ३ १
पवमानरुचारुचादेवदेवेभ्यःसुतः।
२ ३ २३ १ २
विश्वावसून्याविश ॥ २ * ॥

हे "पवमान" दशापवित्रेण पूयमान! [यद्वा पुनान शुद्ध!] सोम! "रुचारुचा" ["रुच दीप्तौ (भ्वा० आ०)] सर्वेण तेजसा हे "देव" दीप्यमान! "देवेभ्यः" देवार्थं "सुतः" अभिषुतः त्वं "विश्वा" व्याप्तानि सर्वाणि बहूनि "वसूनि" धनानि "आविश" अस्मान् प्रापय [यद्वा सर्वाणि "वसूनि" वासस्थानानि ग्रहादीनि† "आविश" समन्तात् प्रविश] ॥

"देवेभ्यसस्सुतः"--"देवेभ्यस्परि"—इति पाठौ ॥ २ ॥

अथ तृतीया।

१ २ ३ २ ३ २ ३ २ ३ १ २
आपवमानसुष्टुतिंवृष्टिन्देवेभ्योदुवः।
३ १ २ ३ १ २
इषेपवस्वसंयतम ॥ ३ ‡ ॥ ५

हे "पवमान" पूयमान! पुनान! वा सोम! "सुष्टुतिं" ¶

---

* ऋ० वे० ७, २, १, २।

† ग्रह-चमसादीनि यज्ञीयपात्राणीति यावत्।

‡ ऋ० वे० ७, २, १, ३।

¶ 'सुष्टुतिं—शोभनां स्तुतिम् प्राप्यमाणां'—इति वि०।

शोभनस्तुति-युक्तां "वृष्टिं" "देवेभ्यः" देवानां "दुवः"* ["सुपां सुलुक् (७, १, ३९)"—इति चतुर्थ्या लुक्] दुवसे परिचरणायं† "आ पवस्व" आ गमय त्वम् [यथा मदीयया स्तुत्या वृष्टिर्भवति तथा कुर्वित्यर्थः] किञ्च अस्माकम् "इषे" अन्नार्थञ्च "संयतं"‡ सम्यगस्मान् सङ्गच्छतीति वृष्टिं कुरु [यद्वा "दुवः" परिचर्या मभिलक्ष्य क्रियमाणां "सुष्टुतिं" शोभन-स्तुति-रूपां वृष्टिं बहुशः स्तुतिमित्यर्थः, एतां देवेभ्यः प्रापय] ॥ ३ ॥५

२ र र २
॥ विशोविशीयम् ॥ हिन्वाऊम् । ता३यिस् । रा३

१ २ २ १ २र १ २ १ २
मूस्रा३याः । स्वसारः । जामार३याः । ऊम्मायि । पा

२ १ र ५ १ ३ १ ३
३ता३यिम् । मार२३४द्दा२द्दायि । ओ । ऊवायि । ई

५ १ २ २ १ ५र
२३४न्दूम् । ऊम्मायि । मा३द्दो३ । यू२३४वाः । एद्दि

५ २ र र २ १ २ २ १र २र
या६हा ॥(१) पवाऊम्मा३ना । ह्व३चाह्व३चा । देवदे ।

१ २ १ २ २ १
वायिभा२३याः । ऊम्मायि । सू३ता ३ः । वा२३४यि

* 'दुवः—दूरात् द्युलोकात्'— इति वि० ।

† "दुवस्यति"—इति परिचरण-कर्मसु पञ्चमं नैघण्टुकम् (३, ५)।

‡ "संयतं—सम्यङ्नियतम्'—इति वि० ।

Digitized by Google

२ ५ १ २ १ १ ५ १ २
स्वाद्वायि। ओ। ऊर्वायि। वा२३४सू। ऊम्मा। नौ
२ १ ५र ५ १र र र
३या३। वा२३४यिश्रा। एह्वियाद्द्वा॥(२) आपाऽम्।
२ १ २ २ १ २ र १ २
वा३मा। ना३सूष्टू३तीम्। वृष्टिन्दे। वायिभा२३शाः।
१ २ २ १ र५ १ २ २
ऊम्मायि। दू३वा३ः। भा२३४यिषेद्वायि। ओ। ऊर्वा
२ ५ १ २ २ १
यि। पा२३४वा। ऊम्मा। स्वा३सा३म्। या २ ३ ४
५र ५ ४
ताम्। एह्वियाई द्वा। हो५ई। डा (३)॥ १० *॥[१]

१र र १ २
॥ ऐडानाऽसञ्चारम्†॥ औहोयिऊवा३होयि। चि
४ २ १ ५ २ र र ४ २ १ ५ २
त्वन्तिसू३रा३मुत्वयः। स्वसारोजा३मा३यस्पतिम्। म
२ २ ५ २१र१ १ २ र
हामा२३४यिन्दुम्। मद्दीयुवः। इडा२३॥(१) पवमा
४ २र २५र १र ४ २ २ ५ र २ २ ५
ना३रु३चारुचा। देवदे३वे३भ्यःसुतः। विश्वावा२३४सू।
२१र २ १ १र ४ २ २ ५
नियाविश। इडा२३॥(२) आपवमा३ना३सुष्टुतिम्।
२ ४ २र २ ५ २र र १ ३ २र
वृष्टिन्दे३वे३भ्योदुवः। औहोयिऊवा३होयि। इषायि

* ऊ० गा० ५प्र० १ ख० १०सा०। † "इडानांसंचारः"—इति ख० पाठः।

३　५　२ १ २　१　२　४　५　४
पा२३४वा । स्वसंयतम् । इडा२३भा३ । एहीडा । हो

५ई । डा(३) ॥ १० * ॥ [२]५

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य पञ्चमस्याध्यायस्य
द्वितीय खण्डः † ॥ २ ॥

अथ तृतीयखण्डे ‡ प्रथमतृचे—

प्रथमा ।

१ २　३ १ २　३ १ २
जनस्यगोपाअजनिष्टजागृवि

३२ ३ १ २　१　२ ३ १ २
रग्निःसुदक्षःसुवितायनव्यसे ।

३ १ २　३ १　२ ३ १　२
घृतप्रतीकोबृहतादिविस्पृशा

३ १२　२२　३ १ ३　१ २
द्युमद्विभातिभरतेभ्यःशुचिः ॥ १ ¶ ॥

"जनस्य" § "गोपा" गोपयिता रक्षिता, "जागृविः"

---

* ऊ० गा० १९प्र० २ख० १०गा० ।

† 'उक्तम् बहिष्पवमानमेकविंशस्तोत्रिकम्'—इति वि० ।

‡ 'इहाग्नेयान्याज्यानि'—इति वि० ।

¶ ऋ० वे० ४, १, ७, १=य० वे० १५, २७ ।

§ 'जनस्य—यजमानस्य'—इति वि० ।

Digitized by Google

जागरणशील: सदा प्रबुद्ध:, "सुदक्ष:" सुबल: सर्वैः श्लाघनीयबल:, स: "अग्नि:" "नव्यसे" नवतराय "सुविताय"* लोकानां कल्याणाय "अजनिष्ट" जात:। तत: "घृत-प्रतीक:" घृतेन प्रज्वलिताङ्ग:, "बृहता" महता "दिविस्पृशा" द्युलोकं प्राप्नुवता तेजसा युक्त:, "शुचि:" शुद्ध:, एवंविधोऽग्नि: "भरतेभ्य:" ऋत्विग्भ्य: तत्तदर्थं† "द्युमत्" दीप्तिमत् यथा भवति तथा "भाति"‡ प्रकाशते¶ ॥ १ ॥

---

* "सुविताय—यजमानजनाय अभिषवकर्म्मणे'—इति वि०।

† 'भरता: मनुष्या: ऋत्विजो दत्यन्ते, तेभ्य:'—इति वि०। "भरता:"—इति ऋत्विङ्नामसु प्रथमं नैघण्टुकम् (३, १८)।

‡ नात्र वि-शब्दो व्याख्यात: सायणेन, विवरणकारस्त्वाह—'वि=विविधम्'—इति।

¶ अत्र महीधरव्याख्या यथा—"योऽग्निर्भरतेभ्य: ऋत्विग्भ्य: सकाशादजनिष्ट जात: तैर्मथितत्वात्तेभ्यो जात इत्युच्यते। भरता इति ऋत्विङ्नामसु पठितम्। किमर्थं जात:। नव्यसे नवीयसे नवतराय सुविताय सूताय प्रसूताय कर्मणे यागाय सूतरिडागम आर्षः अभिनवं नवीयस्तस्मै ईलोप आर्षः। सोऽग्निर्दिविस्पृशा द्युलोकस्पर्शिना बृहता ज्वालासमूहेन द्युमत्कान्तिमद्यथा तथा विभाति विविधं दीप्यते। कीदृशोऽग्नि: ? जनस्य यजमानस्य गोपा:। गोपायति रक्षतीति गोपा: क्विप् लोपोर्व्योर्वलि यलोप:। जागृवि: जागरणशील: कर्मणि सावधान:। सुदक्ष: शोभनो दक्ष उत्साहो यस्य अतिकुशलो वा। घृतप्रतीक: घृतं प्रतीके मुखे यस्य। शुचि: शुद्ध: बहूनि हवींषि भक्षयन्नपि उच्छिष्टो न स्यात् शोधको वा ॥"—इति।

Digitized by Google

अथ द्वितीया ।

१ २३ १ २ ३ १ २ ३१र
त्वामग्ने अङ्गिरसोगुहाहित

२र ३१ २र
मन्वविन्दञ्छिश्रियाणंवनेवने ।

१ २ ३ १ २ ३ १ २ ३ १र
सजायसेमथ्यमानःसहोमह

२र ३ १ २ ३ १ २
त्वामाहुःसहसस्पुत्रमङ्गिरः ॥ २ * ॥

हे "अग्ने!" "अङ्गिरसः"†—एतन्नामका ऋषयः "गुहा" गुहायां "हितं" निहितं निगूढं "वनेवने" वृक्षे "शिश्रियाणम्" आश्रितम् "त्वाम्" "अन्वविन्दन्"‡ अलभन्त। "महत्" महता "सहः" सहसा बलेन युक्तः "सः" त्वं "मथ्यमानः" "जायसे" हे "अङ्गिरः"¶ अङ्गिरसां प्रकृतिभूत! त्वां "सहसस्पुत्रम्" आहुः§ ॥ २ ॥

---

* ऋ० वे० ४, १, ३, ६ = य० वे० १५, २८।

† 'अङ्गानां रसभूताः'—इति वि०।

‡ 'अन्वविन्दन्—विद्ज्ञाने, विद्लाभे, विद्सत्तायाम्'—इति वि०।

¶ 'अङ्गिरा जाठरोऽग्निः'—इति वि०।

§ अत्र महीधरव्याख्या यथा—'हे अग्ने! अङ्गिरसः अङ्गिरोवंशोद्भवा ऋषयस्त्वा मन्वविन्दन् लेभिरे अन्विष्य प्रापुरित्यर्थः। किम्भूतं त्वां? गुहा गुहायां निगूढे प्रदेशे हितं स्थितमप्सु प्रविष्टमित्यर्थः। अग्निर्देवेभ्य उदक्रामत्सोऽप आविशदित्यादि श्रुतेः। सुपां सुलुगिति गुहाशब्दात्सप्तमीलोपः। हे अग्ने! पुनर्मह त्वां वनेवने शिश्रिया नानावनस्पतिषु श्रितमङ्गिरसोऽन्वविन्दन्। नित्यवीप्सयोरिति वनेपदस्य

अथ तृतीया।

२१ २ ३ १ २ ३ १ ३ १ २
यज्ञस्यकेतुम्प्रथमम्पुरोहित
३ १र २र ३ १र २र
मग्निन्नरस्त्रिषधस्थेसमिन्धते।
१ २ ३ २ ३ १ २ २ ३ १ २
इन्द्रेणदेवैःसरथंसबर्हिषि
२ ३ १र २र३ १ २र ३ १ २
सीदन्निहोतायजथायसुक्रतुः॥ ३ *॥ ६

"नरः" कर्मणां नेतारः ऋत्विजः "यज्ञस्य" यागस्य "केतुं" प्रज्ञापकं "पुरोहितं" यजमानैः पुरस्कृतम् "इन्द्रेण" "देवैः" "सरथं" देवानां तेषां मान्यत्वात् समान-रथम् "अग्निं" "त्रिषधस्थे"† त्रिस्थाने विहारप्रदेशे "प्रथमं" "समिन्धते" सम्यग् दीपयन्ति। ततः "सुक्रतुः" शोभन-कर्मा "होता" देवाना-माह्वाता "सः" अग्निः "बर्हिषि" बर्हिर्युक्ते तस्मिन् स्थाने

हितम्। अयतेः शार्दाच बहुलं छन्दसीति अपः सुः हितं च। यं त्वामङ्गिरसो ऽन्वभन्त स त्वं आयसेऽधुनाप्यरणिभ्य उत्पद्यसे। कीदृशः? महसाः महता बहुना सहसा बलेन मथ्यमानः। महत्सहः-शब्दाभ्यां तृतीयालोपः। मथ्यमानो जायसे इत्यर्थः। हे अङ्गिरः अग्ने! अतएव सहसो बलस्य पुत्रं त्वामाहुः वदन्ति मुनयः बलेन मथ्यमानत्वाद् बलपुत्रं वदन्तीत्यर्थः॥"—इति।

* ऋ० वे० ४, १, २, २।

† 'त्रिषधस्थे—सधस्थं स्थानमुच्यते। त्रिभिः स्थानैः समिन्धते—गार्हपत्य-दक्षिणाग्न्याहवनीय-प्रभृतिभिः स्थानैः समिन्धते'—इति वि०।

Digitized by Google

"यजथाय" यज्ञाय * "निषीदन्" न्यसीदत् प्रतिष्ठितो भवदिति यावत् ॥

"समिन्धते"-"समीधिरे"—इति पाठौ ॥ ३ ॥ ६

२ १ २ २ २ २ १
॥ काबम् ॥ जनोवा । स्यगोपाअजनायि । इजागृ
१ २ १ १
वा२यिः । अग्निःसुदत्तःसुविता । यनव्यासा२यि । घृ
२ २ २ १ १ २ ४ ५ २
तप्रतीकोबृहता । दिविस्पृशा२३ । द्युमा३द्वायिभा । ति
१ १ २ ४ १ १
भराता२३यि । भाया३:श्वु५चा६५६यिः ॥(१) तुवोवा ।
२ २ २ १ १ २
अग्ने अङ्गिरसो । गहाहायिता२म । अन्वविन्दञ्छिश्रिया
२ २ १ १ २ २ २ २
णाम् । वनेवाना२यि । सजायसेमथ्यमानाः । स
२ १ १ २ ४ ५ २ १ १ २
होमाहा२३त् । त्वा३माहुः । सहसास्पू२३त् । त्रामा
४ २ १ २
३ऽगा५यिरा६ ५६: ॥(२) यज्ञोवा । स्यकेतुम्प्रथमाम् ।
२ २ १ २ २ १ १
पुरोहायिता२म । पुरोहायिता२म । अग्निन्नरस्त्रिष
२ १ १ २ २ २
धस्थायि । समिन्धाता२यि । इन्द्रेणादेवैःसरथाम् ।

---

* 'यजथाय —यजन-क्रियायाः कर्तृ चे'—इति वि० ।

Digitized by Google

२ १ १ १ ४५ ५ २र १
सबर्हायिषा२३यि। सायिदा३न्नायिहो। तायजाथा२३।
१ २ ४
यासू३क्का५तू६५६:(३)॥ १५ *॥ [१] ६

अथ द्वितीयतृचे†—

प्रथमा।

३ १ २ ३ १र १र
अयंवांमित्रावरुणासुत:सोमऋतावृधा।
२उ ३ १ २ ३ १ २
ममेदिहश्रुतᳪहवम्॥ १ ‡॥

हे "ऋतावृधा" ऋतस्य सत्यस्य यज्ञस्य वा वर्द्धकौ¶! "मित्रावरुणा" हे मित्रावरुणौ! "वां" युवाभ्याम् "अयं" "सोम:" "सुत:" अभिषुत:। यस्मादेवं तस्मात् "इह" अस्मिन् यज्ञे "ममेत्" मदीयमेव§ "हवम्" आह्वानं "श्रुतं" शृणुतम्॥ १॥

* ऊ० गा० १९प्र० १ख० १५गा०।

† 'मैत्रावरुणमाज्यम्'—इति वि०।

‡ ऋ० वे० २, ८, ७, ४।

¶ 'ऋतावृधा—ऋतो यज्ञ:, तेन वर्द्धयितारौ अथवा ऋतमन्नं तेन वर्द्धेते ऋतावृधौ' —इति वि०। निघण्टौ तु ऋतमिति यज्ञनामसु (१, १२), धननामसु (२, १०), उदकनामसु (१, १२), सत्यनामसु (३, १०) च दृश्यते परं नत्वन्ननामसु।

§ 'मम इत्—इत्-इति पद-पूरण:। इह मदीये यज्ञे'—इति वि०।

Digitized by Google

अथ द्वितीया ।

१ २ ३ १२ ३ १२ ३१ ३ २
राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
३१ २
सहस्रस्थूण आसाते ॥ २ * ॥

"राजानौ" ईश्वरौ दीप्यमानौ वा "अनभिद्रुहा" † अनभिद्रोग्धारौ यौ मित्रावरुणौ "ध्रुवे" स्थिरे "उत्तमे" उत्कृष्टे "सहस्रस्थूणे"‡ "सदसि"¶ स्थाने "आसाते" उपविशतः [तावागच्छतामिति शेषः] ॥ २ ॥

अथ तृतीया ।

२ ३ १ २ ३ १ २ ३ १२ २३१ १२
ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
१ २ ३ १ २
सचेते अनवह्वरम् ॥ ३ § ॥ ७

"सम्राजा" सम्राजौ आश्रयेव सर्वेषां शास्तारौ, "घृतासुती" घृताशौ‖ ["महामहिच्चं घृताशावदत्"—इति मन्त्रान्तरात्,]

* ऋ० वे० ३, ८, ७, ५ । "आसाते"—इति तत्र पाठः ।

† 'अद्रोहकर्त्तारौ'—इति वि० ।

‡ 'सहस्रस्थूणे—स्थूणानां सहस्रं यस्मिन्'—इत्यादि वि० ।

¶ 'सद्मोनामसमाख्ये इति भावत् ।

§ ऋ० वे० ३, ८, ८, १ ।

‖ 'घृतासुती—घृतेन आहुतिः * * * शरीरवृद्धिर्ययोर्भवति * *'—इति वि० ।

Digitized by Google

"आदित्या" अदितेः पुत्रौ, "दानुनस्पती" 'दानुनः' धनस्य देवस्य वा 'पती' स्वामिनौ,* "ता" तौ मित्रावरुणौ "अन-ह्वरम्" अकुटिलं यजमानं† "सचेते" हविर्भक्षणार्थं सेवेते ॥ २ ॥ ७

अथ तृतीय-तृचे‡—प्रथमा।

१ २ ३ २ ३ १ २ ३ १र २र
इन्द्रोदधीचोअस्थभिर्वृत्राण्यप्रतिष्कुतः ।
३ १ २ ३ १र २र
जघाननवतीर्नव ¶ ॥ १ § ॥

[अत्र शाट्यायनिन इतिहासमाचक्षते—"आथर्वणस्य दधीचो जीवतो दर्शनेन असुराः पराबभूवुः। अथ तस्मिन् स्वर्गते सति असुरैः पूर्णा पृथिव्यभवत्। अथेन्द्रस्तैरसुरैः सह योद्धुमशक्नुवं-स्तमृषिमन्विच्छन् स्वर्गं गत इति शुश्राव। अथ पप्रच्छ तत्र-त्यान्—'नेह किमस्य किञ्चित् परिशिष्टमङ्गमस्ति?'—इति; तस्मा अवोचन्—'अस्त्येतदाश्वं शीर्षं, येन शिरसा अश्विभ्यां मधुविद्यां प्राब्रवीत्, तत्तु न विद्मः यत्राभवत्'—इति। पुन-

* 'दानुनस्पती—दान-कर्त्तृ च यजमानाय'—इति वि०।

† 'अनवह्वरं—यज्ञम्'—इति वि०।

‡ 'ऐन्द्रमाज्यम्'—इति वि०। ¶ "नवतीर्णवा"—इति क० पु० पाठः।

§ छ० आ० २, २, ४, ५ (१भा० २९९ पृ०) = ऋ० वे० १, ९, ७, १ ।

रिन्द्रोऽब्रवीत्—'तदन्विच्छत'—इति । तद्दान्वेषिषुस्तच्छर्यणावत्यनुविद्या आजह्नुः । शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्धे सरः स्यन्दते । तस्य शिरसोऽस्थिभिरिन्द्रोऽसुरान् जघान"—इति ॥]
"अप्रतिष्कुतः" परैरप्रतिशब्दितः प्रतिकूल-शब्द-रहितः इन्द्रः आथर्वणस्य "दधीचः"—एतन्नामकस्य ऋषेः "अस्थिभिः" पार्श्व-शिरः-सम्बन्धिभिरस्थिभिः "नवतीर्नव" नवसङ्ख्याका नवतीः दशोत्तरा अष्टशतसङ्ख्याकाः (८१०) [तथाहि—लोकत्रयवर्त्तिनो देवान् जेतु मादावासुरी माया त्रिधा सम्पद्यते ; त्रिविधा सा अतीतानागतवर्त्तमान-काल-भेदेन तत्काल-वर्त्तिनो जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति—एवं नव सम्पद्यन्ते ; पुनरपि उत्साहादि-शक्ति-त्रय-रूपेण त्रैगुण्ये सति सप्तविंशतिः सम्पद्यते ; पुनः सात्त्विकादि-गुणत्रयभेदेन त्रैगुण्ये सति एकोत्तरा अशीतिः सम्पद्यते ;—एवं चतुर्भिस्त्रिकैर्गुणितायाः मायाया दशसु दिक्षु प्रत्येकमवस्थाने सति नवनवतयः सम्पद्यन्ते । एवंविधमायारूपाणि] "वृत्राणि" आवरकाण्यसुरजातानि "जघान" हतवान्] दधीचः—दधि अञ्चतीति दध्यङ्, अञ्चतेः ऋत्विगित्यादिना (३, २, ५९) क्विन्, अनिदिताम्-इति (६, ४, २४) न-लोपः, षष्ठ्येकवचने "अचः (६, ४ १३८)"—इत्यकारलोपे चाविति (६, ३, १३८) दीर्घत्वम्, उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्व-विधानेन तद्बाध्यते ।

Digitized by Google

भ्यस्त्वभिः—"छन्दस्यपि दृश्यते (७, १, ७६)" —इति भन- जादावपि अस्थि-शब्दस्यानङादेशः अन्तोदात्तः] ॥ १ ॥

अथ द्वितीया।

२ १ १२ ३ २ ३ २ १ २ ३ १ २
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम्।
१ २ ३ १ २
तद्विदच्छर्यणावति ॥ २ * ॥

"पर्वतेषु" पर्ववत्सु गिरिषु अपश्रितम् अप गत्य स्थितम् "अश्वस्य" अश्व-सम्बन्धिनो दधीचः "यत्" "शिरः" "इच्छन्" इन्द्रो वर्त्तते, "शर्यणावति" एतन्नामके सरसि† "तत्" शिरः "विदत्" अज्ञासीत्] 'ज्ञात्वा, तदाहृत्य, तदीयैः अस्थिभिः वृत्राणि जघान'—इति पूर्वस्यामृचि सम्बन्धः ॥ इच्छन्—इषु इच्छायां तुदादित्वाच्छप्रत्ययः। विदत्— वेत्तेर्लुङि व्यत्ययेन च्लेरङादेशः। शर्यणावति—शर्यणा नामानो देशास्तेषामदूर- भवः सरः शर्यणावत्; मध्वादिषु शर्यणाशब्दस्य पाठात् "मध्वादिभ्यश्च (४, २, ८६)"—इति चातुरर्थिको मतुप्, "सञ्ज्ञायाम् (८, २, ११)"—इति मतुपो वत्वम्, मतौ बह्वचोऽनजिरादीनाम् (६, ३, ११९)"—इति दीर्घः ॥ २ ॥

---

* ऋ० वे० १, ६, ७, ४।

† 'शर्यणावति—यज्ञे कर्मवति'—इति वि०।

अथ तृतीया ।

१उ   २ ३ १ २   ३ १ २ ३ १ २   ३क २र

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।

१ २ ३ १ २   ३ १ २

इत्था चन्द्रमसो गृहे ॥ ३ * ॥ ८

"अत्राह" अस्मिन्नेव "गोः" गन्तुः "चन्द्रमसः" "गृहे" मण्डले "त्वष्टुः" दीप्तस्य आदित्यस्य सम्बन्धि "अपीच्य" रात्र्यावन्तर्हितं स्वकीयं यत् "नाम" तदादित्यरश्मयः "इत्था" इत्थमनेन प्रकारेण "अमन्वत" अजानन् [उदकमये स्वच्छे चन्द्रविम्बे सूर्य्य-किरणाः प्रतिफलन्ति, तत्र प्रतिफलिताः किरणाः सूर्य्ये यादृशीं सञ्ज्ञां लभन्ते तादृशीं चन्द्रेऽपि वर्त्तमानां लभन्त इत्यर्थः। एतदुक्तं भवति—यद्रात्र्यावन्तर्हितं सौरं तेजस्तच्चन्द्र-मण्डलं प्रविश्य अह्नीव नैशं तमो निवार्य्य सर्व्वं प्रकाशयति; ईदृशभूत-तेजसा युक्तः सूर्य्यश्चन्द्र एव, द्वादशस्वादित्येषु इन्द्रस्यापि परिगणितत्वात्। अतोऽहोरात्रयोः प्रकाशक इन्द्र एवेति इन्द्र-स्तुतेः प्रतीयमानत्वादिन्द्रो देवतेत्येतदुपपन्नं भवति। अत्र निरुक्तम्—'अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपे-क्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति; 'सुषुम्णः सूर्य्यरश्मि-श्चन्द्रमा गन्धर्वः'—इत्यपि निगमो भवति; सोऽपि गौरुच्यते—

* ऋ० आ० १, २, १, २ (१आ० १४१ ऋ०) = ऋ० वे० १, ८, ७, ४ ।

Digitized by Google

"अत्राह गोरमन्वत"—इति (२, ६,)। "अत्रा ह गोः सममंसतादित्यरश्मयः स्वनामापीच्यमपगतमपचितमपिहितमन्तर्हितं वा (४, २५)"—इति॥ अमन्वत—'मनु अवबोधने (त०, आ०)। अपीच्यम्—अपपूर्वाच्चिनोते र्निपातनाद् यत्, अतएवाभिमतरूपसिद्धिः; यद्वा अपिपूर्वादञ्चतेः "ऋत्विग् (३, २, ५९)"—इत्यादिना क्विन्, "अनिदिताम् (६, ४, २४)"—इति न-लोपः, अपिगते निर्गते भवमपीच्यम् "भवे छन्दसि (४, ४, ११०)"—इति यत्, "अचः (६, ४, १३८)"—इत्यकारलोपे "चौ (६, ३, १३८)"—इति दीर्घत्वम्; 'अपीच्यो प्रकाशः'—इति भट्टभास्करमिश्रः। इत्था—इदम्-शब्दाच्च "था हेतौ च छन्दसि (५, ३, २६)"—इति प्रकारवचने था-प्रत्ययः; यदि तत्रेदं-शब्दोनानुवर्त्तते तदानीम् "इदमस्थमुः (५, ३, २४)"—इति थमुः प्रत्यय; "अव्ययादाप्-सुपः (२, ४, ८२)"—इति सुब्लुकं बाधित्वा "सुपां सु-लुक् (७, १, ३९)"—इत्यादिना डादेशः। चन्द्रमसः—चन्द्रमाह्लादनं मिमीते निर्मिमीते—इति चन्द्रमाः "चन्द्रेमोडित् (उ०, ४, २२७)"—इत्यसि-प्रत्ययः; दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वम्; पूर्वपदञ्च "स्फायितञ्चि (, ,)"—इत्यादिना रक्-प्रत्ययान्तत्वादन्तोदात्तम्॥ १॥ ८

अथ चतुर्थतृचे—प्रथमा ।

२१२२ १ २८३ २ ३१ २

इयंवामस्यमन्मनइन्द्राग्नीपूर्व्यस्तुतिः ।

३ २ ३ १ २

अभ्राद्वृष्टिरिवाजनि ॥ १ * ॥

हे "इन्द्राग्नी ! "इयं" "पूर्व्यस्तुतिः" पूर्व्या स्तुतिः मुख्या स्तुतिः†, कस्य सम्बन्धिनी ? "मन्मनः"‡ स्तोतुः अस्मात् वसिष्ठात् "वां" युवाभ्यां युवयोरर्थम् "अभ्रात्" मेघात् "वृष्टि-रिव" बह्वी सती "अजनि" प्रादुर्भूता¶, तां शृणुतमित्युत्तरत्र सम्बन्धः ॥ १ ॥

अथ द्वितीया ।

२ ११ ३१उ ३ १ २ ३ १२३ १२

शृणुतञ्जरितुर्हवमिन्द्राग्नीवनतङ्गिरः ।

३ १ २ ३ १ २

ईशानापिप्यतन्धियः ॥ २ § ॥

हे "इन्द्राग्नी !" "जरितुः" स्तोतुः "हवम्' आह्वानं युवां

---

* ऋ० वे० ५, ६, १७, १ ।

† 'पूर्व्यस्तुतिः—पूर्व्या प्रथमतरा स्तुतिः सर्वेषां स्तुत्यानां प्रथमतरे इन्द्राग्नी-स्तुत्यौ —इति वि० ।

‡ 'मन्मनः प्रज्ञानस्य यज्ञाः'—इति वि० ।

¶ 'यथा अभ्रात् सकाशात् वृष्टिरुत्पद्यते, तद्वदिन्द्राग्नीभ्यां सकाशात् यज्ञम् उत्पद्यते —इति वि० ।

§ ऋ० वे० ५, ६, १७, २ ।

Digitized by Google

शृणुतम्। श्रुत्वा च "गिरः" तदीयाः स्तुतीः "वनतं" सम्भजतम्। तथा "ईशाना" ईश्वरौ युवां "धियः" अनुष्ठितानि कर्माणि "पिप्यतं" तैस्तैः फलैः पूरयताम्॥ २॥

अथ तृतीया।

१ २३१ २ ३१ ३ ३१ ११
मापापत्वायनोनरेन्द्राग्नीमाभिशस्तये।

१ २ ३१
मानोरीरधतन्निदे॥ ३*॥ ९

हे "नरा" नेतारौ! इन्द्राग्नी! "नः" अस्मान् "पापत्वाय"† हीनभावाय "मा रीधतम्"‡ मा वशं नयतम्, तथा "अभिशस्तये" शत्रुभिः कृतायाभिशंसनाय मा रीरधतम्, तथा "निदे"¶ निन्दकाय मा रीरधतं मा वशीकुरुतम्॥ ३॥ ९

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य पञ्चमस्याध्यायस्य तृतीयः खण्डः§॥ ३॥

---

* ऋ० वे० ५, ६, १०, ३।

† 'पापत्वाय—पापबुद्धये'—इति वि०।

‡ 'मा रीधतम्—अहिंसायाम्; मा हिंसताम्'—इति वि०।

¶ 'निदे—नितरां दीयते यस्मिन् यत्नौ निदे'—इति वि०।

§ 'उष्ण' प्रातः-सवनम्'—इति वि०।

Digitized by Google

अथ चतुर्थखण्डे* प्रथमतृचे—

प्रथमा।

१२ ३१२ ३१२ ३१२
पवस्वदक्षसाधनोदेवेभ्यःपीतये† हरे।
३१ २ ३२३१२
मरुद्भ्योवायवेमदः॥ १ ‡॥

हे "हरे" हरितवर्ण! पापहर्त्तर्वा सोम! "दक्षसाधनः" दक्षो बलं तस्य साधनो "मदः" मदकरश्च त्वं "पवस्व" क्षर। किमर्थम्? "देवेभ्यः" इन्द्रादिभ्यः "पीतये" पानाय, तथा "मरुद्भ्यः" "वायवे" च पीतये पवस्व॥ १॥

अथ द्वितीया।

२३१२ ३१२ ३२उ ३१२३२
सन्देवैःशोभतेवृषाकविर्योनावधिप्रियः।
१२ ३१२
पवमानोअदाभ्यः॥ २ ¶॥

"अयं" सोमः "सं शोभते" "देवैः" सह। कीदृशः सोमः? "वृषा" वर्षकः, "कविः" क्रान्तदर्शी, "योनौ" स्थाने स्वीये "अधि" अधिष्ठितः§ "प्रियः" प्रियोभूतः सर्वेषां [यद्वा प्रीणयिता]

---

* 'इदानीं माध्यन्दिनसवनमुच्यते'—इति वि०।

† "देवेभ्यःपीतये"—इति क० पु० पाठः।

‡ छ० आ० ५, २, ४, ८ (२ भा० २४ पृ०) = ऋ० वे० ९, ८, १५, १।

¶ ऋ० वे० ९. ८, १५, २। "पवमानोअदाभ्यः"—इति स्थले "हवद्वादेववीतमः" —इति ऋ०-पाठः।

§ 'योनौ अधि—सप्तम्येकवचनमिदं द्वितीयैकवचने द्रष्टव्यम्। योनिम् अधि' —इति वि०।

Digitized by Google

"पवमानः" चरन् "अदाभ्यः" केनाप्यहिंसितश्च भवति अतएव सोमः सं शोभते ॥ २ ॥

अथ तृतीया।

१ २   ३ २   ३ २   ३उ   ३१ २
पवमानधियाहितोऽ३ऽभियोनिङ्कनिक्रदत्।
१ २   ३ १   ३२
धर्मणावायुमारुहः॥ ३ * ॥ १०

हे "पवमान" सोम! "धिया" कर्म्मणा अस्मद्व्यापारेण अङ्गुल्या वा † "हितः" धृतः सन् "कनिक्रदत्" शब्दं कुर्वन् "योनिं" स्थानं "द्रोणकलशं" च "अभि आरुहः" आभिमुख्येन आरोहणं कुरु प्रविशेत्यर्थः। तदेवाह—"धर्म्मणा" कर्म्मणा "वायुं" वायुसम्बन्धिपात्रमित्यर्थः, तदारुहः प्रविश ॥

"आरुहः"-"आविश"—इति पाठौ ॥ ३ ॥ १०

१   २ १   ३२ ३२
॥ निधनकामम् ॥ पवस्वदा२क्षसाधनाः। देवेभ्यः
२ २   २ १ २   ०   ३२ २
पीतयेहराथि। मरुद्भ्योवा। पवा२३४यि। हाहोयि।
१ २   १   १   १
मदाः। होयि। २। मदः। होयि। २। मदः। होयि।

* ऋ० वे० ९, ८, १५, २।

† 'धिया बुद्धा'—इति वि०।

२र१र२र २ १११ १ रर र१
२। औहोऔहोवा२३४५हाउ॥(१) सन्देवैःशो२भतेवृ

२ १र र २१ र ७
षा। कविर्योनावधिप्रियाः। पवमानाः। अदा२३४।

२र २ १ र
हाहोयि। भियाः। होयि। होयि। भिय। होयि।

२र१र२र १११
२। भियः। होयि। २। औहोऔहोवा२३४५हाउ॥(२)

१ र र १ २ १र र१
पवमाना२धियाहिताः। अभियोनिङ्कनिक्रदात्। धर्म्म

र ७ २र२ १र
णावा। युमा२३४। हाहोयि। रुहाः। होयि।

२र१र२र १११
होयि। रुह। होयि। २। औहोऔहोवा२३४५

हाउ। वा(३)॥८*॥[१]

३२ र ५
॥सत्रासाहीयम्॥ पवा३४। स्वदक्षसाधनः। आे

५ १रर र र १ २ २
६वा। देवेभ्यःपीतयेहा२रायि। मा२रु। ह्यो२३वा।

१६ २र १र२ १ ५ ५ ३२
यवौ३हो। वाहा३४३यि। मा२३४टो६हायि॥(१) सन्दे

र र र र ५ ५ १ र र
३४। वैःशोभतेवृषा। ओ६वा। कविर्य्योनावधिप्रा२

---

* ऊ० मा० १प्र० १ख० ८ सा०।

१ १ २ १ ५ २र १र २
याः । पा२वा । मा२३नाः । अदौ३ह्रो । वाहा३४३

१ ५ ५ १२ र र
यि । भा२३४यो६हायि ॥(२) पवा३४ । मानधियाहि

५ ५ १ र १ १
तः । ओ६वा । अभियोनिक्निका२दात् । धा२र्मा ।

२ १ ५ २र १र २ १ ५ ५
णा२३वा । युमौ३ह्रो । वाहा३४३यि । रु२३४वो६हा

यि(३) ॥ ८ * ॥ [२]

२ १ १
॥ त्वाष्ट्रीसाम ॥ पवस्वदा । क्षसा२धाना२ः । दा

र २ र १ २ १ १ १
यिवेभ्यःपो । तयायिहा१रा२यि । मरुद्भ्यो२३वा । यवे

२ २ र र १
मदा३१उवा२३ ॥(१) सन्देवैःशो । भता२यिवार्षा२ ।

१ २र र १ २ १ २ १
काविर्योनौ । अधायिप्रा१या२ः । पवमा२३नाः । अदा

२ २ र १
भिया३१उवा२३ ॥(२) पवमाना । धिया२हायिता२ः ।

१ २र १ २ १ २
आभियोनिम् । कनायिक्रा१दा२त् । धर्म्मणा२३वा ।

१ २ २
युमारुहा३१उवा२३ । वृधे१(३) ॥ १ † ॥ [३] १०

* ऊ० गा० १५प्र० १ख० ८गा० । † ऊ० गा० १६प्र० २ख० १गा० ।

Digitized by Google

अथ प्रगाथरूपे द्वितीयसूक्ते—

प्रथमा।

१ २ १ २ ३ २ २ ३ १ २
तवाहꣳसोमरारणसख्यइन्दोदिवेदिवे।
३ १ २ २ १ २ ३ १र २र ३ २उ २ १ २
पुरूणिबभ्रोनिचरन्तिमामवपरिधीꣳरतिताꣳइहि॥ १* ॥

हे "इन्दो" स्यन्दमान-सोम ! "तव" "सख्ये" सखि-कर्मणि "अहं" "दिवेदिवे" अन्वहं "रारण" रमे [रणेर्लिटि उत्तमे णलि रूपम्]। हे "बभ्रो" बभ्रुवर्ण-सोम "पुरूणि" बहूनि रक्षांसि "मां" तव सख्ये स्थितं "नि अव चरन्ति" नीचीनं चरन्ति बाधन्ते। ये मां बाधन्ते तान् "परिधीन्" "अति इहि" अतीत्य गच्छ जहीति यावत्॥ १ ॥

अथ द्वितीया।

२ ३ १ २र३ १ २ ३ १ २ ३ १ २ ३ १ २
तवाहन्नक्तमुतसोमतेदिवादुहानोबभ्रऊधनि।
३ १ २र ३ २ ३ १ २ ३ १ २ ३ १ २
घृणातपन्तमतिसूर्य्यंपरःशकुनाइवपप्तिम॥ २ † ॥ ११

हे "इन्द्र!" "यद्" यस्मात् त्वं "हरी"—एतसञ्ज्ञावश्वौ* "यच्छसे" रथे योजयसि, तस्मात् "त्वत्" त्वत्तोऽन्यः कश्चित् "रथीतरः" अतिशयेन रथवान् "नकिः" नास्ति [अन्येषामीदृगश्वयुक्तरथाभावात्]"त्वा" त्वाम् "अनु" लक्ष्य "मज्मना" [बलनामैतत् (निघ० २, ९, २१)] बलेन सदृशोऽपि "न किः" नह्यस्ति "स्वश्वः" शोभनाश्वो "न किः आनशे" न प्राप [इन्द्रस्य बलाश्वयोरसाधारणत्वात् इन्द्रसदृशो बलवान् अश्ववान्] लोके कश्चिदपि नास्तीत्यर्थः [न किष्टत्—"युष्मत्तत्तक्षुष्वन्तः पादम् (८, ३, ११३)"—इति षत्वम्। रथीतरः—अतिशयेन रथी; तरपि "ईद्रथिनः"—इति ईकारान्तादेशः। यच्छसे—यमेर्व्यत्ययेनात्मनेपदम्। स्वश्वः—बहुव्रीहावाद्युदात्तत्वसीत्युत्तर-पदाद्युदात्तत्वं। आनशे—"अश्नोतेश्च (७,४,७२)"—इति अभ्यासादुत्तरस्य नुट्॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ १ २
इन्द्रायनूनमर्चतोक्थानिचब्रवीतन।

३ १ २ ३ १ २ ३ १ २ ३ १ २
सुताअमत्सुरिन्दवोज्येष्ठंनमस्यतासहः॥ ३ †॥२१

* "हरी इन्द्रस्य"—इति नैघण्टुकम् १,१५,१।

† ऋ० वे०,१,६,४,५।

हे ऋत्विजः! "इन्द्राय"* "नूनं" क्षिप्रम्† "अर्चत" पूजनं कुरुत। एतदेव स्पष्टीक्रियते—"उक्थानि" अप्रगीत-मन्त्र-साध्यानि शस्त्राणि स्तोत्राणि च "ब्रवीतन" ब्रूत। "सुताः" अभिषुताः "इन्दवः" सोमाः त्वाम् "अमत्सु" आगत मिन्द्रं मत्तं कुर्वन्तु, अनन्तरं "ज्येष्ठं" प्रशस्यतमं "सहः" सहस्विनं बलवन्तम् तमिन्द्रं नमस्यत नमस्कुरुत [ब्रवीतन—ब्रवीते र्लोटि "तप्तनप्तनथनाश्च (७,१,४५)"—इति तनबादेशः। अमत्सु—मदी हर्षे (भ्वा०,आ०)छान्दसः प्रार्थनायां लुङ्, आगमानुशासनस्या-नित्यत्वादिड़भावः। नमस्यत—"नमोवरिवश्चित्रङः (३,१,१९)"—इति क्यच्। सहः—"युगकारेकाररेफाश्च वक्तव्याः—इति मत्वर्थीयस्य लुक्॥ ३॥ २१

॥ वसिष्ठप्रियम्॥ इममी२३। द्रसुतम्पिब। ज्येष्ठाम्। अमा३र्त्यम्मादा२म्। शुक्रास्यत्वा३। भियार्२क्षा२३४रान्। धाराओ२३४वा। आर्त्ताओ२३४वा। स्सा५दनायि॥(१) नकिष्टू२३। वद्रथीतरः। हारी। यदीइन्द्रायच्छासा२यि। नकायिष्टूवा३। नुमा२ज्मा२३४

* 'इन्द्रायेति चतुर्थी द्वितीयार्थे द्रष्टव्या, इन्द्रम्'—इति वि०।

† 'नूनं निश्चितम्'—इति वि०।

५ १ २ ३ ५ १ २ २ ५ ४
ना। नाकाओ२३४वा। सूवाओ२३४वा। अश्वा५नआ
२ १र ४र ५ ४ ५ २ १२
यि॥(२) इन्द्राया२३। नूनमर्च्च। तोक्था। निचा३ब्रावी१
१ २ १ ३ ५ १
ताना२। सुताअमा३। त्सुरी२न्दा२३४वाः। ज्यायि
२ १ ५ १ २ ३ ५ ४ ४
ष्ठाओ२३४वा। नामाओ२३४वा। स्यता५सहाः। हो
५ई। डा(३)॥ १*॥ [१]

१ २ १ र
॥ आसितायम्॥ इममिन्द्रसुताम्। पिबा। ज्येष्ठम
२ १ १ १
मर्त्तियम्मा२३दाम्। शुक्रा२स्यात्वा२। भियक्षरान्।
१ १ २ १ ५ ४ ३
धारा२आर्त्ता२। स्यसोवा३ओ२३४वा। दा५नोई३हा
१ २ १ १ र २
यि॥(२) नकिष्ट्वाद्रथायि। तरो। हरीयदिद्रयच्छा२३सा
१ १ १ १
यि। नाका२यिष्टूवा२। नुमज्मना। नाका२यिसूवा
१ २ १ ५ ४ ५ १ र
२। अश्वोवा३ओ२३४वा। ना५योई३हायि॥ इन्द्रा
२ र १ र र २ १
यनूनमा। चता। उक्थानिचब्रवीतार३ना। सूता२

* ऊ० गा० ३प्र० १अ० १खा०।

१ १ १ १
आमा२ । त्वरिन्दवाः । ज्यायिष्ठा२न्नामा२ । स्यतो
२ १ ५ ४ ५
वा३ओ२३४वा । सा५द्दोई३हायि(३) ॥ १७* ॥ [२]

५ ३ २ ४ ५
॥ गौरीवितम् ॥ इमम् । इन्द्रा३ । सुतम्पिबा ।
१र १ २ ४
ज्येष्ठममर्त्त्यिम्मदा२३म् । शूक्रस्यत्वा३१२३ । भियापु क्ष
१ र २ ४ ५ ४ ५
रान् । धाराऋता३१२३ । स्यसोवा । दा५नोई३हायि ॥(१)
५ १ २ ४ र ५ १ र
नकिः । तुवा३त् । रथीतराः । हरीयदिन्द्रयच्छसा
१ २ ४ १
२३यि । नाकिष्टुवा३१२३ । नुमा५ञमना । नाकिस्तुवा
४ ५ ४ ५ ५ र ३ २
३१२३ । स्वयोवा । ना५ओई३हायि ॥(२) इन्द्रा । यनू३ ।
४ ५ १ र १ र २
नमर्चता । उक्थानिब्रवीतना२३ । सूताअमा३१२३ ।
४ १ २ ४ ५ ४
त्सुरी५दवाः । ज्यायिष्ठन्नमा३१२३ । स्यतोवा । सा५
५
ओई३हायि(३) ॥ ३ † ॥ [३] २१

* ऊ० गा० ११प्र० १ख० १७गा० ।

† ऊ० गा० ११प्र० १ख० ३गा० ।

Digitized by Google

अथ तृतीयतृचे*—प्रथमा।

१ २ ३ १ २ ३ १ २ १ २ ३ १ २
इन्द्रजुषस्वप्रवहायाहिशूरहरिह ।
१ २ ३ १ २ ३ १ २ १ २र ३ २उ ३ १ २
पिबासुतस्यमतिर्नमधोश्चकानश्चारुर्मदाय ॥ १ ॥

यानि मया हवींषि दत्तानि तानि "प्र वह" "आ याहि" आगच्छ "शूर" वीर्यवन्! उपसर्गाक्षराणि—"हरिह" [अथवा हरितवर्णा हया यस्य स हरिहयः, तस्य सम्बोधनं क्रियते—हे हरिह! छान्दसो यकारलोपः]"पिबा"† "सुतस्य" सोमस्य उपसर्गाक्षराणि—"मतिर्नमधोश्चकानः", "चारुः" शोभनः "मदाय" भक्षणाय ॥ १ ॥

---

* 'इदानीं चतुर्थेऽहनि षोडशी भवति। तस्य षोडशिनः महान् विचारः इन्द्रश्च इत्यस्य समभवता मित्यारभ्य महान् विचारो निदानकृतेत्युक्तः चतुस्त्रिंशदक्षराणि स्तुता भवन्ति। तमुपसृत्य प्रवहादीनि उपसर्गाक्षराणि निरूप्यन्ते। तथा सति आदिमयाणां पादानां त्रीणि त्रीणि उपसर्गाक्षराणि पादान्तेषु भवन्ति'—इति वि० एवञ्च—

प्रथमर्चि—"प्रवह","हरिह","मतिर्न"—इति नव,
द्वितीयर्चि—"मध्यम","द्विषोन" "स्व२र्ण" इति नव,
तृतीयर्चि—"मित्रोन","यतिर्न","भृगुर्न"—इति नव,

किञ्च प्रथमर्चि चतुर्थपदादौ च "मधो२श्चकान"—इति षट्, तदित्थं सङ्कलनया चतुस्त्रिंशदुपसर्गाक्षराणि सम्पद्यन्ते। अत्र च "स्व२र्ण","मधो२"—इत्युभयत्र विनामस्य द्व्यक्षरत्वेन गणनं बहुविचारेण सम्पादितम् ॥

† "द्व्यचोऽतस्तिङः (६, ३, १३५)"—इति दीर्घः।

Digitized by Google

अथ द्वितीया।

१ २ ३ १२२ ३२१ १२ १ २ ३ २
इन्द्रजठरन्नव्यन्नपृणस्वमधोर्द्दिवोन।

१ २ ३१ २ ३ २   १ २ ३ १ २ १ २ १ २
अस्यसुतस्यस्वा॒ऽ३ऽर्नोपत्वामदाःसुवाचोअस्थुः॥ २ ॥

हे "इन्द्र!" "जठरम्" उदरं "नव्यं न" नवतरं "पृणस्व" पूरयस्व "मधोः" मधुरस्य "दिवो न" "अस्य" सोमस्य "सुतस्य" अभिषुतस्य "स्वर्न" स्वर्गस्येव "उप त्वा" उप समीपे त्वाम् "मदाः" "सुवाचः" शोभनवाचः "अस्थुः" स्थितवन्तः॥ २॥

अथ तृतीया।

१ २   ३ २   १ २उ   ३ १ २ ३ २उ ३ २
इन्द्रस्तुराषाण्मित्रोनजघानवृत्रंयतिर्न।

३ १ २ ३ २उ   ३ १ २ ३ २उ   ३ २ ३ १ २
विभेदवलम्भृगुर्नससाहेशत्रून्मदेसोमस्य॥ ३ ॥ २२

"इन्द्रः "तुराषाट्" [तुरि सीदति यः सः तुराषाट्] "मित्रो न" मित्र इव "जघान" "वृत्रं" शत्रुं "यतिर्न"—उपसर्गाश्चराणि "विभेद" भिन्दस्व "वलं" वलोनाम दानवस्तं वलं "भृगुर्न" नीणि नीणि पदान्तेषु उपसर्गाक्षराणि भवन्ति "ससाह" सहितवान् "शत्रून्" "मदे" भक्षणे कृते सोमस्य तथाच निविदापदे विहतस्य षोड़शिनः। अस्य मदे जरित इत्यारभ्य बहूनि वीर्ययुक्तानि कर्माणि* ॥ ३ ॥ २२

* एतत्पृचस्य व्याख्यानं विवरणकृत्कृतानुकृतमेवेति व्याचष्टोर्विशेषः।

५ १ १ ४ ५ १र
॥ गौरीवितम्* ॥ इन्द्र। जुषा३। स्वप्रवहा। आ
र र १ र १ ४
याहिशूरहरिहार२३। पाथिबासुता३१२३। समतिर्न्नो
१ र १ ४ ५ ४ ५
५मधोः। चाकानश्चा३१२३। रुम्मीवा। दा५योहा
५ ३ १ ४ ५ १ र
यि॥(१) इन्द्र। जठा३। रन्नव्यन्ना। पृणस्वमधोर्हि
र १ १ ४ १
वोना२३। आस्यसुता३१२३। स्यस्वर्न्ना५उपा। त्वाम
र १ ४र ५ ४ ५ ५
दाःसू३१२३। वाचोवा। आ५स्योहायि॥(२) इन्द्रः।
३ १ ४र ५र १ र १
तुरा३। षाणिमन्नोना। जघानवृत्रंयतिर्न्ना२३। बायि
र १ ४ १ र १ ४र
भेदवा३१२३। लंभृगुर्न्ना५ससा। छेशत्रून्मा३१२३। दे
५ ४ ५
सोवा। मा५स्योईहायि(३) ॥ २ † ॥ [१] २२

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य पञ्चमस्याध्यायस्य
सप्तमः खण्डः ॥ ७ ॥

---

* "गौरीवीतम्"—इति ख० पु० पाठः।

† ऊ० गा० ३प्र० १ख० २सा०।

Digitized by Google

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ५ ॥

॥ इति तृतीयस्यार्द्धः-प्रपाठकः* ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे पञ्चमोऽध्यायः ॥

---

* 'इति तृतीय-प्रपाठकस्य पञ्चमार्द्धः । चतुर्थमन्त्रः परिसमाप्तः'—इति वि० ।

Digitized by Google

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्म्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम्॥ ६ ॥

॥ अथ षष्ठोऽध्याय आरभ्यते* ॥

तत्र,

गोवित्पवस्वेति प्रथमे खण्डे—

प्रथमा।

२ ३ १ २ ३ १ २ ३ १
गोवित्पवस्ववसुविद्धिरण्यवि
२ ३ १ २ ३ १ २ ३ १ २
द्रेतोधाइन्दोभुवनेष्वर्पितः।
२ ३ १ २ ३ २उ
त्वꣳसुवीरोअसिसोमविश्ववित्त-
३ २३ १ २ ३ १र २र
न्त्वानरउपगिरेमआसते ॥ १ † ॥

हे "इन्दो" सोम ! त्वं "पवस्व" क्षर‡। कीदृशस्त्वं ? "गोवित्"¶ गवां लम्भकः, "वसुवित्"§ धनस्य लम्भकः, "हिरण्य-

---

* 'इदानीं षष्ठमध्यायमुच्यते'—इति वि०।

† ऋ० वे० ७,२,१९,४।

‡ 'पवस्व पूयस्व'—इति वि०।

¶ 'गोवित्—गावो यस्य विद्यन्ते स गोवित्'—इति वि०।

§ 'वसुवित्—वसु धनं तेन तद्वान्'—इति वि०।

Digitized by Google

वित्'* हिरण्यस्य लम्भकः, "रेतोधाः" रेत उदकं तस्य धातौषधीनां यद्वा रेतः प्रजनन-सामर्थ्यं तस्य धारयिता "भुवनेषु" उदकेषु "अर्पितः"; भो सोम! कीदृशस्त्वं? "सुवीरोऽसि"† शोभनवीर्योऽसि भवसीति, "विश्ववित्" सर्वस्य वेत्तासि। यस्मादेवं तस्मात् तादृशं "त्वा" त्वाम् "इमे" "नरः"‡ नेतारः "गिरा" स्तुत्या "उपासते"¶॥

"नरः"-विप्राः"—"इति पाठौ॥ १॥

अथ द्वितीया।

२ ३ १ २ ३ १ २
त्वन्नृचक्षाअसिसोमविश्वतः

१ २ ३ १र २र
पवमानवृषभताविधावसि।

१ २ ३ १ २ ३ १ २ ३ १
सनःपवस्ववसुमद्धिरण्यवद्वयꣳ

२ ३ १ २ ३ १ २
स्यामभुवनेषुजीवसे॥ २ §॥

---

* 'हिरण्यवित्--हिरण्यविशिष्टं वसु'—इति वि०।

† 'सुवीरः—शोभनवीरः'—इति वि०।

‡ 'नरः—ऋत्विजः'—इति वि०।

¶ 'उपासते—उप समीपे स्थित्वा आसते, समीपे उपविश्य गिरा स्तुतिलक्षणया वाचा इमे आसते स्तुतिं कुर्वाणाः'--इति वि०।

§ ऋ० वे० ७, १, १८, ४,।

Digitized by Google

भो "सोम!" त्वं "विश्वतः" सर्वतः सर्वेषु "भुवनेषु"* "नृचक्षाः† असि" नृणां द्रष्टा भवसि। हे "पवमान" पुनान सोम! "वृषभ" अपां वर्षक! "वाः" अपः "वि धावसि" विविधं गच्छसि, स त्वं "नः"‡ अस्माकं "पवस्व" क्षर किञ्च "वसुमत्" बहुभिर्वसुभिर्वासकैर्गवादि-द्रव्यैर्युक्तं, तथा "हिरण्यवत्" बहुभिः हिरण्यैर्युक्तं धनं। वयञ्च वसुभिर्हिरण्यैश्च युक्ताः "भुवनेषु" लोकेषु "जीवसे" जीवितुं प्रभवः "स्याम" भवेम॥ २॥

अथ तृतीया।

३ २ ३ १र २र ३ १ २
ईशानइमाभुवनानिईयस

३ १२ ३ १२३ १ २र
युजानइन्दोहरितःसुपर्ण्यः॥

१ २ ३ १२ ३ २उ ३
तास्तेक्षरन्तुमधुमद्घृतम्पय

१२३१२ ३१२
स्तवव्रतेसोमतिष्ठन्तुकृष्टयः॥ ३ ¶॥ १

हे "इन्दो" सोम! "ईशानः" सर्वस्य स्वामी त्वम् "इमा" इमानि "भुवनानि"§ भूतजातानि "ईयसे" गच्छसि [ईङ्

---

* 'भुवनेषु—भुवनानि चतुर्दश'—इति वि०।

† 'नृचक्षाः—नृणां चक्षुभूतः'—इति वि०।

‡ 'नः—अस्मभ्यम्'—इति वि०।

¶ ऋ० वे० ७, ३, १९, २।

§ 'भुवनानि—चतुर्दश—इति वि०।

Digitized by Google

गतौ (दि० प्रा०), "दिवादिभ्यः श्यन् (३,१,६९)"—इति श्यन्]। किङ्कुर्वन्? "हरितः" हरितवर्णाः "सुपर्ण्यः" सुपतमानाश्वा रथे "युजानः" योजयन्, "ताः" सुपर्ण्यः "ते" तव सम्बन्धिन्यः "मधुमत्" माधुर्योपेतं "घृतं" दीप्तं "पयः" उदकं "चरन्तु"। हे सोम! तव "व्रते" कर्मणि तिष्ठन्तु "कृष्टयः"* मनुष्याः सर्वे॥

"ईयसे"-"वीयसे"—इति पाठौ॥ ३॥ १

॥ द्विरभ्यस्तं तौम्रोत्तरम॥ गोवित्पवस्ववसुविद्धिर। ण्यवायित्। ण्यवा२३४५यित्। रेतो३१२३४। धाइन्दो भुवनेष। पिताःपिताः। तुवा३१२३४म्। सुवीरोअसि सोमवि। श्ववायिश्वावायित्। तन्वा३१२३४। नरउप गिरे। मश्रा३सा५ता६५६यि॥(१) त्वनृचक्षाअसिसो मवि। श्वताः। श्वता२३४५ः। पवा३१२३४। मानवृष भताविधा। वसायिवसायि। सना३१२३४ः। पवस्वव सुमद्धिर। ण्यवाण्यवात्। वया३१२३४म्। स्यामभुवने। षुजा३यिवा५सा६५६यि॥(२) ईशानइमाभुवनानिई।

* 'कृष्टयः—कवयः पण्डिताः मेधाविनः'—इति वि०।

१ २ १ १ १ १ १ १ २ २ १
यसायि। यसा२३४५यि। युजा३१२३४। नइन्दोहरितः

१ २ १ २ २र २ २
सुप। प्रियाप्रियाः। तास्ता२१२३४यि। चरन्तु मधु

१ २ १ २ १ २ १ २ र
मत्तम्। पयाःपयाः। नवा३१२३४। व्रतेसोमतिष्ठ।

१ २ ४
तुका३ई५या६५६ः(३) ॥ ७ * ॥ [१]

२र १ २ १ २ १ २
॥ श्येनम् ॥ गोवित्पवस्ववसुवायित्। हा२३यिरा।

१ १र १ २र ३ १ र १ र
ण्याविद्रे तो३चाउवा२३। धाइया। दोभुवनेषुवार्पायि

२ १ ५ २ १ र २ २र १
ताः। त्व०सौ३हो। वायिरोचसा३१उवा२३। सोम

२ १ २ १ ५ २ १ र १
पा। विश्ववित्तन्वाना१रा२ः। उयौ३हो। गायिरेम

२ २ २२ १ २ १ र २
स्त्रा३१उवा२३। ए३। सतथा३२ ॥(१) त्वन्नृचक्षाअसि

१ २ १ २ २र २ २
सो। मा२३वायि। स्वातःपवा३१उवा२३। मानथा।

१र ५ २ १ ५ २ १ २
वृषभताविधावासायि। सनौ३हो। पावस्वा३१उवा

२ ३ २ १ २ १ ५ २
२३। सुमदा। हिरण्यवदया०स्या१मा२। भवौ३हो।

---

* ऊ० गा० ८प्र० २ख० ७गा०।

१　२　　२　२२१　　१र २ १ २ १र
नायिषुजा३१उवा२३। ए३। वसवा३२॥(२) ईशानइमा

२१　२　१ र २　　१र २ २
भुवना। ना२३ई। यासेयुजा३१उवा२३। नाइया।

र १　२　१र ऽ ऽ　१　२
दोहरितःसुपार्णयाः। तास्तौ३हो। चारन्तुमा३१उवा

२ २ १　१　२　१र ऽ २
२३। धूमदा। घृतम्पयस्तवाब्रा१ता२यि। सोमौ३हो।

१　२　२　२२१
मायिष्ठन्तुवा३१उवा२३। ए३। छयवा३२(३)॥१८७॥ [२]१

अथ द्वितीयर्चे—

प्रथमा।

१ २　　२ १ २ १ २
पवमानस्यविश्वविद्प्रतेसर्गाअसृक्षत।

१ २　२ १ २ १ २
सूर्यस्येवनरश्मयः॥ १ †॥

हे "विश्ववित्" विश्वस्य द्रष्टः सोम! "पवमानस्य" क्षरतः "ते" तव "सर्गाः"‡ सृज्यमाना धाराः "सूर्यस्येव रश्मयः" सूर्यस्य किरणा इव प्रकाशमानाः "न"—इति सम्प्रत्यर्थे। इदानीं "प्रासृक्षत" प्रासृज्यन्त॥ १॥

* ऊ० गा० १३प्र० १ख० १८गा०।

† ऋ० वे० ७, १, २७, १।

‡ 'सर्गाः—स्रष्टवः उदकसङ्घाताः'—इति वि०।

Digitized by Google

अथ द्वितीया।

१ २ २ १ २ १ ३ २ ३ १ २ ३ १ २

केतुङ्कृण्वन्दिवस्परिविश्वारूपाभ्यर्षसि।

३ १ २

समुद्रःसोमपिन्वसे॥ २ *॥

हे "सोम!" "समुद्रः"† समुद् द्रवन्ति यस्माद्रसाः स समुद्रः स त्वं "केतुं"‡ प्रज्ञानं "कृण्वन्" कुर्वन् अस्माकं "विश्वा रूपा" विश्वानि रूपाणि "दिवः"¶ अन्तरिक्षात् "अभ्यर्षसि"§ अभि पवसे "पिन्वसे" नानाविधानि च धनानि अस्मभ्यं प्रयच्छसि॥२॥

अथ तृतीया।

३ १२ ३२ ३१२ ३ १ २

जज्ञानोवाचमिष्यसिपवमानविधर्मणि।

१ २ ३ १२ ३२

क्रन्दन्देवोनसूर्यः॥ ३ ||॥ २

हे "पवमान" सोम! "देवः न सूर्यः" द्योतमानः सूर्य इव "जज्ञानः" प्रादुर्भूतस्त्वं "विधर्मणि" विधारके** दशापवित्रे "क्रन्दन्" ध्वनन् "वाचम्" शब्दम् "इष्यसि" प्रेरयसि॥

---

* ऋ० वे० ७, १, २७, २।

† 'समुद्रः—समुद्रभूतस्त्वम्'—इति वि०।

‡ 'केतुध्वजः तम्'—इति वि०।

¶ 'दिवस्परि—द्युलोकस्योपरि—इति वि०।

§ 'अभ्यर्षसि—आभिमुख्येन रक्षसि'—इति वि०।

|| ऋ० वे० ७, १, २७, ४।

** 'विधर्मणि—विविधे कर्मणि'—इति वि०।

Digitized by Google

"जग्मान:"-"हिन्वान:' —इति पाठौ,"क्रन्दन्""अक्रान्"—इति च ॥ ३ ॥ २

प्रसोमासइति समर्च्चं तृतीयं सूक्तम्;

तत्र, प्रथमा।

१र २र ३ १ २ ३ १ २
प्रसोमासोअधन्विषुःपवमानासइन्दवः।
१ २ ३ १ २
श्रीणानाअप्सुवृञ्जते ॥ १ * ॥

"पवमानासः" पूयमानाः "इन्दवः" दीप्ताः "सोमासः" सोमाः "प्राधन्विषुः" [धन्वति गतिकर्मा (निघ० २,१४,६४)] प्रगच्छन्ति किञ्च "श्रीणानाः"† गोभिः श्रयमाणाः "अप्सु" वसतीवरीषु‡ "वृजन्ते" गच्छन्ति [व्रज व्रजी गतौ (भ्वा०,प०)] सम्पृक्ता भवन्तीत्यर्थः॥

"वृजन्ते"-"मृजन्त"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

३ १र २र ३ १ ३ १ ३ १ १ २ ३ २
अभिगावोअधन्विषुरापोनप्रवतायतीः।
३ १र २र
पुनानाइन्द्रमाशत ॥ २ ¶ ॥

* ऋ० वे० ६, ८, १४, १।

† 'श्रीणाना:—श्रीणनं मिश्रणं, मिश्रयमाणाः'—इति वि०।

‡ 'अप्सु—सप्तम्या बहुवचनमिदं तृतीया-बहुवचनस्य स्थाने द्रष्टव्यम्, अद्भिः—इति वि०।

¶ ऋ० वे० ६, ८, १४, २।

"गावः" गमनशीलाः* "इन्दवः" सोमाः "अभि अधन्विषुः" दशापवित्रमभिगच्छन्ति । किमिव ? "प्रवता" प्रवणवता देशेन "यतीः" गच्छन्त्यः "आपः नः" आपइव †, पश्चात् "पुनाना" "इन्द्रं" प्रणीयितुम् आशत व्याप्नुवन् ॥२॥

अथ तृतीया ।

१ २ ३ १२ ३२ ३ १ २
प्रपवमानधन्वसिसोमेन्द्रायमादनः ।
१ २३ १२ ३२
नृभिर्यतोविनीयसे ॥ ३‡ ॥

हे "पवमान" सोम ! "इन्द्राय" इन्द्रस्य "मादनः" मादयिता त्वं "प्रधन्वसि" प्रगच्छसि पवित्रम् । तदेवाह—"नृभिः" नेतृभिः ऋत्विग्भिः "यतः" गृहीतः¶ "विनीयसे"§ हविर्धानात्‖ ॥

"मादनः--"पातवे"—इति पाठो ॥३॥

---

* 'गावः—आदित्यरश्मयः उदकानि सोमरसा गावश्च'—इति वि० ।

† 'आपोन—न-शब्द उपमार्थीयः आपइव "प्रवता यतीः" यथा प्रवणेन आपो गच्छन्ति तद्वत् सोमेन अभिपूयमानेन गावो धन-धान्य-देवताय प्रवणा भवन्ति, अतएव पुनाना इन्द्रमाशत'—इति वि० ।

‡ ऋ० वे० ९, ८, १४, २ ।

¶ 'यतः—नियतः संयत इति यावत्, अथवा यमु बन्धने ऋत्विग्भिर्बद्धः सोमबन्धनेन'—इति वि० ।

§ 'विनीयसे—विविधं नीयसे'—इति वि० ।

‖ 'अथवा पवमान प्रधन्वसि पात्रं प्रतीन्द्रपानाय तदर्थं हविर्धानात् विनीयसे'—इति अस्मद्देशीयव्याख्या ।

अथ चतुर्थी ।

२ ३ १२ ३१२ २ ३ ३१२ ३ १ २

इन्दोयदद्रिभिःसुतःपवित्रम्परिदीयसे ।

३ २ ३ २३ ३ १ २

अरमिन्द्रस्यधाम्ने ॥ ४ * ॥

हे "इन्दो" त्वं "यद्" यदा "अद्रिभिः" ग्रावभिः "सुतः" अभिषुतः "पवित्रं" दशापवित्रं † "परिदीयसे" परिगच्छसीत्यर्थः । तदा "इन्द्रस्य" "धाम्ने" स्थानाय धारकायोदराय वा "अरं" पर्याप्तोऽसि ॥

"परिदीयसे"--"परिधावसि"—इति पाठो ॥ ४ ॥

अथ पञ्चमी ।

१ २ ३१ २ ३ १२ ३ १ २

त्वꣳसोमनृमादनःपवस्वचर्षणीधृतिः ।

२ ३ १ २ ३ १ २

सस्निर्योअनुमाद्यः ॥ ५ ‡ ॥

हे "सोम !" "नृमादनः नृणां मादयिता "चर्षणीधृतिः" चर्षणीभिः ऋत्विग्भिः प्रजाभिः धृतस्त्वं "पवस्व" । "यः" त्वं "सस्निः" शुद्धः "अनुमाद्यः" स्तुत्यः ¶ स पवस्वेति समन्वयः ॥

"चर्षणीधृतिः"-"चर्षणीसहे"—इति पाठो ॥ ५ ॥

---

* ऋ० वे० ६, ८, १४, ४ ।

† 'पवित्रं परिदीयसे—द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् पवित्रस्योपरि दीयसे'—इति वि० ।

‡ ऋ० वे० ६, ८, १४, ५ ।

¶ 'अनुमाद्यः—यस्य पश्चात् देवता माद्यन्ति स अनुमाद्यः'—इति वि० ।

अथ षष्ठी।

१ २ २ १ २ २ १ २ २ १ २
पवस्ववृत्रहन्तमउक्थेभिरनुमाद्यः।
१ २ ३ १ २ ३ २
शुचिःपावकोअद्भुतः॥ ६* ॥

हे सोम! "वृत्रहन्तमः" शत्रूणामतिशयेन हन्ता त्वं "पवस्व" चर। कीदृशस्त्वम्? "उक्थेभिः" शस्त्रैः "अनुमाद्यः" स्तुत्यः "शुचिः" शुद्धः† "पावकः" अन्यस्य शोधकः‡ "अद्भुतः" महान्¶, एवं महानुभावः पवस्व॥

"वृत्रहन्तमः"-"वृत्रहन्तम"—इति पाठौ॥ ६॥

अथ सप्तमी।

१ २ २ १ २ २ १ २ ३ १ २ २
शुचिःपावकउच्यतेसोमःसुतःसमधुमान्।
२ १ २ ३ २
देवावीरघशꣳसहा॥ ७§ ॥ ३

"सुतः" अभिषुतः "मधुमान्" माधुर्योपेतः "सः" सोमः "शुचिः" स्वयं शुद्धः "पावकः" शोधकश्च उच्यते तथा "देवावीः" देवाना-

---

* ऋ० वे० ६, ८, १४, ६।

† 'शुचिः—दीप्तः'—इति वि०।

‡ 'पावकः—पावन स्वभावः'—इति वि०।

¶ 'अद्भुतः—अपूर्वः नाम्नो द्वितीयः'—इति वि०।

§ ऋ० वे० ६ ८, १४, ७।

मविता तर्पयिता* "अघसंसहा" अघं पापं शंसतीत्यघशंसा असुरास्तेषां हन्तेति चोच्यते ॥

"सुतःसमधुमान्"-"सुतस्समध्वः"—इति पाठौ ॥ ७ ॥ ३

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीय-खण्डे—

प्रकविरिति समर्चं प्रथमं सूक्तम्;

तत्र, प्रथमा।

१२ २३१२ ३१२ ३ १ २
प्रकविर्देववीतयेऽव्यावारेभिरव्यत।

२ १ ३२ ३१२ ३२
साह्वान्विश्वाअभिस्पृधः ॥ १ † ॥

"कविः" मेधावी सोमः "देववीतये" देवानां पानाय "अव्यावारेभिः" अविसम्बन्धिभिः वालैः दशापवित्रेण "अव्यत" अव्यते प्राप्यते, "साह्वान्" अभिभवितां साढा‡ सोमः "विश्वाः स्पृधः" सर्वान् सङ्ग्रामान् हिंसकान् वा अभिभवतीति शेषः ॥

"अव्यावारेभिरव्यत"-"अव्योवारेभिरर्षति"—इति पाठौ ॥ १ ॥

---

* 'देवावीः—देवानां अवनभूतः'—इति वि०।

† ऋ० वे० ६, ८, १०, २।

‡ 'साह्वान्—साधन-स्वभावः'—इति वि०।

अथ द्वितीया ।

१२ १२ ३ २ ३२उ ३ १ २ ३ १ २
सहिष्माजरितृभ्यआवाजङ्गोमन्तमिन्वति ।
१ २ ३ १ २
पवमानःसहस्रिणम् ॥ २ * ॥

"स हि ष्मा" स खलु "पवमानः" सोमः "जरितृभ्यः" स्तोतृभ्यः "गोमन्तं" "बहुभिर्गोभिर्युक्तं" "सहस्रिणं" सहस्र-सङ्ख्याकं "वाजम्" अन्नम् "आ" आभिमुख्येन "इन्वति" व्याप्नोति प्रयच्छतीत्यर्थः ॥ २ ॥

अथ तृतीया ।

३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ २
परिविश्वानिचेतसामृज्यसेपवसेमती ।
१ २ ३ १ २
सनःसोमश्रवोविदः ॥ ३ ‡ ॥

हे "सोम !" त्वं "चेतसा" त्वदीयेनास्मदनुकूलेन चित्तेन "विश्वानि" सर्वाणि धनानि "मती" मत्या अस्मत्स्तुत्या "मृज्यसे" दशापवित्रेण शोध्यसे । ततः "पवसे" रसं क्षरसि ।

* ऋ० वे० ६, ८, १०, २ ।

† 'सहस्रिणं—सहस्र-पोषण-समर्थम्'—इति वि० ।

‡ ऋ० वे० ६, ८, १०, ३ ।

Digitized by Google

एवम्भूतः "सः" त्वं "नः" अस्मभ्यं "श्रवः" अन्नं* "विदः"† देहीति शेषः॥

"मृज्यसे"-"मृशसे"—इति पाठौ॥ ३॥

अथ चतुर्थी।

३क २र ३ १ २   २र ३ १ २   ३ १ ३ २

अभ्यर्षबृहद्यशोमघवद्भ्योध्रुवꣳरयिम्।

१ २ ३   २ ३ १ २

इषꣳस्तोतृभ्यआभर॥ ४ ‡॥

हे "सोम!" त्वं "बृहद् यशः" महतीं कीर्त्तिम् "अभ्यर्ष" अभिगमय, "मघवद्भ्यः" हविष्मद्भ्यः¶ अस्मभ्यं "ध्रुवं"§ रयिं "धनं" च अभ्यर्ष। किञ्च "इषम्" अन्नं|| "स्तोतृभ्यः" अस्मभ्यम्** "आभर" आहर॥ ४॥

अथ पञ्चमी।

१   ३र   ३ १र   २र १ १   २

त्वꣳराजेवसुव्रतोगिरःसोमाविवेशिथ।

३ १ २

पुनानोवह्नेअद्भुत॥ ५ ††॥

---

* 'श्रवः—अन्नं यशो वा'—इति वि०।

† 'विदः—विद ज्ञाने, विद्लृ लाभे, विद सत्तायाम्। अन्नलाभकरः'-इति वि०।

‡ ऋ० वे० ९, ८, १०, ४।

¶ 'मघवद्भ्यो यजमानेभ्यः—इति वि०।

§ 'ध्रुवं स्थिरं'—इति वि०।

|| 'इषम् अन्नं इष्टिं वा'—इति वि०।

** 'स्तोतृभ्यः यजमानेभ्यः'—इति वि०।   †† ऋ० वे० ९, ८, १०, ५।

Digitized by Google

हे "वक्के" यज्ञादेर्वोढः! "अद्भुत!"* "सोम!" "सुव्रतः" सुकर्मा "पुनानः" त्वं "राजा इव" "गिरः" अस्मदीयाः "स्तुतीः "आविवेशिथ" आविशसि ॥ ५ ॥

अथ षष्ठी।

१र २र१ २ २१२ ३ १ २ ३ १ २
सवह्निरप्सुदुष्टरोमृज्यमानोगभस्त्योः।

१ २ ३१२
सोमश्चमूषुसीदति ॥ ६ † ॥

"सः" सोमः "वह्निः" यज्ञादेर्वोढा "अप्सु" अन्तरिक्षे वर्त्तमानः "दुष्टरः" दुःखेन अन्यैस्तरणीयः "मृज्यमानः" शोध्यमानः "गभस्त्योः" हस्तयोः‡ एवम्भूतः सन् "चमूषु" पात्रेषु "सीदति"¶ ॥ ६ ॥

अथ सप्तमी।

३ २ ३ १र १र ३ २ ३ १ २
क्रीडुर्मखोनमꣳहयुःपवित्रꣳसोमगच्छसि।

१ २ ३ २ ३ १ २
दधत्स्तोत्रे सुवीर्य्यम् ॥ ७ § ॥ ४

* 'अद्भुतमभूतपूर्वं'—इति वि०।

† ऋ० वे० ६, ८, १०, ६।

‡ 'गभस्त्योः—बाह्वोः'—इति वि०।

¶ 'चमूषु सीदति—भक्षणीयेषु तिष्ठति'—इति वि०।

§ ऋ० वे० ६, ८, १०, ७।

Digitized by Google

हे "सोम!" "क्रीडुः" क्रीडन-शीलस्त्वं "मंहयुः"* [मंहति-दानकर्मा (निघ० ३,२०,१०) दानेच्छुः "मखो न" दानमिव "पवित्र" "गच्छसि"। किं कुर्वन्? "स्तोत्रे" स्तुतिकर्त्रे "सुवीर्य" शोभन-वीर्यं "दधत्" प्रयच्छन् ॥ ७॥ ४

अथ यवंयवमिति चतुर्ऋचं द्वितीयं सूक्तं;

तत्र, प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १ २

यवंयवन्नोअन्धसापुष्टम्पुष्टम्परिस्रव।

१ २ ३ १ २

विश्वाचसोमसौभगा ॥ १† ॥

हे "सोम"! त्वं "नः" अस्मभ्यम् "पुष्टंपुष्टम्"‡ अत्यन्तं बहुलं "यवंयवं"¶ पुनःपुनर्घृतं रसम् "अन्धसा" अन्नरूपया धारया "परिस्रव" क्षर [तत्र प्रार्थयितुस्तृष्णयात्यन्तं पीड़ितत्वात् "आबाधे च (८,१,१०)"—इति द्विर्भावः। आबाधनमाबाधः पीड़ा प्रयोक्तृधर्मो नाभिधेयधर्म इत्युक्तम्]। अपिच "विश्वा" विश्वानि "सौभगा"§ सौभगानि धनानि परिस्रव अस्मभ्यं प्रयच्छेत्यर्थः॥ १॥

---

* 'मंहयुः—पूजेयुः अथवा मंहयुः पूजाकारः'—इति वि०।

† ऋ० वे० ७, १, ११, १।

‡ 'परिस्रवसामान्या पुष्टिः धनधान्यादिना वर्द्धमानिका पुष्टि र्धनमित्यादिका'—इति वि०।

¶ 'यवं—अभ्यासे भूयामर्थः प्रतीयते। यवं धान्यविशेषं यवपुरोडाशेभ्यो वे गु-भूतम्'—इति वि०

§ "सुपांसुलुक् (७, १, ३९)"—इत्याले रूपम्।

Digitized by Google

अथ द्वितीया।

१ २ २ १ २ १ २ ३ १ २ ३ १२ १२
इन्दोयथातवस्तवोयथातेजातमन्धसः।
२ १ १ २ ३ १ २
निबर्हिषिप्रियेसदः॥ २* ॥

हे "इन्दो" सोम! "अन्धसः" अन्नरूपस्य "तव" सम्बन्धी "स्तवः" स्तवनं स्तोत्रं† तथा "ते" तव "यथा जातं" यथा प्रादुर्भूतमस्ति, तथा त्वं "प्रिये" प्रीणयितरि "बर्हिषि" अस्मद्यज्ञे "नि सदः"‡ निषण्णो भव॥ २॥

अथ तृतीया।

३ १ २ ३ १ २ ३ १२ २२ ३ १ २
उतनोगोविदश्ववित्पवस्वसोमान्धसा।
३ १ २ ३ १ २
मक्षूतमेभिरहभिः॥ ३¶ ॥

"उत" अपि च हे "सोम!" "नः"§ अस्माकं "गोवित्" गोप्रदः॥ "अश्ववित्" अश्वप्रदश्च त्वं** "मक्षुतमेभिः" मक्षुतमै अतिशयेन शीघ्रैः "अहभिः" अहोभिर्हेतुभिः "अन्धसा पवस्व" अन्नरूपया धारया क्षर॥ ३॥

* 'तव स्तवः क्रियते स्तोत्र-प्रकारात्मकः'—इति वि०।

† ऋ० वे० ७, १, १२, २।

‡ 'नि—नितराम्'—इति वि०।

¶ 'नः—अस्मभ्यम्'—इति वि०

§ ऋ० वे० ७, १, १२, ३।

|| 'गोवित्—गोमान्'—इति वि०

** 'अश्ववित्—अश्ववान्'—इति वि०।

Digitized by Google

अथ चतुर्थी ।

२ ३ २ ३ १र २र३ २ १ २ ३ १ २
योजिनातिनजीयतेहन्तिशत्रुमभीत्य ।
१ २
सपवस्वसहस्रजित् ॥ ४ * ॥ ५

हे "सहस्रजित्" असङ्ख्यात-शत्रूणां जेतः ! † सोम ! "यः" भवान् "जिनाति" शत्रून् जयति स्वयं शत्रुभिः "न जीयते"। प्रकारान्तरेण तदेवाह—"शत्रुमभीत्य" स्वयमेव शत्रुमागत्य "हन्ति" किन्तु तेन न हन्यते इति शेषः। एवम्भूतः स त्वं धारया चर ॥ ४ ॥ ५

अथ तृचात्मके तृतीयसूक्ते—

प्रथमा ।

२ ३ १ २ ३ १र २र ३ २ १
यास्तेधारामधुश्चुतोऽसृग्रमिन्दऊतये ।
१ २ ३ २ ३ १ २
ताभिःपवित्रमासदः ॥ १ ‡ ॥

भो "इन्दो" सोम ! "ते" तव "मधुश्चुतः" मधुर-रसस्य श्चोतयित्र्यः "याः" "धाराः" "ऊतये" रक्षणाय "असृग्रं" सृज्यन्ते "ताभिः" धाराभिः त्वं "पवित्रम्"¶ "आसदः" आसीद ॥ १ ॥

---

* ऋ० वे० ७, १, १२, ४ ।

† 'स पवस्व सहस्रजित् सहस्राणां जेता'—इति वि० ।

‡ ऋ० वे० ७, १, २५, १ ।

¶ 'पवित्रं'—इमापवित्रम्'—इति वि० ।

अथ द्वितीया।

२ ३ १ २ ३ १ २ ३ १र २र ३ १ २

सोअर्षेन्द्रायपीतयेतिरोवाराण्यव्यया।

१ २ ३ २ ३ १ ३ २

सीदन्नृतस्ययोनिमा॥ २ *॥

हे सोम! "सः" अभिषुतः त्वम् "अव्यया" अविमयानि "वाराणि" वालानि "तिरः" तिरस्कुर्वन् "ऋतस्य" यज्ञस्य "योनिं" कारणभूतं दशापवित्रम् "आसीदन्" आभिमुख्येन उपविशन् "इन्द्राय" इन्द्रस्य "पीतये" पानाय "अर्ष" चर॥

"ऋतस्ययोनिमासीदन्"-"योनावनेषु"—इति पाठौ॥ २॥

अथ तृतीया।

१ २ ३ १ २ ३ १ २ ३ १ २

त्वꣳसोमपरिस्रवस्वादिष्ठोअङ्गिरोभ्यः।

३ २१ १र २र

वरिवोविद्घृतम्पयः॥ ३ †॥ ६

हे "सोम!" "स्वादिष्ठः" स्वादुतमः "वरिवोवित्"‡ अस्म-दभिलषितस्य धनस्य लम्भकश्च त्वम् "अङ्गिरोभ्यः" अङ्गिरसा-

---

* ऋ० वे० ७, १, २५, २।

† ऋ० वे० ७, १, २५, ४।

‡ 'वरिवोवित्—वरिवः=वरिष्ठः, वित्=भवः'—इति वि०।

मर्थाय* "घृतं" दीप्तं† "पयः" क्षीरवत् सारभूतं रसं "परिस्रव" परिक्षर ॥

"त्वं सोम"-"त्वमिन्दो" —इति पाठौ ॥ ३ ॥ ६ ॥

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य
द्वितीयः खण्डः‡ ॥ २ ॥

अथ तृतीय-खण्डे¶—

प्रथम-तृचे, प्रथमा ।

१ २ १ २ ३क २र ३ २ ३
तवश्रियोवर्ष्यस्येवविद्युतो

१र २ ३ १ २ ३ १ २
ग्ने श्चिकित्रउषसामिवेतयः ।

१र २र ३ १ २ ३ १ २ ३
यदोषधीरभिसृष्टोवनानिच

१ २ ३ १ २ ३ १र ३र २ १ २
परिस्वयश्चिनुषेअन्नमासनि ॥ १ §॥

"अग्नेः" अङ्गनादि-गुण-युक्तस्य "तव" "श्रियः" रश्मि-लक्षणा विभूतयः "चिकित्रे" प्रज्ञायन्ते । तत्र दृष्टान्तः—"वर्षस्येव॥

---

* 'अङ्गिरोभ्यः—अङ्गिरो नाम देवास्तेभ्योऽर्थे'—इति वि० ।

† "घृतमाज्यम्"—इति क्रमं दीयव्याख्या ।

‡ 'उक्तं वक्ष्यमाणं । चित्रवं सौमिकञ्च तत् । पवमानः'—इति वि० ।

¶ 'इदानीमाग्न्यानि; आग्नेयमग्रममाज्यम्'—इति वि० ।

§ ऋ० वे० ८, ४, २०, ५ ।

॥ मूले तु "वर्षस्येव ,, —इति ष-वकारः श्रूयते ।

विद्युतः” यथा वर्षितुर्मेघस्य सम्बन्धिन्यो विद्युतः, “उषसामिवेतयः” यथा चोषसाम् ‘एतयः’ गमनशीलाः श्यामाः प्रकाशाः प्रशायन्ते, तद्वदित्यर्थः। कदेत्यचाह—“यद्” “यदा” त्वम् “श्रोषधीः” व्रीहियवाद्याः “वनानि” श्ररण्यानि च श्रभिसृष्टो सृष्टः दग्धुं विसृष्टः सन् “स्वयम्” श्रात्मना “श्रासन्” श्रास्ये मुखे “श्रन्नम्”श्रदनीयं स्थावर-लक्षणं“परि चिनुषे”परिक्षिपसीत्यर्थः॥

“विद्युतोऽग्ने:”-“विद्युतश्चित्रा”—इति, “उषसामकेतवः”-“उषसामिवेतयः”—इति पाठौ॥ १॥

अथ द्वितीया।

१ २ ३ १उ २ १ २
वातोपजूतइषितोवशाँ२अनु

३ १उ ३ १ २ ३ १ २
तृषुयदन्नावेविषद्वितिष्ठसे।

१ २ ३ २ २ ३ २ १
श्रातेयतन्तेरथ्यो२३यथापृथक्

१ २ ३ १ २ ३ १ २
शर्द्धाँ२स्यग्ने अजरस्यधक्षतः॥ २* ॥

हे “अग्ने!” त्वं “यद्”यदा “वातोपजूतः” वायुना कम्पितः† “वशान्” कान्तान् वनस्पतीन् ‘अनु” प्रति “तृषु” क्षिप्रम्

---

* ऋ० वे० ८, ४, २१, २।

† ‘वातोपजूतः—वातयुक्तः’—इति वि०।

"इषितः" प्रेषितश्च* सन् "अन्ना" अन्नानि अदनीयानि वनस्पत्यादीनि स्थावराणि "वेविषत्" व्याप्नुवन् "वितिष्ठसे" इतस्ततो गच्छति; तदानीम् "अजरस्य" जरा-रहितस्य "धक्षतः" दहतः "ते" तव "अर्चींषि"† तेजांसि "यथा" "रथ्यः" रथिनः तद्वत् "आ पृथक्" पृथगायन्त गच्छन्ति ॥

"अजरस्य"-"अजराणि"—इति पाठौ ॥ २ ॥

अथ तृतीया।

२ १ २ १ २ ३ १ २
मेधाकारं विदथस्य प्रसाधन
३ १र २र ३ १ २ ३ १
मग्निꣳ होतारं परिभूतरं मतिम्।
१र २र ३ १ २ ३ २उ
त्वामर्भस्य हविषः समानमित्त्वां
३ १ २ ३ २
महोवृणते नान्यन्त्वत्॥ ३‡ ॥ ७

"मेधाकारं" प्रज्ञायाः कर्त्तारं "विदथस्य" यज्ञस्य "प्रसाधनम्" प्रकर्षेण साधकं "होतारं" देवानामाह्वातारं "परिभूतरम्" अतिशयेन शत्रूणा मभिभवितारं "मतिं" मन्तारं "यं" "त्वाम्" "अग्निम्" वयमृत्विजः वृणीमहे—इति शेषः। हे अग्ने! "त्वामित्" त्वामेव "अर्भस्य" अल्पस्यास्य "हविषः"

---

* 'इषितः—इषु इच्छायाम्, इच्छासंयुक्तः'—इति वि०।

† 'अर्चींषि—बलानि'—इति वि०।

‡ ऋ० वे० ८, ४, १९, २।

Digitized by Google

पुरोडाशादिकस्य भक्षणार्थमिति शेषः। "समानमित्" सहैव ऋत्विजः "वृणते" प्रार्थयन्ते "मह:" महतः सोमात्मकस्य हविषः भक्षणार्थं त्वामेव वृणते "त्वत्" त्वत्तः "अन्यम्" अतिरिक्तं देवं "न" वृणते॥

"परिभूतरं"-"परिभूतमम्"—इति छन्दोगबह्वृचानां पाठौ, "त्वामभक्षस्य हविषः"-"तमिद्‌मस्य हविषि"—इति, "इत्त्वाम्मह्यो"-"तमिम्मह्यो"—इति च॥ ३॥ ७

अथ द्वितीय-तृचे—प्रथमा।

२ १ २ ३ १२ ३१२ ३ १ २

पुरुरुणाचिध्यस्त्यवोनूनंवांवरुण।

२ ३१ २ ३ १

मित्रवꣳसिवाꣳसुमतिम्॥ १ *॥

हे मित्रावरुणौ! "वां" युवयोः "पुरुरुणा" [प्रथमार्थे तृतीया (७,१,८५)† पुरोरपि बहु उरु बहुतरम् अथवा पुरु च तदुरु च पुरुरु] अत्यन्तं बहुतरमित्यर्थः, तादृक् "अवः" रक्षणं "नूनं" निश्चयेन "अस्ति हि" [हि प्रसिद्धौ; चिदिति पूरणः] हे "वरुण!" हे "मित्र!" "वां" युवयोः "सुमतिम्" अनुग्रहबुद्धिम् "वंसि"‡ सम्भजेयम्॥ १॥

---

* ऋ० वे० ४, ४, ८, १।

† "अत्र सोः सुपांसुलुगित्याकारः"—इति ऋ०-व्याख्या।

‡ 'वंसि—याचयसि'—इति वि०।

अथ द्वितीया ।

१ २ २ १ २ २ १ २ १ २

तावाꣳसम्यगद्रुह्वाणेषमश्याम धाम च ।

२ १ २

वयंवाम्मित्रास्याम ॥ २* ॥

हे "अद्रुह्वाणा" हे अद्रोग्धारौ ! "ता" तौ प्रसिद्धौ "वां" युवां सम्यक् स्तुमइति शेषः । स्तोतारः "वयम्" "इषम्" अन्नं "धाम च" आधारम् "अश्याम" प्राप्नुयाम । हे "मित्रा" मित्रावरुणौ ! "वां" स्तोतारौ वयं "स्याम" भवेम सन्तता इति शेषः, युवाभ्यां स्वभूता वा स्याम ॥

"धामच"-"धायसे"—इति पाठौ, "मित्रा"-"रुद्रा"—इति च ॥ २ ॥

अथ तृतीया ।

२ १ २ २ १ २ २ १ २ २ २

पातन्नोमित्रापायुभिरुतत्रायेथाꣳसुत्रात्रा ।

२ २ २ १ २ २ १ २

साह्यामदस्यून्तनूभिः ॥ ३† ॥ ८

हे "मित्रा" मित्रावरुणौ देवौ ! युवां "नः" अस्मान् "पायुभिः" रक्षणैः "पातं" रक्षतम् । "उत" अपिच "सुत्रात्रा" शोभनेन

* ऋ० वे० ४, ४, ८, २ ।

† ऋ० वे० ४, ४, ८, ३ ।

Digitized by Google

त्राणेन "त्रायेथां" पालयेथाम् [इष्टप्रापणानिष्ट-परिहार-भेदेन भेदः—स्तोत्रादि-वैकल्याच्छत्रोर्वा त्रायेथाम् अभिमत-प्रापणेन रक्षतमित्यर्थः]। वयञ्च "तनूभिः" * पुत्रादिभिः सहिताः स्तोत्रैरङ्गैर्वा "दस्यून्" शत्रून् "सह्याम" अभिभवेम ॥

"मित्रा"-"रुद्रा"—इति पाठौ, "त्रायेथां"-"त्रायेताम्"—इति, "सह्याम"-"तुर्याम"—इति च ॥ ३ ॥ ८

अथ तृतीय-तृचे †—

प्रथमा।

३ २ ३ १ २ ३ १ ३ १र २र

उत्तिष्ठन्नोजसासहपीत्वाशिप्रे अवेपयः।

१ १ २ ३ २ ३

सोममिन्द्रचमूसुतम् ॥ १‡ ॥

हे "इन्द्र!" त्वं "पीत्वा" "ओजसा" बलेन "सह" "उत्तिष्ठन्" ¶ "शिप्रे" हनू "अवेपयः" अकम्पयः मदावेशादिति भावः। किं पीत्वा? "चमू" चम्वोरधिषवण-फलकयोः "सुतम्" अभिषुतम् "सोमम्" ॥

"पीत्वा"-"पीत्वी"—इति पाठौ ॥ १ ॥

---

* 'तनूभिः—त्रिभिः पुत्रभिः शरीरैरभिहुतैरिति वाक्यशेषः'—इति वि०।

† 'ऐन्द्रसाम्यम्'—इति वि०।

‡ ऋ० वे० ८, ३९ = ऋ० वे० ६, ४, २८, ४।

¶ 'उत्तिष्ठन्—ओजसा सह वीर्येण उत्थानं कुरु। सोमं पिब। पीत्वा शिप्रे हनूनासिके च मत्तः सन् अवेपयः'—इति वि०।

Digitized by Google

अथ द्वितीया ।

१ २ ३ १ २ ३ १र २र
अनुत्वारोदसीउभेस्पर्द्धमानमददेताम् ।
२ ३ १ २ ३ १ २
इन्द्रयद्दस्युहाभवः ॥ २* ॥

हे "स्पर्द्धमान" शत्रुभिः सह स्पर्द्धां कुर्वाण इन्द्र ! "त्वा" त्वाम् "अनु" लक्ष्य "उभे रोदसी" उभे अपि द्यावापृथिव्यौ "अददेतां" हृष्येताम् "यद्" यदा "दस्युहा भवः" शत्रूणां हन्ता भवसि, तदा अददेतामिति सम्बन्धः ॥

"स्पर्द्धमानमददेतां"-"क्रक्षमाणमकृपेताम्"—इति पाठौ ॥२ ॥

अथ तृतीया ।

१ २३१ २ ३१र २र २ १ २
वाचमष्टापदीमहन्नवस्रक्तिमृतावृधम् ।
२ ३ १ २ ३क २र
इन्द्रात्परितन्वम्ममे ॥ ३† ॥ ९

"अष्टापदीम्" अष्टाभिर्दिग्भिर्विदिग्भिश्चाष्टापदीं,‡ "नवस्रक्तिम्" उपरिस्थितेनादित्येन नवस्रक्तिम् आसु दिक्षु व्याप्तामि-

---

* ऋ० वे० ६, ५, २८, ५ ।

† ऋ० वे० ६, ५, २९, २ ।

‡ 'अष्टापदीम्—चत्वारो वेदाः शाखाणि च अष्टापदानि'—इति वि० ।

Digitized by Google

त्यर्थः*, "ऋतावृधं" यज्ञस्य वृद्धिं कुर्वन्तीं,† "वाचं" स्तुतिमयीं, परिपूर्णात्‡ "तन्वं तनूं न्यूनां सतीम्¶ "अहम्" "परि ममे" न्यूनयन्तां करोमीत्यर्थः§। कार्त्स्न्येन स्वरूपं स्तुत्वा विषयीकर्तुमशक्यत्वादितिभावः॥

"ऋतावृधम्"-"ऋतावृधम्"—इति पाठौ॥२॥९

अथ चतुर्थ-खण्डे ||—

प्रथमा।

१ २ ३ १ ३ २ १२ ३२
इन्द्राग्नीयुवामिमेऽ३भिस्तोमाअनूषत।
१ २ ३ २
पिबतꣳशम्भुवासुतम्॥ १** ॥

हे "इन्द्राग्नी!" "युवाम्" "इमे" "स्तोमाः" स्तोतारः†† "अभ्यनूषत" अभिष्टुवन्ति। हे "शम्भुवा" सुखस्य भावयितारा विन्द्राग्नी "सुतम्" अभिषुतम् अस्मदीयं सोमं "पिबतम्"॥१॥

---

* 'नवधाति—नव धातवः कोषाः गाः वहिष्यमाणाः यस्यां नव धातवा नवधाति' चिहत्कौमिकम्'—इति वि०।

† 'ऋतावृधम्—ऋतो यज्ञः अथवा ऋतं सत्यं तं वर्द्धयतीति ऋतावृधम्'-इति वि०।

‡ 'इन्द्रात् परि—उपरि'—इति वि०।

¶ 'तन्व'—शरीरम्'—इति वि०।

§ 'ममे—मिमीते'—इति वि०।

|| 'ऐन्द्राग्नमाज्यम्'—इति वि०।

** ऋ० वे० ४, ८, २४, २।

†† 'स्तोमाभिस्तमवदसाहन:'—इति वि०।

Digitized by Google

अथ द्वितीया ।

१ २　१ २　३ १ २　३ १ २ ३　१ २
यावाꣳसन्तिपुरुस्पृहोनियुतोदाशुषेनरा ।
१ २ ३ २　३ १ २
इन्द्राग्नीताभिरागतम् ॥ २* ॥

हे "नरा" नेतारौ ! "इन्द्राग्नी !" "वां" युवयोः स्वभूताः "पुरुस्पृहा" पुरुभिर्बहुभिः स्पृहणीयाः† "दाशुषे" हवींषि दत्तवते यजमानार्थम् उत्पन्नाः "नियुतः" अश्वाः "सन्ति"‡ हे इन्द्राग्नी ! "ताभिः" "नियुद्भिः" सह "आगतम्" आगच्छतम् ॥ २ ॥

अथ तृतीया ।

२ ३ १ २　३ १ ३ १२　१२　३ २
ताभिरागच्छतन्नरोपेदꣳसवनꣳसुतम ।
१ २ ३ १ २
इन्द्राग्नीसोमपीतये ॥ ३¶ ॥ १०

हे "नरा" नेताराविन्द्राग्नी ! [सूयतेऽभिसूयतइति सवनः सोमः] "इदं सवनम्"§ इमं सोमं "सुतम्" अभिषुतम् "उप"

* ऋ० वे० ४, ८, २४, ३ ।

† 'पुरुस्पृहा—पुरुस्पृहौ बहुभिः स्पृहणीयौ'—इति वि० ।

‡ 'सन्ति—बहुवचनमिदं द्विवचनस्य स्थाने द्रष्टव्यम्, सन्तः'—इति वि० ।

¶ ऋ० वे० ४, ८, २४, ४ ।

§ 'इदं प्रातःसवनं सुतं सोमम्'—इति वि० ।

Digitized by Google

प्रति* [यद्वा, इदं प्रातःसवनम् उप अस्मिन् सवने सुतमभिषुतं सोमं प्रति] "ताभिः" नियुद्भिः† आगच्छतम्। किमर्थम्? "सोमपीतये" अस्य सोमस्य पानार्थम् ॥ ३ ॥ १०

इति सामवेदार्थ-प्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य

तृतीयः खण्डः‡ ॥ ३ ॥

अथ चतुर्थ-खण्डे¶, प्रथम-तृचे—

प्रथमा।

१ २   ३ १ २ ३ १र २र ३ १ २

अर्षा सोमद्युमत्तमोभिद्रोणानिरोरुवत्।

२ ३ १ ३ १ २ ३ २

सीदन्योनौवनेष्वा ॥ १§ ॥

हे "सोम" पवमान! "द्युमत्तमः" अतिशयेन दीप्तिमान् "वनेषु" अरण्येषु मध्ये‖ "योनौ" स्वकारण-भूते पर्वतादि-

---

* 'उप—समीपे'—इति वि०।

† 'ताभिः—तृतीया-बहुवचनमिदं, लौकिकं व्यत्ययेन तैः पालनैः'—इति वि०। "नियुतो वायोः"—इति च निघ० १, १५, १०।

‡ 'उक्तं प्रातःसवनम्'—इति वि०।

¶ 'इदानीं माध्यन्दिनं सवन मभिधीयते'—इति वि०।

§ छ० आ० ६, १, २, ७ (२भा० ६२ पृ०) = ऋ० वे० ७, २, ४, ४।

‖ 'वनेषु—उदकेषु'—इति वि०।

Digitized by Google

स्थाने * "आसीदन्" सर्वतो गच्छंस्त्वं "द्रोणानि" [प्रयोग-बाहुल्यापेक्षमेतत् बहुवचनम्] द्रोणकलशान्† "अभि" लक्ष्य "रोरुवत्" पुनः पुनः भृशं वा शब्दं कुर्वन् "अर्षा" ‡ आगच्छ दशापवित्रमध्याद्विर्गतः सोमः अविच्छिन्न-धारया द्रोणकलशे पतन् शब्दं करोति खलु ॥

"योनौवनेष्वा"-"श्येनोमयोनिमा"—इति पाठो ॥ १ ॥

अथ द्वितीया ।

२ १र　२र　२　२३१२　　२ १ २
अप्सा इन्द्रायवायवेवरुणायमरुद्भ्यः ।
१ २　　३ १ २
सोमाअर्षन्तुविष्णवे ॥ २¶ ॥

"अप्सा" वसतीवरी-नामधेयानामपां सम्भक्तारः [वनषण सम्भक्तौ (भ्वा, प०) ; "जनसनेति (३,२,६७,) विट्, आत्वं विड्-वनोरिति (६,४,४१,) तादृशाः] "सोमाः" "अर्षन्तु" द्रोण-कलशमागच्छन्तु । किमर्थम् ? "इन्द्राय" सर्वदेवानां प्रथमत एव इन्द्रः सोमान् पिबति, तस्मात् तदनु वायुरन्तः तस्मै च "वायवे", तदनन्तरं वरुणः सोमान् पिबति तस्मै च "वरुणाय", ततो "मरुद्भ्यः" एतन्नामकेभ्यो देवेभ्यः, "विष्णवे" सर्वजगद्-

---

* 'योनौ—द्रोणकलशे'—इति वि० ।

† 'द्रोणानि—द्रोणकलशसम्बन्धीनि पात्राणि'—इति वि० ।

‡ "द्व्यचोऽतस्तिङः (६,३,१३५)"—इति दीर्घः ।

¶ऋ० वे० ७, २, ५, १ ।

Digitized by Google

अपिने एतन्नामकाय देवाय च,—एतेभ्यः सर्वेभ्यः सोमा आगच्छन्त्वित्यर्थः ॥

"सोमा अर्षन्तु"-"सोमो अर्षति"—इति पाठौ ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
इषन्तोकायनोदधदस्मभ्यꣳसोमविश्वतः।

१ २ ३ १ २
आपवस्वसहस्रिणम् ॥ ३* ॥ ११

हे "सोम!" त्वं "नः" अस्माकं "तोकाय"† पुत्राय "इषम्" अन्नं "दधद्" विदधत् प्रयच्छन् "सहस्रिणं" सहस्र-सङ्ख्याकं धनं "विश्वतः" सर्वतः "अस्मभ्य" च "आपवस्व" आ प्रापय अस्मभ्यं पुत्राय च अन्न-धनादिकं प्रयच्छेत्यर्थः ॥ ३ ॥ ११

१ र र १ २ १ र र
॥ शाकलम् ॥ अर्षासोमा २द्युमत्तमाः। अभिद्रोणा

२ १र २ १ १ र ११
निरोरु२३वात्। सायिदा २न्। योनीवना २ ३ यि।

१ २ ५ १ र २ १
ऊम्। घू२३४५वो६हायि ॥(१) अप्सादून्द्रा २यवायषायि।

र २१ २ १ १ २ १
वरुणायमरुद्भ्या२३याः। सोमा २ः। आर्षन्तुवा२३यि।

---

* ऋ० वे० ७,१,५,१,।

† 'पुत्राय पौत्राय'—इति वि०।

१ २ ५ १ र र १
ऊम्। ष्णा ३ ४ ५ वो६हायि ॥(२) इषन्तोका २ यनोद

२ १ र २ १ २ १ १
धात्। अस्मभ्य २ सोमविश्वा२३ताः। आपा २। वाख

२ १ १ २ ५
सद्दा२३। ऊम्। खा३४५यिणो६हायि(३) ॥ ३* ॥ [१]

१ र र १ २ २ १ २
॥ वार्षम् ॥ अर्षासोमा। द्युमान्ता३माः। अभि

र १ ७ २ ५ १ र २
द्रो। णा। निरो२ह२३४वात्। सायिदन्यौना३उ।

ऽ २ १र १ २ ५र र २ र
ई३या। वने। षू२वा२३४औहोवा ॥(१) अप्साइन्द्रा।

१ २ २ १ २ र १ ७ २ १
यवाया३वायि। वरुणा। या। मरु२द्भ्या२३४याः। सो

२ ऽ २ १ २ ५र र
मार्षा३। ई३या। तुवि। ष्णा२वा२३४औहोवा ॥(२)

२ र १ २ २ १ १ ७
इषन्तोका। यनोदा३धात्। अस्मभ्यम्। सो। मवा

२ ५ १ २ ऽ २ १
२यिश्वा२३४ताः। आपवस्वा३। ई३या। सह। स्वा

२ ५र र २ ५
२यिणा२३४औहोवा। ऊ२३४पा(३) ॥ ४† ॥ [२]

१ २ १ २
॥ सन्तनि ॥ अर्षाहाउ। सोमद्युमा ३ १ उवा २ ३।

---

* ऊ० गा० ३प्र० १ख० ३सा०।

† ऊ० गा० ३प्र० १ख० ४सा०।

Digitized by Google

५ १ र २र १र २ ११११ र १
ता२३४माः । अभिद्रोणानिरोरुवा२३४५त् । सीदान्हा

१ र २ ५ २ १र
उ । योनौवना३१उवा२३यि । पू२३४वा ॥(१) अप्सा

र २ र ११र१ २र १ २ २ १ १ १ १ १र २
इन्द्रायवायवेवरुणायमरुद्भ्यिया२ ३ ४ ५ः । सोमाद्धाउ ।

१ २ ५ १ २र १र
आर्षन्तुवा३१उवा२३यि । ष्णा२३४वे ॥(२) इषन्तोका

२र १ २ १ २र १ २ १ १ १ १ १र २ १
यनोदधदस्मभ्यं सोमविश्वता२३४५ः । आपाद्धाउ । वा

२ ५
स्वसद्धा३१उवा२३ । सो२३४णाम्(३) ॥ १२* ॥ [३]

१ २ र १र र २ १
॥ अाक्रवर्णम् ॥ आयिषाम् । तोकायनोदधात् ।

२ १ र १ २ २
अस्मभ्यम् । सोमवा२यि । श्वता३१उवा२३ । ज ३ ४

५ १र १ २ १ २ १ २
पा । आपवा२३स्वा । सद्धस्त्रिणा३माउवा२३ । जा३२

५
३४पा(३) ॥ १८ ॥ [४]

२ र १ १ १ र २ १ २ १
॥ जराबोधीयोत्तरम् ॥ इषन्तोकोवा । यानोदधात् । यस्मा

---

* ऊ० गा० ७प्र० २खा० १२सा० ।

† ऊ० गा० १९प्र० १खा० १८सा० ।

Digitized by Google

र १ र २ ४ ५
भ्या२३९सो। मविश्वाता:। आपावा१स्वा२३सा। च।

३ २
ष्विणो३४५ई। डा(३)॥१५*॥[५]

१ र १ २ १
॥मार्ग्रीयवम्॥ अप्सौहोवा। आयिन्द्रा२। य

२ ३ ५ १ १र १ २ १र र
वाया२३४वायि। वरुणाय। मरुद्भ्या१या२:। सोमा:।

२ २ ३ ५ १ ३ ५र र
श्वा। औ३होयि। आ२३४र्षा। द्रुवा२३४औहोवा।

२ १ १ १ १ १
ए३। ष्णवा२३४५यि(२)॥२†॥[६]११

अथ प्रगाथरूपे द्वितीयसूक्ते—

प्रथमा।

१ २ ३ २ ३ २ ३ २ ३ २ ३ १ २
सोमउष्वाण:सोतृभिरधिष्णुभिरवीनाम्।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अश्वयेवहरितायातिधारयामन्द्रयायातिधारया॥१‡॥

---

* ऊ० गा० ११प्र० १ख० १५सा०।

† ऊ० गा० १८प्र० २ख० २सा०।

‡ ऋ० सा० ६, १, ३, ५ (२भा० ८८पृ०) = ऋ० वे० ७, ५, १३, २।

Digitized by Google

"सोतृभिः" अभिषुण्वद्भिः ऋत्विग्भिः "स्नानः"* अभिषूयमाणः "सोमः" "अवीनां" "स्नुभिः"† ["मांसपृत्स्नूनामुपसंख्यानम् (६,१,६३)"—इति सानु-शब्दस्य स्नु-भावः] समुच्छ्रितैः वालैः पवित्रैः "अधि याति" अधिकं गच्छति। "उ"—इति प्रसिद्धौ। "अश्वया इव" वडवया इव "हरिता" हरित-वर्णया धारया "याति" "मन्द्रया" मदकारिण्या द्रोणकलशमधिगच्छति॥

"उष्णाणः"-"उषुवाणः"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

३ २उ ३ १ २ ३ १ २ ३१ २
अनूपेगोमान्गोभिरक्षाःसोमोदुग्धाभिरक्षाः।

३ २उ ३१२ ३ १र २र
समुद्रन्नसंवरणान्यग्मन्मन्दीमदायतोशते ॥ २‡ ॥ १२

"गोमान्" गोयुक्तः सोमः "अनूपे" निम्ने देशे‡ कलशे "गोभिः" गोर्विकारैः क्षीरादिभिः§ सह "अक्षाः" क्षरन्ति।

---

* क्वचित् तु "ष्णाणः"—इति मूर्द्धन्य-षकार-णकारोपेतः श्रूयते। तत्र "पूर्वपदात् (८, ३, १०६)"—इति षत्वम् सुतरां णत्वञ्च।

† "ष्णुभिः"—इति मूर्द्धन्यपाठो क्वचित्, "पूर्वपदात् (८, ३, १०६)"—इति च तत्र दीर्घः।

‡ 'अनूपे—उर्व्वीः प्रदेशे'—इति वि०।

§ 'गोभिः—उदक-सङ्घातैः गोभिर्वा'—इति वि०।

तदेवोच्यते—"सः" सोमः प्रातमोभिश्रणार्थं "दुग्धाभिः गोभिः" सह "अचाः" चरति [चरतेर्लुङि रूपम्]। किञ्च "समुद्रं न" यथा समुद्रमुदकानि गच्छन्ति तद्वत् "संवरणानि" सम्भजनीयानि रसरूपाणि अन्नानि* द्रोणकलशम् "अग्मन्" गच्छन्ति [गमेर्लुङि च्लेर्लुकि रूपम्] किञ्च "मन्दी" मदकरः सोमः "मदाय" मदार्थं "तोशते"† हन्यते अभिषूयते [तोशतिर्वधकर्मा (निघ० २,१९,२९)] ॥ २ ॥१२

॥ मानवोत्तरम् ॥ हौवायि। सोमउषाणःसोतृभिः। हौवायि। आधिष्णुभिरवीनाम्। आश्वयेव। हारिता या३१। तिधा२रा२३४या। मन्द्राया२३४या३। ता२ यिधार३४औहोवा। रा२३४या। हौवायि। मन्द्रया यातिधारया। हौवायि। मन्द्रयायातिधारया। आ नूपे। गोमान्गो३१। भा२यिरा२३४चाः। सोमोदूर३ ग्धा३। भा२यिरा२३४औहोवा। आ २ ३ ४ स्वाः ॥(२)

---

* 'संवरणानि—उदकानि'—इति वि०।

† 'तोशते—तुषि प्राप्तो व्यापयति'--इति वि०।

१ २ २ २१२ १२ १ २
होवायि। सोमोदुग्धाभिरच्चाः। होवायि। सोमोदु
२ २ ७ १ १ ७ १ ७ २
ग्धाभिरचाः। सामुद्रम। सांवरणा३१। नियार२आ२३
५ २ १ २ १ ३ ५२ २
४ग्मान्। मन्दायिमा२३दा३। या२तो२३४औहोवा।
२ ५
आ२३४ते(३)॥ ५* ॥[१]

१ २ १२ २ २ १ २
॥ आनूपन्ध्व्रम्॥ सोमाःसोमाः। उग्वाणा३ःसोतृ
१ २ १ २ १
१भी२ः। अधिष्णुभिः। आवा१यिना२म्। आश्वा
१ १ २ २ २१२ २ १ २ २
२येवा२। हरितायातिधारा२३या। मन्द्राया३या३।
१ ४ २ ५ १ २ १ २ २
तार३इधा३। रा३४५योई३हायि॥(१) मन्द्रामन्द्रा। या
२ १ १ १ १२ २ १ २
यातो३धारा१या२। मान्द्रयाया। तिधारा१या२।
१ १ १२ २ २ १ २ १२ १ २
आनू२पेगो२। मान्गोभिरा२३चाः। सोमोदू३ग्धा३।
१ ४ २ ५ १२ २ १२ १
भा२३यि३। राआ२३४५औहोई३हायि॥(२) सोमाःसोमाः।
२ १ २ १ १२ २ २ १ २
दुग्धा३भायिरा१चा२ः। सोमोदुग्धा। भायिरा१चा

* ऊ० गा० २ प्र० १ अ० ५ खा० ।

र्२ः । सामू२द्राना२ । संवरणानियार३म्मान् । मन्दा

यिमा३दा३ । यार३तो३ । श्रा ३ ४ ५ तो ६ हायि(३)

॥ ६* ॥ [२]

॥ वाम्रम् ॥ सोमउष्वाणःसो । हा३हा३यि । तर

३४ । भिस्तृभीवा । अधाहो२यि । ष्णुभायिर्द्यौ२ ।

आवा१यिना२म् । आश्वयेव । हरायितायां । तिधा

उवा३ । ऊ२३४पा । रया२ । मान्द्रा२याया२ ।

तिधा । रा२या२३४ औहोवा ॥(१) मन्द्रयायातिधा ।

हा३हा३यि । रा२३४ । यारयोवा । मान्द्राहो२यि ।

यायाहो२ । तायिधा१राया२ । आनूपेगो । मानूगो ।

भिराउवा३ । ऊ३४पा । अक्ष्ना२ः । सोमो२दूग्धा२भि

रा२ । हा२३४ औहोवा ॥(२) सोमोदुग्धाभिरा । हा३

* ऊ०गा० ३प्र० १ख० ६सा० ।

२ १ र ५ १र
हाउयि। आ२३४। वाःत्वोवा। सोमोहो२यि।
१ १ १ १ १ १
दुग्धाचो२। भायिरा१चा२ः। सामुद्रम। संवारा
० ३ १ १ ५ १ १
णा। नियाउवाइ। ऊ३४पा। अग्मा२न्। मान्दी
१ १र ३ ५र र १
२माद्दा२। यतो। आरता२३४औहोवा। ऊ२२३४
५
पा(३) ॥ ७* ॥ [३]

२र ३ ५
॥ अग्नेस्त्रिणिधनम् ॥ सोमउप्वा। णःसोतृ२३४भीः।
२ १ २ ५ २ २
अधायिष्णुभिरा३१उवा२३। वी२३४नाम्। आश्वाये२
५ ११ र र २ ५ २
३४वा। हरितायातिधा३१उवा२३। रा२३४या। मा
२ ५ २ ५
न्द्राया२३४या। तिधा३१उवा२३। रा २ ३ ४ या ॥(१)
२ र २ ५ ११ र र २
मन्द्रयाया। तायिधारा२३४या। मन्द्रयायातिधा३१उ
५ २ २ ५ १ र २
वा२३। रा२३४या। आनूपि२३४गो। मान्गोभिरा३१
५ २ २ ५ २
उवा२३। आ२३४वाः। सोमोदू२३४ग्धा। भिरा३१

---

* ऊ० गा० ३प्र० १अ० ७सा०।

५ १र र २
उवा२३ । आ२३४वा: ॥(२) सोमोदुग्धा । भायिरा२

५ १र १र र २ ५
३४णा: । सोमोदुग्धाभिरा३१उवा२३ । आ२३४वा: ।

२ २ ५ २ १ २
सामूद्रा२३४न्ना । संवरणानिया३१उवा२३ । सा २ ३ ४

५ १ १ ५ २ १
ग्मान् । मान्दीमा२३४दा । यतो३सा३उवा२३ । आ

५
२३४ते(३) ॥ ८* ॥ [४]

५ ४ २ ४ ५र ४ ५ १
॥ अभीवर्त्तः ॥ मन्द्रा३या३याऽतिधारयोवा । मान्द्र

२र र १ २ १ रर ५र
याया । तिधारा१या२ । आनूपेगो३१२३४ । मान्गो ।

१ २ र १ २ ७ २ १
भायिरा१णा२: । सोमोदू१ग्धा२ । भिरा३ । आ२३४

२ १११११
५ । आ२३४५:(२) ॥ ३† ॥ [५]

५र र २ ४र ५ ४ ५ १र १ २ १
॥ कालेयम्‡ ॥ सोमोदू३ग्धाभिरणा: । सोमोदुग्धा ।

२ १ २ ३ २ १ २४र ५
भिरणा२३: । समुद्रन्ना३ । सा२३४म् । वरणानि ।

* ऊ० गा० ३प्र० १अ० ८सा० ।

† ऊ० गा० ८प्र० १ख० ३सा० ।

‡ "लघ्वाकालेयम्"—इति ख० पु० पाठः ।

Digitized by Google

२ १ १ २२ २ ५ ४
आ३२मान्। मन्दायिमदौ। वा३४३ओ३४वा। यतो५
४
मतायि। औ५ई। डा(२) ॥ ४* ॥ [६]

२ र २र ५
॥ मानवाद्यम् ॥ मन्द्रयाया। तिधारा२३४या।
२ ३ ५ १ १र र १ २
तायिधारा २ ३ ४ या। मान्द्रयाया। तिधारा१या २।
१र २र १ ७र २ १ २ ५ १र १र
अ। नू। पे। गोमान्गो३। भा२यिरा२३४वाः। सोमो
१ १ २ ५र र २ ५
दुग्धा२३। भा२यिरा२३४औहोवा। आ२३४वाः(२)।
॥ १२† ॥ [७]

१ र र र र २
॥ आग्नेस्त्रिणिधनम् ॥ अनूपेगो। मान्गोभायिरा
५ १र १र र १
२३४वाः। सोमोदुग्धाभिरा३१उवा२३। आ२३४वाः।
२ ३ ५ १ १ र २
सामूद्रा२३४वा। संवरणानिया३१उवा२३। आ २ ३ ४
५ २ ३ ५ २ १
ग्मान्। मान्दीमा२३४दा। यतो३आउवा२३। आर
५
३४ते(२) ॥ १३‡ ॥ [८]

---

* अ० गा० ८प्र० २अ० ४गा० ।

† अ० गा० ९प्र० २अ० १२गा० ।

‡ अ० गा० १९प्र० २अ० २गा० ।

Digitized by Google

॥ वैष्णवाद्यम् ॥ सोमउष्वा । णःसो२तृभायिः । तृ
भिः । अधिष्णुभिरा२वीनाम् । वीनाम् । अश्वयेवह
रितायातिधा२रया । रया । मन्द्रयायातिधा२रया२३ ।
आ२ । या२३४ । औहोवा ॥(१) मन्द्रयाया । तिधा२
रया । रया । मन्द्रयायातिधा२रया । रया । अनूपे
गोमान्गोभिरा२क्षाः । क्षाः । सोमोदुग्धाभिरा२क्षा२३ः ।
आ२ । क्षा२३४ । औहोवा । सोमोदुग्धा । भि
रा२क्षाः । क्षाः । सोमोदुग्धाभिरा२क्षा२३ः । आ२ ।
क्षा२३४ । औहोवा ॥(२) सोमोदुग्धा । भिरा२क्षाः ।
क्षाः । सोमोदुग्धाभिरा२क्षाः । क्षाः । समुद्रन्नसंव
रणान्यग्मान् । ग्मन् । मन्दीमदायतो२शता२३यि ।
आ२ । ता२४३ । औहोवा । ऊ२३४पा(३) ॥१८*॥ ९]

* ऊ० ग्रा० १०प्र० १ख० १८ सा० ।

१८ २ २ १ २ २
॥ वैष्णवोत्तरम् ॥ सोमः। सोमाः। उष्वाणःसोतृ
१ २ २ १ २ २ १
भिः। अधायिष्णू३भायिः। आश्वी३हो। वायिना२
१ २ २ २ १ २ २ १ १ २
म्। अश्वयेवहरितायातिधा१रा३या। मन्द्राधौ३हो।
१ २ २ १ ५ ४ ५
यायातिधोर२३४वा। रा५योई३हायि(१) ॥ २०* ॥ [१०]

१२ २ २ १
॥ यौक्तस्रुचम् ॥ सोमउष्वाणःसो। तृभायिः। अ-
२ १ २ १ १२ २ २ २
धिष्णु भिरवा२३यिनाम्। आश्वा२ै। येवहरितायाति
१२ २ १ १ २ २ १ ५ ३
धारा१२३या। मान्द्रा२। यायातिधो२३४वा। रा१२३४
५ २ १ २ १२ १ २ २ २ १२
या ॥(१) मन्द्रयायातिधा। रया। मन्द्रयायातिधारा
२ १२ २ २ २ ११ २ १
२३या। आनू२। पेगोमान्गोभिरा२३क्षाः। सोमा
१ २ १ ५ ३ ५ १२ १२
२ः। दूग्धाभिरो२३४वा। आ२३४क्षाः ॥(२) सोमोदु
१२ २ १ २ २ २ २ १ २ १
ग्धाभिरा। क्षाः। सोमोदुग्धाभिरा२३क्षाः। सामू२।
१ २ २ १ २ १ १ २ २ १
द्रन्नसंवरणानिया२३ग्मान्। मान्दी२। माढायतो२३४
५ ३ ५
वा। आ२३४ते(३) ॥ ११ ॥ [११] १२

* ऊ० गा० २०प्र० १ख० २०गा०।
† ऊ० गा० २०प्र० २ख० १गा०।

अथ तृतीय-तृचे—

प्रथमा।

१ २   ३ १ २ ३१ ३ १२   ३१ ३ १ २
यत्सोमचित्रमुक्थ्यन्दिव्यम्पार्थिवंवसु।
१ २   ३ १२   ३१
तन्नःपुनानआभर॥ १* ॥

हे "सोम !" "यत्" "चित्र" चायनीयम् "उक्थ्यम्"† स्तुत्यं "दिव्यं" दिवि भवं "पार्थिवं" पृथिवी-सम्बन्धञ्च यत् "वसु" धनमस्ति "तत्" "नः" अस्मभ्यम् "पुनानः" पूयमानः सन् "आभर" आहर॥ १॥

अथ द्वितीया।

१ २   ३ १२   ३१   ३ १ २ ३ १ २ ३ १ २
वृषापुनानआयूꣳषिस्तनयन्नधिबर्हिषि।
२ ३ १ २   ३ १ २
हरिःसन्योनिमासदः॥ २‡ ॥

हे सोम! "आयूंषि" यजमानादीनामृत्विजां जीवितकालान् "पुनानः" शुद्धान् कुर्वन् "वृषा" कामानां वर्षकस्त्वं "स्तनयन्" शब्दं कुर्वन् "अधि बर्हिषि" [अधीति सप्तम्यर्थानुवादी] आस्तीर्णे दर्भे "हरिः सन्" हरितवर्णः सन् "योनिं" स्वकीयं स्थानम्¶ "आसदः" आसीद॥

---

* ऋ० वे० ६, ८, ९, १। † 'उक्थ्यं—नामरूपम्'—इति वि०।

‡ ऋ० वे० ६, ८, ९, ३। ¶ 'योनिं—द्रोणकलशम्'—इति वि०।

Digitized by Google

"आयूंषि"-"आयुःषु"—इति पाठौ, "आसदः"-"आसदत्"—इति च ॥ २ ॥

अथ तृतीया ।

२ ३१र २र ३ १ २ ३ १ २
युव०ᳬ हिस्थःस्वःपतीइन्द्रश्चसोमगोपती ।
३ १ २ ३ १ २
ईशानापिप्यतन्धियः ॥ ३* ॥ १३

हे "सोम !" त्वम् "इन्द्रश्च" युवं हि" युवां खलु "स्वःपती" सर्वस्य स्वामिनौ "स्थः" भवथः । तथा "गोपती" गवां पालकौ† "ईशाना" ईश्वरौ सन्तौ "धियः" अस्मदीयानि कर्माणि‡ "पिप्यतम्" प्यायथतम्¶ ॥

"युवंहिस्थःस्वःपती"-"युवंहिस्थःस्वर्पती"-इति पाठौ ॥ ३ ॥ १३

२र १ २ १ र
॥ ऐष्यवम् ॥ यत्सोमचित्रमुक्थायाम् । दिव्यम्पार्थि
२ १ ५ ३ २ ४ १ र
वंवसू । तन्नःपू२३४ना । नथा३भा५रा६५६ ॥(१) वृषा
र र १ २ १ २ १
पुनानआयू०ᳬषी । स्तनयन्नधिबर्हिषायि । हरिःसा२३
५ ३ २ ४ २ १
४न्यो । निमा३सा५दा६५६ः ॥(२) युव०ᳬ हिस्थःस्वःपा

* ऋ० वे० ६, ८, ८, २ ।

† 'गोपती—गवां पती, उदकानामादित्यरश्मीनां वा'—इति वि० ।

‡ 'धियः—बुद्धयः'—इति वि० ।

¶ 'पिप्यतं—पाययतम्'—इति वि० ।

Digitized by Google

१ १ र २ १र१र ५ ३ २
ती। इन्द्रस्यसोमगोपतायि। ईशानार२३४पी। प्यता
४
इन्धाप्र्याई५६:(३) ॥ ८* ॥ [१] १६

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य
चतुर्थः खण्डः† ॥ ४ ॥

अथ पञ्चम-खण्डे‡ प्रथम-सूक्ते—

प्रथमा ।

१ ३ १ २ ३ १ २ ३ १र २र
इन्द्रोमदायवावृधेशवसेवृत्रहानृभिः ।
२उ ३ २ ३ १ २ ३ १र २र २
तमिन्महत्स्वाजिषूतिमर्भेहवामहे
१र २र३१ २
सवाजेषुप्रनोविषत् ॥ १¶ ॥

---

* ऊ० गा० ३प्र० १ख० ८सा० ।

† 'उक्तो माध्यन्दिनः पवमानः'—इति वि० ।

अतोऽनन्तरं विवरणकृता इहैव प्रकृतेः प्रत्युत्थता एव व्याख्याताः । तथाहि—'इहार्णो' इष्टानि भवन्ति, तत्र पञ्चमेऽहनि प्रकृत्यः इष्टं भवति ता उच्यन्ते ;—इन्द्रो-द्वैवत-ब्राह्मणानि परिभाषाभिहितानि "विद्मा मघवन्" इत्यंशः त्वं मघवन्'—इत्यादि । एवमेतद्ग्रन्थे उत्तराग्रन्थीयएव सत्रागानाब्राचिकः न तु ग्रन्थान्तरच्छन्दआर्चिकपरिशिष्ट-भूतः, परमेतदतीव चित्रं मूलपुस्तकदर्शनेन तथात्वं व्याख्यानात् ।

‡ 'बार्हद्गिरं समाप्ताम'—इति वि० ।

¶ छ० आ० ५, १, ३, २ (१भा० ८३६४०) = ऋ० वे० १, ८१, १ ।

"वृत्रहा" वृत्रस्यावरकस्य वृष्टि-निरोधकस्य मेघस्यासुरस्य वा हन्ता। यद्वा, आवरकाणां शत्रूणां हन्ता, "इन्द्रः" "मदाय" हर्षार्थं "शवसे" [बलनामैतत् (निघ० २,९,३) बलार्थञ्च "नृभिः" यज्ञस्य नेतृभिः ऋत्विग्भिः "वृधे" स्तोत्र-शस्त्र-रूपाभिः स्तुतिभिः प्रवर्द्धितो बभूव। स्तुत्या हि देवता प्राप्त-बला सती प्रवर्द्धते। "तम् इत्" तमेवेन्द्रम् "महत्सु" प्रभूतेषु "आजिषु" सङ्ग्रामेषु "ऊति" रक्षां कुर्वन्तमितिशेषः "हवामहे" अस्माकं रक्षणाय आह्वयामहे। ["उत" अपिच "ईम्" एनम् एवम्भूतमिन्द्रम्*] "अर्भे" अल्पे सङ्ग्रामे हवामहे अस्माभिराहुतः सचेन्द्रः "वाजेषु" सङ्ग्रामेषु "नः" अस्मान् "प्राविषत्" प्रावतु प्रकर्षेण रक्षतु॥ ["ऊतिमर्भे"--"उतेमर्भे"—इति पाठौ॥ वावृधे—वृधेः कर्मणि लिट् तुजादित्वादभ्यासस्य दीर्घत्वम्†। नृभिः—"सावेकाच (६,१,१६८)"—इति प्राप्तस्य विभक्त्युदात्तत्वस्य "नृचान्यतरस्यां (६,१,१८४)"—इति प्रतिषेधः। हवामहे—ह्वयतेर्लटि "ह्वः (६,१,३२)"—इत्यनुवृत्तौ "बहुलञ्छन्दसि (६, १, ३४)"—इति सम्प्रसारणम् , अपि गुणावादेशौ। अविषत्—अवरक्षणे (भ्वा०,प०) लेटड़ागमः, "इतश्च लोपः (३, ४, ९७)—इति इकारलोपः, "सिब्बहुलं लेटि (३,१,३४)—इति सिप् , तस्यार्द्धधातुकत्वात् वलादिलक्षण इट्]॥ १॥

---

* ऋग्वेद-पाठमनुसृत्येदं व्याख्यानम्।

† परं चिन्त्यमेतत्—"संहितायामभ्यासस्य अन्येषामपि दृश्यत इति दीर्घत्वम्। तुजादिभ्योऽपि तूतुजान इति यत् पदकाले दीर्घः श्रूयेत"—इति ऋग्वेद-व्याख्यावसरेऽस्यैव व्याख्या।

अथ द्वितीया ।

२ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
असिद्धिवीरसेन्योसिभूरिपराददिः ।
१ २ ३ १ २ ३ २ ३ १ २ ३ २
असिदभ्रस्यचिद्वृधोयजमानाय
३ १ २ ३ २ ३ ३ १ २
शिक्षसिसुन्वतेभूरितेवसु ॥ २* ॥

हे "वीर !" शत्रु-क्षपण-कुशलेन्द्र ! त्वं "सेन्यः असि" सेनार्हो भवसि†, त्वमेकोऽपि सेना-सदृशो भवसीत्यर्थः । "हि"‡ यस्मादेवं तस्मात् प्रभूतं शत्रूणां धनं "पराददिः" परादाता शत्रूणां पराङ्मुखं यथा भवति तथा आदाता "असि" भवसि "दभ्रस्य चित्" अल्पस्य नामैतत्¶ अल्पस्यापि तव स्तोतुः§ "वृधः" वर्धयितासि, तथा "यजमानाय" यागं कुर्वते "सुन्वते" सोमाभिषवं कुर्वते पुरुषाय "शिक्षसि" अपेक्षितं धनं ददासि [शिक्षतिर्दानकर्मा (निघ०३,२०,८)] यस्मात् "ते" तव वसु"

* ऋ० वे० १, ६, १, ९ ।

† विवरण-मते 'वीरसेन्यः'—इत्येकं पदम्, अत एवैवं व्याख्यानम्—'वीरसेन्यः—वीराः सेना यस्य असौ वीरसेन्यः'—इति । परमेतत् पदपाठ-विरुद्धम्, तत्र "वीर । सेन्यः"—इति भेद-स्वरयोर्दर्शनात् ।

‡ 'चोति पदपूरणः'—इति वि० ।

¶ "दभ्रम्"—इति निघण्टौ तृतीयस्य द्वितीये ह्रस्वनामसु पठमिति दर्शनात् ।

§ 'दभ्रस्य—ध्वंसकस्य'—इति वि० ।

धनं "भूरि" बहुलं अक्षयं धनं विद्यते तस्मात् ददासीति भावः॥ [पराददिः—डु दाञ् दाने (जुहो० उ०) "आदृगमहन जन (३,२,१७१)"—इति कि-प्रत्ययः; लिड्वद्भावाद् द्विर्वचने कृत्वम्, "आतो लोप इटि च (६,४,६४)"—इत्याकारलोपः। वृधः—वृधेरन्तर्भावितण्यर्थादिगुपध-लक्षणः कः। सुन्वते—"शतुरनुमः (६,१,१७३)"—इति विभक्तेरुदात्तत्वम्॥ २॥

अथ तृतीया।

१ २ १ २ २ १ २ २ १ २ ३ १ २
यदुदीरतआजयोधृष्णवेधीयतेधनम्।
३ १ १ ३ २ ३ १ ३ २उ ३ १ ३२
युङ्क्ष्वामदच्युताहरीकं हनःकंवसौ
३ १ २ ३ १ २
दधोऽस्माँ इन्द्रवसौदधः॥ ३*॥ १४

[अथेदमाख्यानम्—'रहूगण-पुत्रो गोतमः कुरु-सृञ्जयानां† राज्ञां पुरोहित आसीत्, तेषां राज्ञां परैः सह युद्धे सति स ऋषिः अनेन सूक्तेन इन्द्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामास'—इति। तस्य च तत्पुरोहितत्वं वाजसनेयिभिराम्नातम्—"गोतमोह वै राहूगण उभयेषां कुरु-सृञ्जयानां‡ पुरोहित आसीत्"—इति।] "यत्" यदा "आजयः" सङ्ग्रामाः "उदीरते" उद्गच्छन्ति उत्पद्यन्ते तदानीं "धना" धनं "धृष्णवे" यो धृष्णुः धर्षयिता

* ऋ० षा० ४, ६, २, ९ (१भा० ८४४पृ०) = ऋ० मं० १, ६, १, २।

†, ‡ "सञ्जयानां"—इति रा० मा० पु० पाठः।

Digitized by Google

शत्रूणां जेता भवति तस्मै "धीयते" निधीयते, जयतो धनं भवतीत्यर्थः। हे इन्द्र! त्वं तादृशेषु युद्धेषु प्रवृत्तेषु "मदच्युता" शत्रूणां मदस्य गर्वस्य च्यावयितारौ "हरी" त्वदीयावश्वौ "युक्ष्व" स्व-रथे योजय, योजयित्वा च कञ्चिद्राजानं तव परिचरणम-कुर्वन्तं "हनः" हन्याः कञ्चन त्वां परिचरन्तं "वसौ" वसुनि धने "दधः" स्थापय॥ [उदीरते—ईरगतौ (आ०) आदा-दिकः, "अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे (६,१,१८६) धातु-स्वरएव शिष्यते, "यद्वृत्तान्नित्यम् (८,१,६६)"—इति निघात-प्रतिषेधः। धना—"सुपां सुलुक् (७,१,३९)"—इति डादेशः। युङ्क्ष्वा—युजिर् योगे (रु० उभ०), अन्तर्भावित-ण्यर्थोऽत्रेति "बहुलञ्छन्दसि (२,४,७३)—इति विकरणस्य लुक्, "द्व्यचो-ऽतस्तिङः (६,३,१३५)"—इति संहितायां दीर्घत्वम्। हनः—हन्तेर्लेटि सिप्यडागमः, हनश्च दधश्च चार्थप्रतीतेः "चादिलोपे विभाषा (८,१,६३)"—इति प्रथमायास्तिङ्विभक्तेर्निघात-प्रतिषेधः। वसौ—लिङ्ग-व्यत्ययः। दधः—दध धारणे (भ्वा०आ०) लेटि व्यत्ययेन परस्मैपदम्॥ ३॥ १४

॥ सन्तनि॥ इन्द्रोवाउ। मादायवा३१उवा२३। वा२३४ङ्कः। ग्रवसेवृत्रहानृभिस्तमिन्महत्स्वाजिषूतिमर्भेह वामंहा२३४५यि। सनाहाउ। जायिषुप्रनो३आउवा२३।

५ १ २ १ २ ३ १ २ ३ २ ३ २ १ २ २ २ ३ १ २ १
वा२३४यिषात् ॥(१) असिद्धिवीरसेन्योसिभूरिपराददिर

२ १ २ १२ २२ २ २ १११ १ २
सिदभ्रस्यचिद्वृधोयजमानायशिक्षसा२३४५यि। सुन्वाश्वा

१ २ २ ५ १ २
उ। तायिभूरिता३१उवा२३यि। वा२३४सू ॥(२) यदु

१२ १२ १ २ २ १ २ १२ १२ १ १२ १ १ १२ १ १२ १
दीरतआजयोधृष्णवेधीयतेधनंयुङ्क्ष्वामदच्युताहरीकंहन

२ १ २ २ १ १ १ १ १ १ २ १ २
नःकंवसौदधा२३४५ः। अस्मान्हाउ। आयिन्द्रवसा३१उ

५
वा२३। दा२३४धाः(३) ॥ ४* ॥ [१] १४

अथ द्वितीय-तृचो†—

प्रथमा।

३ २ ३ १ २ ३ १ २
स्वादोरित्थाविषूवतो

१ २ ३क २२
मधोःपिबन्तिगौर्यः।

१ २२ ३ १ २ ३
यादूइन्द्रेणसयावरी

२ ३ १ २ ३ १ ३
वृष्णामदन्तिशोभथा

२ ३ १२ ३ १ २
वस्वीरनुस्वराज्यम् ॥ १‡ ॥

---

* ऊ० गा० १८प्र० २ख० ४गा०।

† 'रायोवाजीयमच्छावाकसाम'—इति वि०।

‡ ऋ० आ० ५, १, २, २(१भा० ८३१पृ०) = ऋ० वे० १, ६, ६, ५।

Digitized by Google

"स्वादीः" स्वादुभूतस्य रसयुक्तस्य "इत्था विषूवतः" इत्थ मनेन प्रकारेण सर्वयज्ञेषु व्याप्तियुक्तस्य "मध्वः" मधोः मधुर-रसस्य सोमस्य "क्रियाग्रहणं कर्त्तव्यम् (१,४,३२ वा०)"—इति कर्मणः सम्प्रदानत्वात् चतुर्थ्यर्थे षष्ठी। एवंविधं सोमं "गौर्यः" गौरवर्णा गावः पिबन्ति। या गावः "शोभथाः" [वचन-व्यत्ययः] इन्द्रेण सह शोभन्ते "वृष्णा" कामाभिवर्षकेन्द्रेण "सयावरीः" सह यान्त्यो गच्छन्त्यः सत्यः "मदन्ति" हृष्टा भवन्ति। ता इन्द्रपीतस्य सोमस्य शेषं पिबन्तीत्यर्थः। "वस्वीः" पयः-प्रदानेन निवासकारिण्यः ता गावः "स्वराज्यं" स्वस्येन्द्रस्य यत् "राज्यं" राजत्वं तदनु लक्ष्यावस्थिता इति शेषः॥ [विषूवतः—विष्लृ व्याप्तौ (जु०उभ०) अस्मादौणादिकः कुप्रत्ययः ततो मतुप् "ह्रस्वनुड्भ्यां मतुप् (६,१,१७६)"—इति मतुप उदात्तत्वम्, "अन्येषामपि दृश्यते (६,३,१३७)"—इति संहितायां दीर्घः, व्यत्ययेन मतोर्वत्वम्। मध्वः—"जसादिषु छन्दसि वा वचनम् (१,४,७)"—इति "घेर्ङिति (७,३,१११)"—इति गुणा-भावे यणादेशः। गौर्यः—"षिद्गौरादिभ्यश्च (४,१,४१)"—इति ङीष्, जसि यणादेशे "उदात्तस्वरितयोर्यणः (८,२,४)"—इति परस्यानुदात्तस्य स्वरितत्वम्। सयावरीः—या प्रापणे (अदा०प०) "आतोमनिन् (३,२,७४)" —इति वनिप्, "वनोरच (४,१,७)"—इति ङीब्रेफौ। मदन्ति—मदी हर्षे (दि०प०), श्यनि प्राप्ते व्यत्ययेन (३,१,८५) शप्। वस्वीः—"वस निवासे (भ्वा०प०)शृस्वृस्निहि (उ०,१,१०)"—इत्यादिना वसे रुप्रत्ययः, "धान्ये नित् (उ०१,९)"—इत्यनुवृत्ते राद्युदात्तत्वम, "वोतो

गुणवचनात् (४,१,४४)"—इत्यत्र "गुणवचनात् ङीषाद्युदात्तार्थम् (४, १, ४४ भा०)"—इतिवचनात् वसुशब्दात् ङीपि यणादेशः, असि "वाच्छन्दसि (६,१,१०६)"—इति पूर्वसवर्णदीर्घत्वम्। स्वराज्यं—"अकर्मधारये राज्यम् (६,२,३०)" —इत्युत्तरपदाद्युदात्तत्वम्] ॥ १ ॥

अथ द्वितीया।

१ २ २ १ २ १ २ २ १ २
ता अस्य पृशनायुवः सोमꣳ श्रीणन्ति पृश्नयः।
२ १२ १२ २ १ २ १ २ २ १ २ १
प्रिया इन्द्रस्य धेनवो वज्रꣳ हिन्वन्ति सायकं
२ २ १ २ २ १ २
वस्वीरनु स्वराज्यम् ॥ २* ॥

"ताः" पूर्वोक्ताः† "अस्य" इन्द्रस्य "पृशनायुवः" स्पर्शनकामाः पृश्नयः नानावर्णाः‡ गावः इन्द्रेण पातव्यं "सोमं" पयसा "श्रीणन्ति" मिश्रीकुर्वन्ति, "इन्द्रस्य" "प्रियाः" प्रीतिहेतुभूताः "ताः" "धेनवः" "सायकं" शत्रूणामन्तकारकं¶ "वज्रं" आयुधं "हिन्वन्ति" शत्रुषु प्रेरयन्ति इन्द्रो यथा शत्रुषु वज्रं प्रेरयति तथेन्द्रस्य मदमुत्पादयन्तीत्यर्थः। अन्यत् पूर्ववत्॥ [हिन्वन्ति

---

* ऋ० वे० १, ६, ७, १।

† 'ताः—धेनवः'—इति वि०।

‡ 'पृश्नयः—गावः'—इति वि०।

¶ 'सायकं—शरणभूतं चेपणीयम्'—इति वि०।

Digitized by Google

हिंवि प्रीणनार्थः (भ्वा० प०), इदित्त्वान्नुम् । सायकं—षो अन्त-कर्मणि (दि० प०), धवुल्यात्त्वे युगागमः ॥ २ ॥

अथ तृतीया ।

१ २ १ १ २ ३ १ १ १२ ३ १ १
ताअस्यनमसासहःसपर्य्यन्तिप्रचेतसः ।
३ २ १ ३ १ ३२१
व्रतान्यस्यसश्चिरेपुरूणिपूर्वं
२ ३ १ ३ १ ३ ३ १ १ २
चित्तयेवस्वोरनुस्वराज्यम् ॥ ३ * ॥ १५

"प्रचेतसः" प्रकृष्टज्ञानाः "ताः" गावः "अस्य" इन्द्रस्य "सहः" बलं "नमसा" स्वकीयेन पयोरूपेणान्नेन "सपर्य्यन्ति" परिचरन्ति "पुरूणि" बहूनि "अस्य" इन्द्रस्य "व्रतानि" असुर-बधादि-रूपाणि वीर्य-कर्माणि "सश्चिरे" सेविरे ज्ञातव्यतया इत्यर्थः । किमर्थम्? "पूर्वचित्तये" युयुत्सूनां असुराणां पूर्वमेव प्रज्ञापनार्थं† [अनेन युध्यमाना वृत्रादयः सर्वे मरणं प्राप्ताः किमर्थं भवद्भिः प्राणास्त्यजन्त इति तेषां बोधनायेत्यर्थः । अन्य-त्पूर्ववत् ॥ पूर्वचित्तये—चिती सञ्ज्ञाने (भ्वा० प०), भावे क्तिन्, मन्क्त्यधादित्वात् पूर्वपदान्तोदात्तत्वम् ॥ ३ ॥ १५

* ऋ० वे० १, ६, ७, २ ।

† 'पूर्व-चित्तये—पूर्व-प्रज्ञापनाय'—इति वि० ।

४र ३र ४ ३र ४ ५र २ २ ३र ४र ४
॥ ध्यैतम् ॥ स्वादोरित्थाविषू । वता३४औहोवा ।
१ र २ १ ० ५ ५ ३र र २
माधोःपिब । तिगौरियार३४ः । ओ६हा । याइन्द्रेण
३र ३र१ २ १ २ ५
सयावरीवृ । श्रोमार३दा । तिशोर२ । भार३४था ॥(१)
३र ४ २ ४ ५र २ २ ३र ४र ५ १ ३र
ताअस्यपृशना । युवा३४औहोवा । सोमं७श्रीण । ति
१ ० ५ ५ २ १र २ र १ ३र १
पार्श्वयार३४ः । ओ६हा । प्रियाइन्द्रस्यधेनवोव । ज्राउ
२ १ २ ५ ३र ४ २
ह्वार३यिन्वा । तिसार२ । यार३४काम् ॥(२) ताअस्यन
४ ५र २ २ ३र ५र ५ १ १ १ ०
मसा । सहा३४औहोवा । सापर्य्यन्ति । प्रचायितसा
५ ५ २ १र २ र १ २
र३४ः । ओ६हा । व्रतान्यस्यसश्चिरेपू । रुणार३यिपू ।
२ ५ १ र २ २ १
वर्चा२यि । तार३४यायि । वस्वोरनुस्वा३रा । ऊर्म्मायि ।
२ ५र र २ ५
जार२यार३४औहोवा । वार३४सू(३) ॥ ४ * ॥ [१] १५

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य
पञ्चमः खण्डः† ॥ ५ ॥

---

* ऊ० गा० १०प्र० १ख० ४सा० ।

† 'उक्त' माध्यन्दिनं पवमम्'—इति वि० ।

Digitized by Google

अथ षष्ठे खण्डे,* प्रथमतृचे—

प्रथमा।

१ २ ३ १र २र२ १र २र ३ १

असाव्यꣳशुर्मदायाप्सुदक्षोगिरिष्ठाः।

३ २उ ३ १ २

श्येनोनयोनिमासदत्॥ १ †॥

"गिरिष्ठाः" पर्वत-जातः "अंशुः" सोमः "मदाय" मदार्थम् "असावि" अभिषुतः "अप्सु" वसतीवरीषु "दक्षः" प्रवृद्धश्च भवति। किञ्च "श्येनो न" यथा श्येनः पक्षी वेगेनागत्य स्थानमासीदति तद्वदयं सोमः "योनिं" स्वकीयं स्थानम् "आसदत्" आसीदति॥ १॥

अथ द्वितीया।

१ १र २र ३ १ २ ३ १ ३ १र २र ३ २

शुभ्रमन्धोदेववातमप्सुधौतन्नृभिःसुतम्।

१ २ ३ १ ३ १ २

स्वदन्तिगावःपयोभिः॥ २ ‡॥

यत् "देववातं" देवैः प्रार्थितं¶ "शुभ्रं" शोभनम् "अन्धः" अन्नस्वरूपं "नृभिः" नेतृभिः "सुतम्" अभिषुतम् "अप्सु"

---

* 'इदानीं तृतीय-सवनमुच्यते'—इति वि०।

† ऋ० आ० ५, २, ४, ७ (२आ० ११५०) = ऋ० वे० ७, १, २४, ४।

‡ ऋ० वे० ७, १, २४, ५।

¶ 'देववातं—देवानां भक्षणीयम्'—इति वि०।

Digitized by Google

वसतीवरीषु "धौतं" शोधितं सोमं "गावः" पशवः "पयोभिः" आशिरैः "स्वदन्ति" स्वादयन्ति ॥

"धौतंसुतं"-"धूतःसुतः"—इति पाठौ ॥ १ ॥

अथ तृतीया।

२ ३ २ ३१२ ३२ ३१ २ ३ १ १
आदीमश्वन्नहेतारमशूशुभन्नमृताय।
२ ३ १ २ ३ १ २
मधोरसꣳसधमादे ॥ ३ * ॥ १६

"आत्"† अनन्तरं "हेतारं" प्रेरकम्‡ "ईम्"¶ एनं "मधोः" मधुरस्य सोमस्य "रसं" "सधमादे" यज्ञे "अमृताय" अमरणाय "अशूशुभत् ऋत्विजः शोभयन्ति। तत्र दृष्टान्तः— "अश्वं न" यथा प्रेरका अश्वं सङ्ग्रामे शोभयन्ति तद्वत् ॥

"हेतारं"-"हेतारः"—इति पाठौ, "मधोः"-"मध्वः"— इति च ॥ ३ ॥ १६

१ २ १ २
॥ सन्तनि ॥ असाहाउ। वायाꣳशुर्मा३१उवा२३।
५ २ १ २ १ ३२ २ १ १
दा२३४या। अण्सुदच्चोगिरिष्ठा१ः। श्येनोहाउ। ना
२ २ ५ २ १
योनिमा३१उवा२३। सा२३४दात् ॥(१) शुभ्रम

* ऋ० वे० ७, १, २५, १।

†, ¶ "आत्"—"ईम्"—इत्येतावुपसर्गौ—इति वि०।

‡ 'हेतारं—शीघ्रगामिनम्'—इति वि०।

२र र१ र२ १२र१ २ ३ २ २ १
मन्धोदेववातमप्सुधौतन्नृभीःसुतार्म्। स्वदाहाउ। ता

२ २ ५ १र २र १ २ १
यिगावःपा३१उवार३। यो२३४भीः॥(२) आदीमश्वन्न

र २र १ र २ १ २र ३ १ १ १ १ १ १ १
श्वेतारमध्रुध्रुभन्नमृतायार३४५। मधोर्हाउ। रासध

१ ५
सदाधा३१उवा२३। मा२३४दे(३)॥ १० *॥ [१]

१ र २ १ र र २
॥ गौषूक्तम्॥ असाव्यंशुर्मदौ। हौहोवाहायि।

र १ २ १ र २ १
हाया। अप्सुदक्षोगिरो२। ऊवायि। ऊवा२यि। ष्ठा२ः।

र २र २ २ १ १
श्येनोनयोनिमौ२। ऊवायि। ऊवा२यि। सादा२३त्।

१ ३ ५र र २ १ र २र र र २
होर्वा२३४औहोवा॥(१) शुभ्रमन्धोदेवौ। हौहोवाहा

र १ २ १ र २ १
यि। वाताम्। अप्सुधौतन्नृभौ२। ऊवायि। ऊवा

१ १ र २ १
२यि। सूता२म्। स्वदन्तिगावःपौ२। ऊवायि। ऊ

१ १ ३ ५र र
वा२यि। योभा२३यिः। हो२वा२३४औहोवा॥(२)

१र २र १ २ १ र र १२ र १ र
आदीमश्वन्नहौ। हौहोवाहायि। ताराम्। अध्रुध्रु

० ऊ० गा० १प्र० १ख० १० खा०।

२ १ १ १ र
भवमौ२। ऊवायि। ऊवा२यि। ताया२। मधोर
२ १ १
सꣳसधौ२। ऊवायि। ऊवा२यि। मादा २ ३ यि।
१ ५ र र १ १ र २ ३ १ १ १ १
हो२वा२३४औहोवा। अग्निराऊता२३४५:(३)॥ १८* ॥[२]

१ र २ १
॥ ऐड अर्चितम्॥ असाव्यꣳशो। हायि। मदा
२ १ र २ २ २ र र ३
२३या। अप्सु२ज्ञोगा१यिरा३यिष्ठाः। श्येनोनयो२३४
५ १ २ २ १ ४ ५
हायि। नायिमा३हायि। सदात्। औ२३होवा ॥(१)
२ १ १र१ २ १ र २
शुभ्रमन्धो। हायि। देववा२३ताम्। अप्सुधौतमृभा
२ २ ३ ५ १ १ २
१यिःसू३ताम्। स्वदन्तिगो२३४हायि। वा:पा३हायि।
र १ ४ ५ १र१र १ २
योभायि:। औ२३होवा॥ (२) आदीमश्वो। हायि। न
१र २ १ र २ २ २ र ३
हेता२३राम्। अप्सुभ्रुभमा१र्ना३या। मधोरसो२३
५ १ २ २ र १ १ ४ ५
४हायि। साधा३हायि। मादा। औ३होवा।
होई। डा(३) ॥ ४ † ॥ [३]

* ऊ० गा० ७प्र० २अ० १८सा०।

† ऊ० गा० १६प्र० १अ० ४सा०।

॥ अध्वर्य्यवसोमसाम ॥ असाव्यꣳशुर्म्मदाया ३ ए। अप्सुदक्षोगिरिष्ठाः। श्येनोनया२३। हायि। नायि माउवा। सादाउवा३ ॥(१) शुभ्रमन्धोदेववाता३मे। अप्सुधौतन्नृभिःसुताम्। स्वदन्तिगा२३। हायि। वाः पाउवा। योभाउवा३ ॥(२) आदीमश्वन्नचेतारा३मे। अशूशुभन्नमृताया। मधोरसा२३म्। हायि। साधा उवा। मादाउवा३। ऊ३२३४पा(३) ॥ २ * ॥ [४] १६

अथ प्रगाथरूपे द्वितीय-सूक्ते†—

प्रथमा।

अभिद्युम्नम्बृहद्यशइषस्पतेदिदीहिदेवदेवयुम्।

विकोशम्मध्यमंयुव ॥ १ ‡ ॥

हे "इषस्पते" अन्नस्य पते! "देव!" स्तोतव्य सोम! "द्युम्नं" द्योतमानं "बृहत्" प्रभूतं "यशः" अन्नरूपं "देवयुं"

---

* ऊ० गा० १०प्र० २ख० २सा०।

† 'श्यावनं साम'—इति वि०।

‡ ऋ० आ० ६, २, ४, २ (२भा० २२६पृ०)=ऋ० वे० ७, ५, १८, ४।

Digitized by Google

देवान् कामयमानं हविर्लक्षणं त्वदीयं रसम् "अभि दीदिहि" अस्मभ्यमाभिमुख्येन प्रकाशय प्रयच्छेत्यर्थः। [यद्वा, हे सोम! यतो ऽत्र देवयुं देवानिच्छन्तं यजमानमभिलक्ष्य प्रकाशय। आमन्त्रितस्याविद्यमानवत्त्वेन (८,१,१९) पादादित्वादनिघातः। किञ्च "मध्यमम्" अन्तरिक्ष-स्थितं "कोशं" मेघं "वियुव" ह्यस्य विगमय विश्लेषय॥

"देवयु"-"देवयुः"---इति पाठौ॥१॥

अथ द्वितीया।

१ २ ३ ३ २र ३ २ ३ २उ १ २ १ १ २
आव च्यस्व सुदक्ष चम्वोः सु तो विशां वह्निर्न विश्पतिः।
२ १ ३ १ १ ३ १ २ ३ २उ ३ १ २ ३ १ २
वृष्टिं दिवः पवस्व रीतिमपो जिन्वन् गविष्टये धियः॥ २ *॥ १७

हे "सुदक्ष" शोभन-बल! "चम्वोः" अधिषवण-फलकयोः "सुतः" अभिषुतः त्वं "वह्निः न विश्पतिः" सर्वासां प्रजानां वोढा राजेव "विशां" प्रजानां वोढा सन् "आ वच्यस्व" आगच्छ कलशमापवस्व [वचेर्गत्यर्थस्य व्यत्ययेन श्यनि रूपम्। किञ्च त्वम् "अपः" अपाम् उदकादीनां "रीतिं" व्याप्तां गतिं वृष्टिं "दिवः" द्युलोकात् "पवस्व" कुरु। किं कुर्वन्? "गविष्टये" गामात्मन इच्छते यजमानाय "धियः" कर्माणि "जिन्वन्" प्रेरयन्॥

"अपोजिन्वन्"-अपाञ्जिन्व"—इति पाठौ॥२॥१७

* ऋ० वे० ७, ५, १८, ५।

॥ च्यावनम् ॥ अभा२३४यि । द्यु म्नम् । बृहा२३४ द्यशा६ः । हाउ । आयिषस्पा२३४ता यि । दिदीहिदेव देवायू२३४ऌ्हायि । वायिकोशा३म्मा३ । ध्यामा२३ऌ्हा३४३यि । यू२३४वो६हायि ॥(१) विको२३४ । ग्रम्म । ध्यमा२३४युवा६ । हाउ । आवच्चा२३४स्वा । मुदच्च चमुवो हतो२३४हायि । वायिशांवा३क्रा३यिः । नावा२३हा३४३यि । य्या २ ३ ४ तो६हायि ॥(२) विश्वा२३४म् । वह्निः । नवा३४यिश्पतो६ः । हाउ । वाष्टिन्दा२३४यि वाः । पवस्वरीतिमापो२३४हायि । जायिन्वान्गा३वा३यि । हाया२३हा३४३यि । धा२३४यो६हायि(३) ॥ ११ * ॥ [१]

॥ ऐषिरम् ॥ अभिद्यु म्नम्बृहद्या३शाः । आयिषस्प ते । दायिदीश्हायिदे२ । वादा१यिवायू२म् । वायि

* ऋ० मा० ३प्र० १ख० ११सा ०।

१ ४ ५ ४ ५ १ र
को१ग्राम्बार२३ । ध्यमोवा । यू५वो६हायि ॥(१) विको

२ १ २ १ ७ १ २
ग्रम्मध्यमंयू३वा । चावच्यस्व । सूदत्वाचा२ । मूवो१:

१ २ ४ ५ ४
सुता२: । वायिश्वा१वाक्का२३यि: । नवोवा । ग्यां५तो

५ १ र २ १ १
६हायि ॥(२) विश्वांवह्निन्नविश्पा३ती: । वाष्टिन्दिव: ।

१ ७ १ २ १ २
पावस्वारी२ । नायिमा१पा२: । जायिन्वा१न्गावा२३

४ ५ ४ ५
यि । ष्टयोवा । धा५यो६हायि(३) ॥ १ * ॥ [२]

२ १ २ ४ ५ २ ३ ५ २ १
॥ सफम् ॥ अभिद्यू३म्नम्ब् । ह्या२३४श्रा: । इष

२ १ २र १ २ १ २ ३
स्पतायिदी२ । दीहिदायिवा३दा३यि । वा३२३४यूम् ।

७ १ २ २ २ ५
विको । ग्रम्माध्या३मा३म् । यू३४५वो६हायि(१)॥ १२† ॥[३]

३ ४ ५ ७ ३ ४ ५
॥ वाचःसाम ॥ अभिद्युम्नाम् । चाँयि । बृहद्यशा

५ १ २ र १ २ १ र १
६ए । आयिषस्पते । दायिदी१ह्यायिदे२ । वादेवयुम् ।

---

* ऊ० गा० ५प्र० १अ० १खा० ।

† ऊ० गा० ९प्र० १अ० १२खा० ।

Digitized by Google

१　२　　　　１　４　　２　　５
वायिकोऽ१आम्मा२३ । ध्या२३मा३म् । यू३४५ वो६ हा

२ ४र ५　　　　२ ४ ५ ५ १ २
यि ॥(१) विक्को३अम्मा । हो । ध्यमंयुवा६ए । आवच्य

१ ०　　　　१ र २　　１ २ ०
स्व । छदन्नाचा२ । मूवोःसुतः । वायिआ१वाक्का २३

१　४　　　　２　　５　　３ ४र
यिः । ना१३वा३यि । ध्या३४५तो६हायि ॥(२) विश्वा

५　　２　　３ ४ ५ ५ १ २ १ ०
वक्कीः । हौयि । नविश्पता६ए । वार्ष्टिन्दिवः । पाव

१ २　१ २　　　　１
स्हारी२ । तायिमपः । जायिन्वा१ग्गावा२३यि । ष्टा२

४　２　　５
३या३ । धा३४५योई६हायि(३) ॥ १४ *॥ [४] १७

अथ तृतीय-तृचे*—

प्रथमा ।

३ १र २र ३ १ २ ३ २ ३ २ ३ १ २
प्राणाशिशुर्महीनाᳪहिन्वन्नृतस्यदीधितिम् ।

२ ३ १ २ ३ १ २ ३ १ २ ३ २
विश्वापरिप्रियाभुवदधद्विता ॥ १ †॥

● ऊ० गा० १४प्र० २अ० १४सा० ।

* 'ओसं साम'—इति वि० ।

† छ० आ० ६, २, ३, ५ (२भा० २११ पृ०) = ऋ० वे० ७, ५, ४, १ ।

"प्राणा" ते [अनिते : प्रानचि "बहुलञ्छन्दसि (२,४,७३)" —इति विकरणस्य लुक्, "सुपां सुलुग् (७,१,३९)"—इति सुप आकारादेशः] यज्ञस्य प्रापयिता चेष्टयिता "मह्नीनां" महतीनां मंहनीयानां वा अपां "शिशुः" पुत्र-स्थानीयः सोमः "ऋतस्य" यज्ञस्य "दीधितिं" प्रकाशकं धारकं वा स्वीयं रसं "हिन्वन्" प्रेरयन् "विश्वा" सर्वाणि "प्रिया" प्रियाणि हवींषि "परिभुवत्" परिभवति व्याप्नोति । "अध" अपिच "द्विता" द्विधा भवति दिवि च पृथिव्याञ्च वर्त्तत इत्यर्थः ॥

"प्राणा"-"क्राणा"--इति पाठौ ॥ १ ॥

अथ द्वितीया ।

१ २ ३१ २ ३ २ १ २ ३ १र २र ३२
उपचितस्यपाप्योऽ२ऽरभक्तयद्गुहापदम् ।

३१ २ ३१र २र ३१ २ ३ २
यज्ञस्यसप्तधामभिरधप्रियम् ॥ २* ॥

"चितस्य एतन्नामकस्य ऋषेस्तोतुर्मम यज्ञे "गुहा" गुहायां हविर्धाने वर्त्तमानयोः "पाप्योः" पोषणवद्रुठयोः अधिषवण-फलकयोः "पदं"स्थानं सोमः "यत्" यदा "उप अभक्त" सम-भजत । "अध" अनन्तरं "यज्ञस्य" "धामभिः" च धारकैः "सप्त" सप्तभिश्छन्दोभिः गायत्र्यादिभिः "प्रियम्" प्रीणयितारं सोमम् "अभि"ष्टुवन्ति ऋत्विजः [अपि वा सप्त सर्पणशीलैर्वसतीवर्या-दिभिरुदकैः सोममभिषुण्वन्ति ॥ २ ॥

* ऋ० वे० ७, ५, ४, १ ।

Digitized by Google

अथ तृतीया।

१ २ ३ १ २ १ २ ३ १र २र ३ २
त्रीणित्रितस्यधारयापृष्ठेष्वैरयद्रयिम्।
१ २ ३ १ २ ३ ३ २ १ २
मिमीतेअस्ययोजनाविसुक्रतुः॥ ३* ॥ १८

सोमः "त्रितस्य" मम यज्ञस्य सम्भूतानि "त्रीणि" सवनानि धारया आत्मीयया "वि धारया"। किञ्च पृष्ठेषु" सामसु "रयिं" दातारमिन्द्रम् "ऐरयत्" आयमतु "सुक्रतुः" शोभन-यज्ञः स्तोता "अस्य" इन्द्रस्य "योजना" संयोजनादीनि स्तोत्राणि "वि मिमीते" करोति† यस्मादेवं तस्मादिन्द्रं सामसु प्रेरयत्वित्यर्थः॥

"ऐरयत्"—"एरया"—इति पाठो॥ ३ ॥ १८

२र १ र २र १
॥ओम्॥ प्राणा। शिशुर्म्महो। नाम्। हो
१ २र १ र
ई२। हो। वाहोयि। हिन्वन्नृतस्यदीधितायिम्।
२ १ २ २ १ २ २ १ २
विश्वापा१रा२३यि। प्री३याभू३वात्। अधा २ ३ हिता
२ १ र २र १ १
३४३॥(१) उपा। त्रितस्यपा। ष्योः। होई२। हो।

---

* ऋ० वे० ७, ५, ४, ३।

† 'विमिमीते—मा माने, मानं करोति'—इति वि०।

२र १ र २ १ २
वाहोयि। अभक्तयद्भुहापदाम्। यद्मास्या१सा २ ३।
२ १ २ १ १ २ २र१
:प्ना३धामा३भायि। मधा२३प्रिया२३४३म् ॥(२) चीणी।
र २र १ १ २र१ र
त्रितस्यधार। या। होई२। हो। वाहोयि। पृष्ठे
२ १ २ २ १ २१
ष्वैरयद्र्यायिम्। मिमायिते१आ२३। स्या३योजा३ना।
१ २ १
विसूर२३क्रतू२३४३:। औ२३४५ई। डा(३) ॥ १२* ॥ [१]

२र र १ २ १
॥ त्रैतम् ॥ प्राणाग्निशुर्मंहायिनाम्। हिन्वनृतस्य
र २ र र ऽ१ ५ १
दीधितायिम्। विश्वापरिप्रिया३भूवो२३४हायि। धा२
३ ५र र २ १ २ १ १ १ १ २
धा२३४औहोवा। ए३। हिता२३४५ ॥(१) उपचितस्य
र१ २ १ र २ २ ऽ १
पाषायो: अभक्तयद्भुहापदाम्। यज्ञस्यसप्ताधा३माभी
५ १ २ ५र र २ १ ३ १ १ १ १
२३४हायि। आ२धा२३४औहोवा। ए३। प्रिया२३४५
२र र १ २ १ र र
म् ॥(२) चीणित्रितस्यधाराया। पृष्ठेष्वैरयद्र्यायिम्।

* ऊ० गा० ३प्र० १ख० १२गा०।

१ २ २　२ ३ १　५　१　२　५२ २
मिमीतेअस्ययो३जानो२३४हायि । वा२यिसू२३४औहो

२　१ २ १ १ १ १
वा । ए३ । क्रतू२३४५ः(३) ॥ २* ॥ [२]

१२ २　१२　२
॥ सुज्ञानम् ॥ प्राणाश्शिशुः । महीनाम् । हिन्व

१　२　२ २ १　१२
न्नार्त्ता२ । स्यदीधितायिम् । विश्वापारा२यि । प्रिया ।

२　५२ २　१ २　२
भू२वा२३४औहोवा । अधद्वितए३ ॥(१) उपच्चिता । स्य

१ १　१　१　२ १　२　१
पार्थियोः । अभक्तायार२त् । गुहापदाम् । यज्ञस्यासा

१२　२　५२ २　१　१
२ । प्रधा । मा२भा२३४औहोवा । अधप्रियमे३ ॥(२)

१२　२ १　२ २ १　१
चौणिच्चिता । स्यधा२या । पृष्ठेषूवा२यि । रयद्रया

२ २ १　१२　२　५२ २
यिम् । मिमीतेआ२ । स्यो । जा२ना२३४औहो

१　२　१　१ १ १ १
वा । विसुक्रतुरि३उपा२३४५(३) ॥ २०† ॥ ३]

१२ २　२ १　५
॥ दैवोदासम् ॥ प्राणा३१ । शिशू३१२३४ः । म ।

१　२　२ २　२ १　५२
हा३यिनाम् । हिन्वा३१न् । न्नता३१२३४ । स्यदी ।

* ऊ० गा० ४प्र० १ख० १सा० ।

† ऊ० गा० ७प्र० १ख० २०सा० ।

२ २ ३ २ ३ २ ५र
धा३यितायिम्। विश्वा३१। परा३१२३४यि। प्रिया।

२ र ३ ५ ३ २ १ ५ ३ २
भू३वात्। अधा३१। हिता३। ओ२३४वा॥(१) उपा

२ २ ५र १ २ ३ २
३१। चिता३१२३४। स्वपा। पा३योः। अभा३१।

३ २ ५र २ २ ३२ ३
क्तया३१२३४त्। गुहा। पा३दाम्। यज्ञा३१। स्व

२ ५र २ २ ३ २ ३ २
सा३१२३४। स्वधा। मा३भायिः। अधा३१। प्रिया३

१ ५ ३र २ ३ २
म्। ओ२३४वा॥(२) चौणी३१। चिता३१२३४। स्व

५र २ २ ३ २ ३२ ५
धा। रा३या। पृष्ठा३१यि। ध्रुवा३१२३४यि। रयत्।

२ २ ३ २ ३र २ ५ र
रा३यायिम्। मिमा३१यि। तेष्वा३१२३४। स्वयो।

२ ३ ३२ ३ २ १ ५ ३
जा३ना। विसू३१। क्रतू३ः। ओ२३४वा। ऊ२३४

५
पा(३)॥ २१*॥ [४]

१र र र १ २ १२
॥ अध्यम्॥ प्राणाग्निमूर्२र्म। चौनोवा। हिन्वन्

१ २ ३र २ १ ३र १ ११र२ १
ता। स्वदीधितायिम्। विश्वापरिप्रियाभुवद्। धार

* ऊ० गा० ७प्र० २अ० २१खा०।

१ १२ १ १ १
३। हिताउवा। श्रूधिया२। ए२३हिया३४३। औ२
३४५ई। डा(१)॥ १४*॥ [५]

१२ १२ १ ५ १ २ ५
॥ पौष्कलम्॥ प्राणाम्नाइयिप्रुः। मांहा२३४यिनाम्।
१ १ १ १ २ २ ५ १ १
च्छिन्वानृता। स्वादायिधी२३४तोम। विश्वापरायि।
७ २ २ १ २ १ १ ११ २ १ १
प्रिया२भ२३४५वा६५ईत्। मधद्विता२३४५॥(१) उपत्नी३
४ ५ २ २ ५ १ १ ११ २ २
तस्य। पाषा२३४योः। मभाक्तयात्। गूद्दापा२३४
५ २ १ ७ २ १
दाम्। यन्नास्यसा। प्रधा२मा२३४५भा६५६यिः। म
१ १ १ १ १ १ १२ १ १ ४ ५ २ २ ५
र्धप्रिया२३४५म्॥(२) त्नौष्नि त्नौ३तस्य। धारा२३४या।
२ १ २ १ २ २ ५ २ १ २
पृष्ठायिषुवायि। रायद्रा२३४यायिम्। मिमायितेभ्रा।
७ २ २ १२ १ १ १ १
स्ययो२जा२३४५ना६५६। विसुक्रतू२३४५ः(३)॥ २*॥ [६]

१२ २ २ १ २ १ २
॥ अध्यम्॥ प्राणाम्निभू२र्म्ना। त्नौनोवा। हिन्वन्नृ
१ १ १२ २ १ २२ १ १ १२ २ १
ता। स्वदीधितायिम्। विश्वापरिप्रियाभुवद्। धा२३।

* ज० गा० ८प्र० १ख० १४सा०।

† ज० गा० ८प्र० २ख० २सा०।

२ १र १ र १
द्विताउवा । श्रूधिया२ ॥(१) उपश्चिता२स्य । पार्थियो

२१ २१ २ १र २ १ २१ २१र २
वा । अभक्षयात् । गुहापदाम् । यज्ञस्य सप्तधामभि

१ २ १र १र
र । धार२३ । प्रियाउवा । श्रूधिया२ ॥(२) त्रीणिचि

र १ २१र११ २२१ १
ता२स्य । धारयोवा । पृष्ठेषुवायि । रयद्रयायिम् ।

र १र र१ १र १ २ १र
मिमीतेअस्ययोजनावि । सू२३ । क्रताउवा । श्रूधि

१ १ १
या२ । ए२३हियाउ४३ । औ२३४५ई । डा(३) ॥ ५*॥ [७]

१रर र र १ २
॥ वारवन्तीयोत्तरम् ॥ प्राणाशिशाऔहोहायि । मा

३ ५ २ १ ५ १ र र
हा२३४यिनाम् । चिन्वाना२३४हा । तस्यदीधितिंविश्वा

२ ३र ४र ५ १ २ ५ २ ३ ५
पा३४ । औहोवा । इहा२३४हायि । उरुवा२३४रायि ।

२ १र १ १ ७ २ ३र ४र ५ १ २ ५
प्रियाभु । वादधद्दा३४ । औहोवा । इहा२३४हायि ।

३र २ ५र ५ २ र प
औहो३१२३४ । ता । एहिया६हा ॥(१) उपत्रिताऔ

१ २ ३ ३ ५ २ १ ५ १ र
होहायि । स्थापाषा२३४योः। अभाक्षा२३४हा । यज्ञ हा

* ऊ० गा० ११प्र० १अ० ५खा० ।

२ ३र ४र ५ १ ७ ५ २ ३
प्रद्ंयग्मस्या३४ । औहोवा । इहा२३४हायि । उङ्कवा२
५ २ १र २ १ ७ २ ३र ४र ५ १ ३
३४सा । प्रधाम । भायिरधप्रा३४ । औहोवा । इहा
५ ३र २ ५र ५
२३४हायि । औहो३१२३४ । याम् । एचियाइहा ॥(२)
२र र र १ २ ३ ५ २ १
त्रीणित्रिताऔहोहायि । स्याधारा२३४या । पृष्ठायिषू
५ १र र २ ३र ४र ५ १ ३
२३४हायि । ऐरयद्रयिम्मिमीता३४ । औहोवा । इहा
५ २ ३ ५ १ १र २ १ ७ २
२३४हायि । उङ्कवा२३४आ । स्ययोज । नाविस्तुका२
३र ४र ५ १ ३ ५ ३र २
४ । औहोवा । इहा२३४हायि । औहो३१२३४ । तूः ।
५ १ ५ ४
एहियायाईहा । होपुई । डा(३) ॥ ८* ॥ [८]

२र र १ २ २ १
॥ वार्शम् ॥ प्राणाशिशूः । माहा ३ यिनाम् । चि
र ७ ३ ५ र
त्वन्तस्यदीधि । तायिम् । विश्वा२पा२३४रायि । प्रि
र २ ७ २ १ ३ ५र र
याभुवा३त् । ई३या । अध । दा२यिता२३४औहोवा ॥(१)
२ १ ३ २ १ र
उपत्रिता । स्यपाषा३योः । अभक्तयज्ञ,हाप । दाम् ।

* का० गा० १५प्र० २ख० ८षा० ।

० ३ ५ १ र २ ३ २ २
यम्रा२स्रा२३४सा। प्राधामभा३यिः। ई३या। अध।
२ ५र र २र १ २ २
प्रा२या२३४औहोवा ॥(२) चौणिचिता। अधारा३या।
१ र र ० ३ ५ १ र
पृष्ठेषेरयद्र। यायिम्। मिमा२यितेर३४आ। आयो
२ २ २ १ ३ ५र र २
जना३। ई३या। विसु। का२नू२३४औहोवा। ऊ
५
२३४पा(३) ॥ ८* ॥ [९] १८

अथ चतुर्थ-तृचे†—

प्रथमा।

१ २ ३ १ २ ० २ ३ १ २ ३ २
पवस्ववाजसातयेपवित्रेधारयासुतः।
१ २ ३ १ २ ३ २ ३ १ ३ २
इन्द्रायसोमविष्णवेदेवेभ्योमधुमत्तरः॥ १‡ ॥

हे "सोम!" "सुतः" अभिषुतः त्वम् "इन्द्राय" "विष्णवे" च अन्येभ्यो मित्रादिभ्यः "देवेभ्यः" "मधुमत्तरः" अतिशयेन माधुर्य्योपेतः सन् "वाजसातये" अन्न-लाभाय "पवित्रे" "धारया" "पवस्व" चर॥

---

* ऊ० गा० १६प्र० २ख० ८गा०।

† "गौरीवितं साम"—इति वि०

‡ ऋ० वे० ७, ४, २८, १।

Digitized by Google

"वाजसातये"-"वाजसातमः"—इति पाठौ, "मधुमत्तरः"-"मधुमत्तमः"—इति च ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २
त्वा॒ᳫँ रि॑हन्ति धी॒तयो॒ हरिं॑ प॒वित्रे॑ अ॒द्रुहः॑।

३ १ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
व॒त्सं जा॒तं न मा॒तरः॒ पव॑मान॒ विध॑र्मणि ॥ २* ॥

हे "पवमान" पूयमान सोम ! "वि धर्मणि" विविधं हविषां धारकेण† यज्ञे "अद्रुहः" द्रोह-वर्जिताः "धीतयः" अङ्गुलयः [धीतय इति अङ्गुलिताम (निघ० २,५,७)] "हरिं" हरित-वर्णं "पवित्रे" स्थितं "त्वां" "रिहन्ति" लिहन्ति निष्पीड़नार्थं स्पृशन्तीत्यर्थः। तत्र दृष्टान्तः—"वत्सं जातं न मातरः"; 'मातरः' मातृ-भूता गावः उत्पन्नं 'वत्सं' यथा 'लिहन्ति' तद्वत् ॥

"धीतयः"-"मातरः"—इति पाठौ, "मातरः"-"धेनवः"—इति च ॥ २ ॥

अथ तृतीया।

१ २ ३१ २ ३ १ २ ३ २
त्वं द्यां च॑ महिव्रत पृथि॒वीं चाति॑ जभ्रिषे।

१ २ ३ १ २ ३ १ २ ३ २
प्रति॑ द्रा॒पिम॑मुञ्चथाः॒ पव॑मान महित्व॒ना ॥ ३‡ ॥ १९

* ऋ० वे० ७, ४, १८, २।

† 'विविधे कर्मणि'—इति वि०।

‡ ऋ० वे० ७, ४, १८, ४।

Digitized by Google

हे "महिव्रत" महाकर्मन् सोम! "त्वं" "द्यां" द्युलकं "पृथिवीं च" "अति जभ्रिषे" अत्यन्तं बिभर्षि [डुभृञ् धारण पोषणयोः (त०उ०), तस्य छान्दसे लिटि (३,४,६) सर्वविधीनां छन्दसि वैकल्पिकत्वात् अत्र इडागमः । अन्तरिक्षे सोमात्मना,- पृथिव्यां लता-रूपेणेति एवं लोकद्वयवर्त्तित्वम्]। हे "पवमान' चरन्! त्वं "महित्वना" महत्त्वेन युक्तः सन् "द्रापिं" कवचं* "प्रति अमुञ्चथाः" प्रतिमुञ्चसि संवृणोसि ॥ ३ ॥ १९

॥ गौरीवितम् ॥ पव । स्वा३ । जसातयायि । पवित्रे धारयासुता२३ः । आयिन्द्रायसो३१२३ । मवा पूयिष्णवायि । दायिवेभ्योमा३१२३ । धुमोवा । ता५ रो६हायि ॥ (१) तुवाम् । रिहा३ । तिधीतयाः । ह रिम्पवित्रेअद्रुहाः । वात्सञ्जाता३१२३म् । नमा५तराः । पावमाना३१२३ । विधोवा । मा५णो६हायि ॥(२) तु वम् । द्याञ्चा३ । महिव्रता । पृथिवीञ्चातिजभ्रिषा२३

---

* 'द्रापिं—द्रातव्यम् *** केषां? यजमानानाम्'—इति वि० ।

Digitized by Google

१ २र २ २ १ २र २
यि। प्रातिद्रापा३१२३यिम्। अमूपुचथाः। पावमाना
४ ५ ४ ५
३१२३। मद्दोवा। त्वापूनोद्दाायि(३) ॥ १३ ॥ [१]

२ २ २ १ २
॥ पार्थम् ॥ ओ३दो३दोयि। पव। स्ववा२। ज
२ २ ५ २ १र २ २ ३ ५
सांता२३४यायि। पवि। चेधा२। रयामू२३४ताः।
२र १ ३२ ३ ५ २ रर १
इन्द्रा। थसो२। मवायिष्णा२३४वायि। देव। भ्यो
३ ४ २र १
मा२३। धुमा३न्तापूरा६५६ः ॥(१) तुवाम्। रिहा२।
२ २ ३ ५ २ १ २ र २ ३
तिधायिता२३४याः। हरिम्। पवा२यि। चेअद्रू२३
५ २ १र ३ २ ३ ५ २
४द्राः। वत्सम्। जाता२म्। नमाता२३४राः। पव।
१र २ ४ १ १र
माना२३। विधा३र्मापूणा६५६यि ॥(२) तुवम्। द्या
३ २ १ ५ २ १र २ २ ३
म्चा२। मच्छिव्रा२३४ता। पृथि। वीम्चा२। तिजभ्री
५ २ १र २ २ ३ ५
२३४षायि। प्रति। द्रापा२यिम्। अमुचा२३४थाः।
२ २ २ १र २
ओ३दो३दोयि। पव। माना२३। मद्दा३यित्वापूना
६५६(३) ॥ १४ ॥ [२]

* ऊ० गा० ३प्र० १खं० १३गा०।

† ऊ० गा० ३प्र० १खं० १४गा०।

२ १ १ १ ५ २
॥ रयिष्ठम्॥ पवस्खवा । जसाताश्यायि । श्रौहो
१ १ २१ २ १ २ १ १ १ १ १ २
३वा । इन्द्रायसोमविष्णवा२ ३ ४ ५ यि । इन्द्रायसो ।
१ २ २ ५ २ २ २ १२ १२ १ २ ३ १
मवायिष्णा३वायि । श्रौ३हो३वा । देवेभ्योमधुमत्तरा२
१ १ १ १२ २ २ १ २ २ उ २ २
३४५ः । देवेभ्योमा । धुमात्ता३राः । श्रौ३हो३वा ॥(१)
१२ १ २ २ ५ २ २ १
तुवाᳩरिच्चा । तिधायिता३याः । श्रौ३हो३वा । हरि
२ २ १ २ १ १ १ १ २ २ १ २ २
म्यविचे अद्रू हा२३४५ः । हरिम्पवायि । चे षाद्रू३हाः ।
उ २ २ १ २२१ १२ १ १ १ १ १ २ २
श्रौ३हो३वा । वत्सञ्जातन्नमातरा २ ३ ४ ५ः । वत्सञ्जा
१ २ २ ५ २ २ १ १२ १ २
ताम् । नमाता३राः । श्रौ३हो३वा । पवमानविधर्म्म
१ १ १ १ १ २ २ १ २ २ ५ २ २
णो२३४५ । पवमाना । विधर्म्मा३णायि । श्रौ ३ हो ३
२ २ १ २ २ उ २
वा ॥(२) तुवन्ध्याञ्चा । महायिव्रा३ता । श्रौ ३ हो ३
२ १२ २ २ १ १ १ १ १ २ २
वा । पृथिवीञ्चातिजभ्रिषा२३४५यि । पृथिवीञ्चा । ति
१ २ २ ५ २ २ १ १२ १ २ २ १ १
जाभ्रो३षायि । श्रौ३हो३वा । प्रतिद्रायिममुञ्चथा२ ३
१ १ २ २ १ २ २ ५ २ २
४५ः । प्रतिद्रापायिम् । ममूञ्चा३थाः । श्रौ३हो३वा ।

१ २र १ २ ३ १ १ १ १ १ २र ३ १ २ १
पवमानमच्छित्वना२३४५। पवमानमच्छित्वना१। पवमाना।
१ १ २ ऽ २ २ ऽ २ २ ऽ २
महायित्वा३ना। औ३हो३वा। औ३हो३वा। ई३या।
ऽ २ ५ २ २ ५
ई३या ३ ४। हा। हाउवा३। ऊ३२३४पा(४) ॥१*॥ [३]
५ ३ २ २ २
॥ द्विरभ्यस्तत्वाष्ट्रीसाम ॥ पव। स्वा३। हा३हा।
३ १र १ ५ १र २ २ २ २ २र
जसातायार२३४यि। पवि। त्रधा३। हा३हा। रया
१ ५र ३ २ २ २ ३ १ १
सूतार२३४ः। इन्द्रा। यसो३। हा३हा। मविष्णार
र ५र ३र २ २ २ ३ २ १
३४यि। देवे। भ्योमा३। हा३हा। धुमा३हो२३
५ ४ ५ ५ र ३ २
४। वा। ता ५ रो ६ हायि ॥(१) तुवाम्। रिहा ३।
२ २ ३ १र १ ५ ३ २ २
हा३हा। तिधीतायार२३४ः। हरिम्। यवा३यि। हा
२ ३र १ १ ५ ३र २ २
३हायि। चअद्रहा२३४ः। वत्सम्। जाता३म्। हा
२ ३ १र १ ५ ३र २ २ २
३हायि। नमातारा२३४ः। पव। माना३। हा३हा
३ २ १ ५ ४ ५ ५
यि। विधा३हो२३४। वा। मा५णोईयायि ॥(२) तुव

---

* ऊ० गा० ८प्र० १ख० १गा०।

३र १ १ १ २ १ १ ५
म्। द्याऽवा३। हा३हा। महित्वाता२३४। पृथि।

२र १ २ ३ ३ २ १ ५ ३र
वीऽवा३। वा३वा। निजभ्रीषा२३४यि। प्रति। द्रा

२ २ २ ३ २ १ ५ ३र
पा३यिम्। वा३हायि। अमुत्वाथा२३४ः। पव। मा

२ २ ३ ३ २ १ ५ ४
ना३। वा३वायि। मघा३हो२३४। वा। त्वा५नोह

५
हायि(३)॥ ६*॥ [४]

२ २ २ ४र ५र २
॥ श्यावाश्वम्॥ पवा ३१। स्वा३वा। जसा। ता

४५ ५ १ र र १र १
३ये। एहिया। पा। वित्रेधारा। या। सुतार:।

१र र १ र १ ४ ५ १र
एहिया२। इन्द्रायसोमा३वा३यि। ष्णा२३४वायि। ऐ

१र र र १र २ ४ २
हा२यि। एहिया२। देवेभ्योमाधु३मा३। ता३४४रो

५ ३ २ २ ४ ५र २
इहायि॥(१) तुवा३१म्। रा३यिह। न्तिधी। ता२३ः।

५ १ २ १
एहिया। हा। रिम्पवित्रे। अ। द्रुहा२ः। एहि

१र २ ४ ५ १र
या२। वत्सञ्जातान्नो३मा३। ता२३४राः। ऐहा२

---

* ऊ० गा० ८प्र० २अ० ६खा०।

Digitized by Google

१र १र २ ४ २
यि । एँहिया २ । पवमानावा३यिधा३ । मा३४५णो६
५ ३ १ २ ४ ५ १ ४
हा यि ॥(२) तुवा३१म । द्या३च्च । महि । प्रा३त ।
५ १ र र २ १
एहिया । पा । र्थिवीञ्चातायि । ज । भ्रिषा २यि ।
१र १र २ ४ ५ १र
एहिया २ । प्रतिद्रापायिमा३सू३ । चा२३४थाः । ऐ
२र १र २ ४ १
हा २यि । एहिया २ । पवमानामा३हा३यि । त्वा३४५
५
नो६हायि(३) ॥ १८* ॥ [५]

२ र २ १
॥ चान्श्रीगवम् ॥ पवस्ववाजसा१तायायि । पवित्रे ।
र १ १ १ र १ र १ ३ १
धारा२३या । ऊम्मा २१५२ । सुतइन्द्रायसोमविष्णवा२
१ १ १ १ २ २ २ २
३४५यि । दायिवा३उवा । भ्यो २मा । धू२३मा । त
१ २ ४ ५ २र २ १
रा । औ३होवा ॥(१) त्वा७रिहन्तिधा१यितायाः । ह
२ १ १ र १ १ १र १
रिम्य । विन२३आ । ऊम्मा २१५२ । ऋुहोवत्सञ्जातन्न
२र १ ३ १ १ १ १ १ २ २ १
मातरा२३४५ः । पावा३उवा । मा २ना । वा २ ३ यि

* ऊ० गा० १५प्र० २ख० १८गा० ।

२ १ २ ४ ५ २
धा । मणा । औ३होवा ॥(२) त्वन्द्याश्चमद्दा १ विद्या

२ १ र र २ १ २
ता । पृथिवीम् । षाता२३यिजा । ऊम्मा२१ऽ२ । धि

र २र १ २ २ १११ १ १ २ २ १
षेप्रतिद्राविमभुञ्चथा२३४५ः । पावा३उवा । मा२ना ।

२ १ २ ४ ५ ४
मा२३हायि । त्वना । औ३होवा । होऽ५ई । डा(३) ।

॥ २०॥ [६]

२ १ ४र ५ २र २ ५
॥ आकूपारे ॥ पवस्वा२३वाज । साता२३४यायि ।

१ १र २र १ २ र २ १
पवा२यिस्वधा । रयासुताः । इन्द्रायासो२ । मविष्व

२र २ १र १ ४ २ १
वायि । देवेभ्योमा२३ । धू२३मा३ । ता३४५ रो ६ हा

२ १र ४ ५ २र २ ५ १
यि ॥(१) तुवा२रा२३यिहन्ति । धीता२३४याः । हरा

१ २र १ २ १ र १
२यिम्पवायि । चे अङ्कुषाः । वत्सञ्जाता२म् । नमात

२ १ १ ४ २ ५
राः । पवमाना२३ । वा२३यिधा३ । मा३४५णो६हा

२१ ४ ५ २ २ ५ १
यि ॥(२) तुवन्द्या२३श्चम । दिव्रा२३४ता । पृथ्वा२यि

● ज० गा० १५प्र० २अ० २०सा० ।

१२ २ १ २ १
वीच्वा। तिजभिषायि। प्रतिद्रापा२विम्। अमुच
२ १ १ ४ २ ४
थाः। पवमाना२३। मा२३वा३यि। त्वा३४५नोई२वा
यि(३) ॥ २१* ॥ [७]

२ १२ २ १
॥ आचेयम् ॥ पवस्वा। जसातार२३यायि। पा
२२ १२ २ १२ २ १२ २ २
विचे धा। रयासू२३माः। इन्द्रायसो। माविष्णावा२
१२ २ २ ४ ५ ५
यि। देवेभ्योश्मा३। धुमोवा। ता५रो६वायि ॥ (१)
१ २ १२ २ १ २ १ २२१
तुवाऽरिचा। तिधीतार२३वाः। वारिपवि। चेभद्र
२ १ २ ७५ १ २ १
२३षाः। वत्सञ्जातम्। नामातारा२ः। पवामा३नार।
४ ५ ४ ५ २ २ १
विधोवा। मा५णोई२वायि ॥(२) तुवन्धाच्वा। महिम्ना
२ १ १२ १ १ २ १ २
२३ता। पार्थिवीच्वा। तिजश्रीर२३षायि। प्रतिद्रापिम्।
० १ २ १ ४ ५ ४
आमुञ्चाया२ः। पवामा३मा३। मघोवा। त्वा५नो
५
ई२वायि(३) ॥ १०† ॥ [८]

* ऊ० मा० ११प्र० १ख० २१सा०।

† ऊ० मा० १६प्र० १ख० १८सा०।

४ २ ४ ३ ४र
॥ यज्ञायज्ञीयम् ॥ पवा५स्व। वा३जा३सा३साता
५ १ र २ १ २ २ १ १ र
यायि। पावित्रेधा। रा३यासू३ताः। इन्द्रा२य। सो
२ १ १ २ १ रर
मा२३वा। ऊम्मायि। ष्णा३वायि। दायिवेभ्योमधुमा
५२ २ १ २ १र र र
२त्तराउ॥(१) राख्व। वा३रिद्धन्तिधीतयोहरिम्यबायि।
२ १ २ २ १ र १ २ १
त्रे३आद्रू३द्याः। वत्सा२जा। तन्ना२३मा। ऊम्मायि।
२ २ १ र ५ २ १ २ १
ता३राः। पावमानविधा २ म्मणाउ॥(२) णायित्व। व
र र २ २ २ १ १
न्द्याम्त्रमच्द्रितपृथिवीश्चा। तीञजाभी३षायि। प्राता२
१र २ १ २ २ १ र
यिद्रा। पिमा२३मू। ऊम्मायि। चा३थाः। पावमान
५ २ २ ५१११
मद्दा२यित्वनाउ। वा३४५(३)॥ ८॥ [८]

१ ५ १र१र
॥ वासदस्यवम् ॥ पा२३४। व। स्वा। जासात
१ र५ १र१र
या२३यि। पा२३४। वि। त्रेधा। रायासुता२३ः।
१ र ५ १र१ १
आ२३४यि। द्रभयसो। माविष्णावा२३यि। दा२३४यि।

---

* ज० गा० १६प्र० २आ० ९गा० ।

Digitized by Google

र र ५ ११ १ १ र
वे। भ्योमा। धुमत्तरा३१उ ॥(१) तू२३४। वाम्।
५ २र १र १ ५
रिद्दा। तीधीतया२३ः। द्धा२३४। रिम्। पवायि।
२र १ १ र ५ २र १र
चे मद्र् द्धा२३ः। वा२३४। त्वम्। जाताम्। नामा
१ र ५ २र१ १
तरा२३ः। पा२३४। व। माना। वीधर्म्म णा३१उ ॥(२)
१ र ५ २र १ १
तू२३४। वम्। द्याम्बा। माद्दिव्रता२३। पा२३४।
र ५ २र १ १
थिं। वीच्चा। तीजभ्रिषा२३यि। प्रा२३४। ति।
र ५ २र १ १ र ५
द्रापायिम्। चामुच्चथा२३ः। पा२३४। व। माना।
२र १ २ १ १ १ १
माद्दित्वना३१उ। वा२३४५(३) ॥ ३* ॥ [१०]

३ ५ र १र ४ ५र २
॥ वषट्कारनिधनम् ॥ पवस्ववाजसातये। पवस्वा
४र ५ ४र ५ २ र र १ ७ १ १
३वाजसातयायि। पवित्रे धारा३यासुता२ः। रयासू१
१र ऽ २ र १ ७
ता२३ः। ओमो३वा। इन्द्रायसोमा३वायिष्णवा२यि।
१ २ १र ऽ २ र र र १ ७
मवायिष्णा१वा२३यि। ओमो३वा। देवेभ्योमध३मात्त

* ऋ० मा० २०म० १ख० ३सा०।

रा२ः । भुमास्ता१रा२३ः । ओम् । ओ२ । वा२३४ । औहोवा । ऊ२३०पा(१) ॥ २* ॥ [११]

॥ अद्याभ्रीयाद्यम् ॥ त्वन्द्याश्चमहिव्रता । पृथिवी श्चातिजज्ञी२३षापि । प्रतिद्रापिममुञ्चा२३थाः । पवमा २३ना३ । मा२ । हित्वा३४ औहोवा । ना२३ ४५ (३) ॥ १२† ॥ [१२] १९

अथ पञ्चम-खण्डः‡—

प्रथमा ।

इन्दुर्वाजीपवतेगोन्योघा

इन्द्रेसोमःसहइन्वन्मदाय ।

हन्तिरचोबाधतेपर्य्यरातिं

वरिवस्कृण्वन्वृजनस्यराजा ॥ १¶ ॥

---

* ऊ० गा० २२प्र० ३अ० २खा० ।

† ऊ० गा० २२प्र० १अ० १२खा० ।

‡ 'दाशस्पत्यं साम'—इति वि० ।

¶ ऋ० सा० ६, १, ५, ८ (२भा० ११९४०)=ऋ०वे० ७, ३, १२, ५ ।

"इन्दुः" क्षरण-शीलः "सोमः" "वाजी" बलवान् "गोन्योघा" गमनशील-गोघोनाम-रस-सङ्घातः "इन्द्रे" "सह्रः" बलकरं रसम् "इन्वन्" प्रेरयन् सोमः "मदाय" अस्य मदार्थं "पवते" क्षरति। किञ्च "रक्षः" राक्षस-कुलं हन्ति" हिनस्ति। किञ्च "अरातिं" शत्रुं "परि बाधते" परितः संहरति। कीदृशः? "वरिवः" वरणीयं धनं "कृण्वन्" स्तोतॄणां कुर्वन् "वृजनस्य" बलस्य "राजा" ईश्विता सोमइति॥

"अरातिम्"-अरातीः"—इति पाठौ॥ १॥

अथ द्वितीया।

२ ३१ १ २ ३ १ २　३ २
अधधारयामध्वापृचान

३ १र २र　३ २ ३
स्तिरोरोमपवतेअद्रिदुग्धः।

२३ १ २　३ १ २ ३ २
इन्दुरिन्द्रस्यसख्यञ्जुषाणो

३ २ ३ १ २　३ १र २र
देवोदेवस्यमत्सरोमदाय॥ २*॥

"अध" अथ अनन्तरं "अद्रि-दुग्धः" ग्रावभिर्दुग्धोऽभिषुतः सोमः "मध्वा" मदकारिण्या "धारया "पृचानः" देवान् सम्पर्चयन्† "रोम"‡ अवि-रोमभिः कृतं पवित्रं "तिरः"

* ऋ० वे० ७, ४, १३, १।

† 'पृचानः—सिच्यमानः'—इति वि०।

‡ 'रोम—रोमाणि चर्ममयानि, दशापवित्रस्येत्यर्थः'—इति वि०

तिरस्कृत्य व्यवधायकं कृत्वा "पवते" कलशेषु चरति। किञ्च "इन्द्रस्य" "सख्य" सखिभावं कर्म वा "जुषाणः" सेवमानो "देवः" द्योतमानः "मत्सरः" मदकरः* "इन्दुः" सोमः "देवस्य" इन्द्रस्य "मदाय" मदार्थं "पवते" चरति ॥ २ ॥

अथ तृतीया।

२ २ ३१ २ ३ २
अभिव्रतानिपवतेपुनानो

३ २ ३ २उ ३१२ ३र २
देवोदेवान्त्स्वेनरसेनपृञ्चन्।

२ ३ १२ ३१र ३र ३
इन्दुर्धर्माण्यृतुथावसानो

३२ १ २ ३२ ३ १ २
दशक्षिपोअव्यतसानोअव्ये ॥ ३† ॥ २०

"धर्माणि" धारकाणि "व्रतानि" कर्माणि "ऋतुथा" ऋतोः काले "वसानः" आच्छादयन् "इन्दुः" सोमः "पुनानः" पूयमानः सन् "अभि पवते" कलशानभिलक्ष्य चरति। कीदृशः? "देवः" सङ्क्रीडनशीलः‡ 'स्वेन आत्मीयेन "रसेन" इन्द्रादीन् "पृञ्चन्" सम्पर्चयन् संयोजयन्¶। तमिमं सोमं

---

* 'मत्सरः—मदनीयः मत्तयोग्यो वा"—इति वि०।

† ऋ० वे० ७, ४, १३, २।

‡ 'देवः—सोमः दानादि-गुण-युक्तः'—इति वि०।

¶ 'पृञ्चन्—तर्पयन् प्रीणयन् वा'—इति वि०।

"दश" दशसङ्ख्याकाः "चिपः"* [अङ्गुलि-नामैतत् (निघ० २,५,३)] कर्मार्थं प्रेर्यन्त इति तत्सङ्ख्याका अङ्गुलयः "साती" समुच्छ्रिते† "अव्ये" अवि-भवे पवित्रे "अव्यत" गमयन्ति [यद्वा, तत्र पवित्रे पूयमानं सोमम् अव्यत गच्छन्ति। वी गत्यादिषु (अदा०प०) लङि व्यत्ययेनात्मनेपदम् ॥

"व्रतानि"-"प्रियाणि"—इति पाठौ ॥ ३ ॥ २०

१ र र र र १ र र
॥ दाशस्पत्यम् ॥ इन्दुरौहोवाहाइया। वाजाउ।
२ र र १ २ २
वा३। हाउवा। पवतेगोनियोघाउ। वा३। हाउ
१ २ १ २ २
वा। इन्द्रायिसोमः। साहइन्वाउ। वा३। हाउवा
१ २ ५र र २१११११ २१ २
३। मा२दा२३४औहोवा। या२३४५। हन्तायिरक्षो।
र १ २ २ १ २ ५र
बाधातायिपाउ। वा३। हाउवा३। मा२दा२३४औ
र २१११११ २१ २ १ २
होवा। तीर२३४५म्। वरायिवस्कृ। पवन्वृजनाउ।
२ १ २ ५र र २ १ १
वा३। हाउवा३। स्या२रा२३४औहोवा। जा २ ३

* 'चिपः—चिप्यन्त इति चिपः अङ्गुल्यः,—इति वि०

† 'उर्वे प्रदेशे'—इति वि०।

१ १ २ र र र र १ २ र २
४५॥(१) अधीच्चोवाच्चाईया। धाराउ। वा३। हाउ

र र १ २ २ १
वा। यामधृवापृचानाउ। वा३। हाउवा। तिरोरो

२ १ २ २ १ २
म। पवाताआउ। वा३। हाउवा३। द्रा२इदू२३४

५र र ३ १११ २१ २ १ २
औहोवा। ग्धा२३४५:। इन्दूरायिन्द्रा। स्यसाखीया

२ १ ३ ५र र २ ११
उ। वा३। हाउवा३। जू२षा२३४औहोवा। षा२३

११ २र१ २ १ २ २
४५:। देवोदायिवा। स्यमात्माराउ। वा३। हाउ

१ ३ ५र र ३ १११ २र र
वा३। मा२दा२३४औहोवा। या२३४५॥(२) अभीचो

र र १ २ २ र १
वाच्चाईया। व्रताउ। वा३। हाउवा। निपवतेपु

२ २ १ २ र १
नानाउ। वा३। हाउवा। देवोदायिवान्। स्वेना

२ २ १ २ ५र र
रासाउ। वा३। हाउवा३। ना२पा२३४औहोवा।

२ १११ १ २ १ २ २ १
चा२३४५न्। इन्दुर्बाम्मी। णियार्ण्थाउ। वा३। हा

१ ३ ५र र २ १ १ १ १ १
उवा३। वा२सा२३४औहोषा। ना२३४५:। दमाचा

Digitized by Google

२ १ २ २ १ २ १
यिष्णो । मघ्यामाम्राउ । वा३ । हाउवा३ । नोर्श्वा

५२ २ २ १ १ १ १
२३४औहोवा । व्या२३४५यि(३) ॥ १५* ॥ [१]

२ १ ऽ २ ३२ २
॥ सम्पावैयश्वम् ॥ ओ३हायि । ओ३हा । ओहा ।

१ ऽ २ २ १ २ २ १ २ २ २ ४
इया२ । ओ३हा३ए । इन्दुर्वाजी । पवते । गोनियो

५ २ १ २ २ २ १ २ ३ ४ ५ २ १
घाः । इन्द्रे सोमाः । सचइ । न्वन्मदाया । हन्तिर

२ १ २ २ ३ ४ ५ २ १ २
चो । वा३धते । पर्य्येरातीम् । वरिवस्का । एवा ३

१ २ २ ४ २ १ २
न्वृज । ना३४३ । ष्या३रा५जा६५६ ॥(१) अधधारा ।

२ १ २ २ ३ ४ ५ २ १ २ २ २ १ २ २
या३मधु । वापृचानाः । तिरोरोमा । पवते । अद्रि

४ ५ २ १ २ १ २ ३ ४ ५
दुग्धाः । इन्दुरिन्द्रा । स्या ३ सखि । यज्जुषाणाः ।

२२१२२ २ १ २ २ ४
देवोदेवा । स्यमत्स । रो३४३ । मा३दा५या६५६ ॥(२)

२ १ २ १ २ ३ ४ ५ २२ २ २ २
अभिव्रता । नो३पव । तेपुनानाः । देवोदेवान् । स्व

१ २ ३ ४ ५ ५ १ २ १ २ ३
३नर । सेनपृचान् । इन्दुर्र्मर्मा । णो३श्चतु । थाव

* ऊ० गा० ३प्र० १ख० १५गा० ।

Digitized by Google

४ ५ २ १ १ २र २ १
सानाः। ओ३हायि। ओ३हा। ओहा। इया२।
५ २ २ १ २ १ २ २ ४
ओ३वा३ए। दशस्त्रियो। अव्यत। सा३४३। नो३वा
५व्या६५६यि(३)॥ ५* ॥ [२] २०

इति सामवेदार्थ-प्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य

षष्ठः खण्डः† ॥ ६ ॥

अथ सप्तमे खण्डे,‡ प्रथम-सूक्तम्¶—

प्रथमा।

१ २ ३ १ २ ३ १ २
आ ते अग्न इधीमहि द्युमन्तं देवाजरम्।
१ २ २ ३ १ २ ३ २ ३ १ २ ३ १ र
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवी
२र ३ २ ३ १ २
षं स्तोतृभ्य आ भर ॥ १ ॥

---

* ऊ० गा० ८प्र० २अ० ५सा०।

† 'यज्ञायज्ञीयमग्निष्टोम साम'—इति वि०।

‡ 'इहामीमुक्थसामानि'—इति वि०।

¶ 'सत्वयं साम'—इति वि०।

§ छ० आ० ५, १, ४, १ (१भा० ८५४पृ०) = ऋ० वे० ३, ८, ११, ४।

हे "अग्ने!" "द्युमन्तं" दीप्तिमन्तम् "अजरम्" अजीर्णम् "ते" त्वाम् "आ" सर्वतः "इधीमहि" दीपयामः । "यत् ह" यदा खलु "ते" तव "स्या" सा "पनीयसी" स्तुत्या "समित्" दीप्तिं "द्यवि" द्युलोके "दीदयति" दीप्यते तदा हे अग्ने ! "स्तोतृभ्यः" अस्मभ्यम् "इषम्" अन्नम् "आभर" आहर ॥१ ॥

अथ द्वितीया ।

१ २   २ १ २ २ २ १ २
आतेअग्नऋचाहविःशुक्रस्यज्योतिषस्पते ।

१ २ २ २२ १ २ २ १ २२ १ २
सुश्चन्द्रदस्मविश्पतेहव्यवाट्तुभ्यꣳहूयत

२१२ २ २ १ १ २
इषꣳस्तोतृभ्यआभर ॥ २* ॥

हे "ज्योतिषस्पते" दीप्तेः स्वामिन् अग्ने ! "शुक्रस्य" दीप्तस्य "ते" तुभ्यम् "ऋचा" मन्त्रेण सह† "हविः"‡ "आ" आभिमुख्येन "हूयते" । हे "सुश्चन्द्र" सुष्ठाह्लादक ! शोभन-हिरण्य ! वा, हे "दस्म" शत्रूणामुपक्षपयितः ! । शिष्टं गतम् ॥

"ज्योतिषः"–"शोचिषः"—इति पाठौ ॥ २ ॥

* ऋ० वे० ३, ८, २१, ५ ।

† 'याज्यानुवाक्या-लक्षणया'—इति वि० ।

‡ 'हविः—चरु-पुरोडाशादि-लक्षणम्'—इति वि० ।

Digitized by Google

अथ तृतीया ।

१२ २२ ३ १ २ १ ११
ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
१ २ ३१ २ ३ १ २ २
उतोन उत्पुपूर्या उक्थेषु शवसस्पत
१२ ३ २ ३ १ २
इषꣳ स्तोतृभ्य आभर ॥ ३* ॥ २१

हे "सुश्चन्द्र" शोभनाह्लादक ! शोभन-हिरण्य ! वा, अग्ने ! "उभे" "दर्वी" दर्व्यौ हविः-पूर्णे स्रुक्स्रुवौ "आसनि" आस्ये "आ श्रीणीषे" आश्रयसि पचसि वा "उतो"† अपिच "नः" अस्मान् "उक्थेषु" यागेषु‡ "उत्पुपूर्याः उत्पूरय¶ फलैः । हे "शवसस्पते" बलस्य पालयितः ! । इषमित्यादि गतम् ॥३॥२१

१र ४र ५ र २ ४ ५
॥ सञ्जयम् ॥ आतेअग्नइधी । माइ३यि । द्युम
२ ४र५ ४ ५ ३ ४ १र ४र १ ४र ५ र ४ ३ ४र १ ३ ४ ५
न्ता३न्देवअजरम् । यद्धस्यातेपनीयसी । समिद्दीदयता
२ ५ ३ ५ १र ४र५ र
यि । ऊ३ । ऊम् । द्या२३४वी ॥(१) आतेअग्नऋचा ।
२ ४ ५ १ ४र ५ ४ ५ ३ ४ ३ ४
हा३वायिः । शुक्रस्या३ज्योतिषस्पतायि । सुश्चन्द्रदस्म

* ऋ० वे० ५, ८, २२, ४ ।

†,¶ 'उत उ—इति पदपूरणः'—इति वि० ।

‡ 'उक्थेषु—सामसु'—इति वि० ।

Digitized by Google

३ ४ ३र २ ४ ५ २र १ २ ४ ५ ५ २र २ ५
विद्यतेद्रव्यवाऽत्तुभ्यं॒ॢम् । ऊ३ । ऊम् । या२३४ता

२र ४र ५ २ ४ ५ २र २ ४
यि ॥(२) प्रोभेस्तुस्यन्द्रवि । भ्या३ताथि । दवीआ३यि

२र ५ ४५ ५ २र ४ २ ४ र र २र ४ ५ ५
पौषमासनायि । उतोनवत्युपूर्व्यांउक्थ्युप्रवसा । इ३

२ ५ १ र २ १ ५
३ऊम् । पा२३४तायि । इषऽम्त्तोनृभ्याऽ३या । ऊ३ ।

२ २ ५
ऊम्३४म् । भा३४५रोई्हायि(३) ॥ १६ * ॥ [१]

१ र ५ र ४ ५
॥ सौगमतम् ॥ आ२३४ । तेमयद्ध्भी । माहायि ।

२ र १ १२ २ १ २ २
द्यु मन्तन्देवाऽ३ । आ२३ । जरमा । यद्वास्या३ता३यि ।

१ २ ५ २ १ १ २ २
पानीऽरया२३४सी । समिद्धो२द्य । ता२३यि । द्यवि

२ १ र५ र ४ ५ २
या ॥(१) आ२३४ । तेमयक्षचा । हावायिः । भ्रुक्र

र १ १२१ १ २ २
स्यज्योती३ । षा२३ः । पतया । सुश्चान्द्रा३द्दा३ ।

१ २ ५ २१ १
स्ववाऽरयिम्रपा२३४तायि । द्रव्यवा२ट्तुभ्यम् । ऊ२३ ।

२२२ १ र ५ ४ ५
यतया ॥(२) यो२३४ । भेस्तुस्वन्द्रवि । प्रपानायि ।

* क० गा० ३प्र० १च० १६गा० ।

Digitized by Google

१२ २ २ ३२ १ ३ २ २ १ ० २
ट्वीश्रोणोषे३ । श्रा२३ । सनिया । उतोना३ऊ३त् ।
१ ३ ३ २ ३२ १ ३ ३ ३
पुपू२रा२३४या: । उक्थे षू२भव । सा२३: । पतथा ।
१ २ २ १ ५ २ ५
इषाऽस्तो३ष्टू३ । भ्या२३आ३ । भा३४ ५ रो ६ हायि ।
॥ ६ * ॥ [१२] २१

अथ द्विती-यत्चेर्†—

प्रथमा ।

१ २ ३ १ २ ३ १ २ ३ २ ३ २
इन्द्रायसामगायतविप्रायबृहतेबृहत् ।
३ १ २ ३ १ २ ३ १ २
ब्रह्मकृतेविपश्चितेपनस्यवे ॥ १ ‡ ॥

हे उद्गातार: ! "इन्द्राय" "बृहत्" एतन्नामकं साम "गायत" उच्चरत । कीदृशाय ? "विप्राय" मेधाविने "बृहते" महते "ब्रह्मकृते" वृष्टिद्वारा हविर्लक्षणस्यान्नस्य कर्त्रे "विपश्चिते" विदुषे "पनस्यवे" स्तुतिमिच्छते ॥

"ब्रह्मकृते"-"धर्मकृते"—इति पाठो ॥ १ ॥

---

* ऊ० गा० १०प्र० १ख० ६सा० ।

† छ० आ० ४, २, ५, ८ (२भा० ७९१ पृ०)=ऋ० वे० ६, ७, १, १ ।

‡ 'महावैश्वामित्रं साम'—इति वि० ।

अथ द्वितीया।

१र १र २३१२ ३१र २र
त्वमिन्द्राभिभूरसित्वꣳसूर्य्यमरोचयः।
३१२ २३१२ ३१ २
विश्वकर्म्माविश्वदेवोमहाꣳअसि ॥ २ * ॥

हे "इन्द्र!" "त्वम्" "अभिभूः" शत्रूणाम् अभिभविता "असि" भवसि" किञ्च "त्वम्" "सूर्य्यम्" आदित्यम् "अरोचयः" तेजोभिरदीपय,† किञ्च "विश्वकर्मा" विश्वस्य कर्त्तासि "विश्वदेवः" सर्वदेवश्चासि [तथाच यजुर्ब्राह्मणम्—"अग्निं वा अन्वन्या देवता इन्द्रमन्वन्या" इति] अतो "महान्" सर्वाधिकोऽसि ॥२॥

अथ तृतीया।

३ २ ३ १ २३ २ १२ ३२३१
विभ्राजञ्ज्योतिषास्वाऽ३ऽरगच्छोरोचनन्दिवः।
३१ २ ३१ २
देवास्तइन्द्रसख्यायये मिरे ॥ ३‡ ॥ २२

हे "इन्द्र!" त्वं "ज्योतिषा" तेजसा "दिवः" आदित्यस्य "रोचनं" प्रकाशकं अधिकरणत्वेन "स्वः" स्वर्ग "विभ्राजत्" प्रकाशयन् "अगच्छः" अप्राप्नोः, किञ्च "देवाः" सर्वाः "ते" तव

---

* ऋ० वे० ६, ७, १,२।

† 'त्वं सूर्यमपि दीपयसे'—इति वि०।

‡ ऋ० वे० ६, ७, १, ३।

Digitized by Google

"सख्याय" मित्वाय "येमिरे" स्वं स्वमात्मानं नियमितवन्तः:* अस्माकम् इन्द्रः सखा यथा स्यादिति सर्वे देवाः प्रयत्नमकार्षु-रित्यर्थः ॥ ३ ॥ २२

२र र१ १ ४ १
॥ सौमित्रम् ॥ औहोहोयि। औ३होऽ३यि। ओ
१ र १र १र २ १११९ १
३२३४५वा६५६। इन्द्राऽ२यसामगायताऽ२३४५। विप्रा२
२ २ १ १ ११११ २ २ १
यबृहा१त्। ब्रह्मकृते२विपश्चिते२३४५। ए३। पनस्य
१११११ १ १र १र २११११ १ र २र
वे२३४५॥(१) त्वमिन्द्राभिभूरसी२३४५। त्वꣳसूर्य्यमरो
१११११११ २१ २र १ र२११११ २ २
चया२३४५ः। विश्वकर्मा विश्वदेवा२३४५ः। ए३। म
१र १११२ २ १र२ १र २र१ ११११
हाꣳअसा२३४५यि ॥(२) विभ्राजञ्ज्योतिषा स्वा२३४५ः।
१ २र र १ २ १र१र २ १र १ १ १ १
अगच्छो रोचनन्दिवा१ः। देवास्तइन्द्रसख्याया२३ ४ ५।
१र १र २ ४ २ २
औहोहोयि। औ३होऽ३यि। ओ३२३४५वा६५६। ए३।
१र१ ११११
येमिरा२३४५यि(३) ॥ १७ † ॥ [१] २२

* 'एतदुक्तं भवति—त्वदीयाय सख्याय चात्मानं नियेमिरे'—इति वि०।

† ऋ० गा० ३प्र० १ख० १७सा०।

अथ तृतीय-तृचे*—

प्रथमा ।

१ २ ३ १ १   ३ १ २   ३ १ २
असाविसोमइन्द्रतेशविष्ठधृष्णवागहि ।
१ २   ३ २उ   ३ १ ३   १२ १ २
आत्वापृणक्त्विन्द्रियꣳरजःसूर्य्योनरश्मिभिः ॥ १ † ॥

हे "इन्द्र !" "ते" त्वदर्थं "सोमः" "असावि" अभिषुतोऽभूत् । हे "शविष्ठ" अतिशयेन बलवन्! अतएव "धृष्णो" शत्रूणां धर्षयितः! इन्द्र! "आगहि" देवयजनदेशमागच्छ, आगतञ्च "त्वा" त्वाम् "इन्द्रियं" सोमपानेनोत्पन्नं प्रभूतं सामर्थ्यम् "आ पृणक्तु" आपूरयतु । "रजः" अन्तरिक्षं "रश्मिभिः" किरणैः "सूर्यो न" यथा सूर्यः पूरयति तद्वत् [शविष्ठ--शवस्विन्-शब्दादिष्ठनि विन्मतोर्लुक्, "टेः (६,४,११५)"—इति टि-लोपः, पादादित्वान्निघाताभावः (८,१,१८) । गहि—गमेर्लोटि "बहुलंछन्दसि (२,४,७३) "—इति शपो लुक्, "अनुदात्तोपदेश (६,४,३७)"—इत्यादिना अनुनासिक-लोपः, तस्य असिद्धवदत्रा-भात् (६,४,२२)"—इत्यसिद्धत्वाद्धेर्लुगभावः ॥ १ ॥

---

* 'मधावैश्वामित्रं साम'—इति वि० ।

† ऋ० सं० ४, २, १, ६ (१भा० ७०९पृ०)=ऋ० मं० १, ९, ५, १ ।

अथ द्वितीया।

१ २ ३१२ ३२ ३ १ २ ३ १ २
आतिष्ठवृत्रहन्रथंयुक्तातेब्रह्मणाहरी।
२ ३ २ ३१ २ ३ १ २ ३ १ २
अर्वाचीनꣳसुतेमनोग्रावाकृणोतुवग्नुना॥ २ *॥

हे "वृत्रहन्" शत्रूणां हन्तः इन्द्र! "रथम्"† "आ तिष्ठ" आरोह। यस्मात् "ते हरी" त्वदीयावश्वौ "ब्रह्मणा" स्तोत्रलक्षणेन मन्त्रेण‡ "युक्ता" रथेऽस्माभिर्योजितौ ["सुपां सुलुक् (७,१,३९)"—इत्याकारः] तस्मात् त्वं रथमातिष्ठ। "ते मनः" त्वदीयं मनश्च "ग्रावा" अभिषवार्थं प्रवृत्तः पाषाणः "वग्नुना" वचनीयेनाभिषवशब्देन ["वचेर्गश्च (उ० ३, ३३)"—इति नु-प्रत्ययो गकारश्चान्तादेशः] "अर्वाचीनम्"—अस्मदभिमुखं "सुकृणोतु" सुष्ठु करोतु॥ २॥

अथ तृतीया।

१ ३ १र २र ३ १ २
इन्द्रमिद्धरीवहतोऽप्रतिधृष्टशवसम्।
१ २ ३१र २र३१२ १ २
ऋषीणाꣳसुष्टुतीरुपयज्ञञ्चमानुषाणाम्॥ ३ ¶॥ २३

॥ इति तृतीयः प्रपाठकः॥

* ऋ० वे० १, ६, ५, २=य० वे० ८, ३३।

† 'रथं—रंहणीयं वेगवन्तम्'—इति वि०।

‡ 'ब्रह्मणा—त्रैविद्य-लक्षणेन अथवा ब्रह्मणा अन्नेन। अथवा ब्रह्मणा हिरण्यगर्भेण'—इति वि०।

¶ ऋ० वे० १, ६, ५, १=य० वे० ८, ३४।

"अप्रतिधृष्टशवसं" केनाप्यधर्षितबलमहिंसितबलमित्यर्थः "इन्द्रमित्"*इन्द्रमेव "ऋषीणां" वसिष्ठादीनां† "मानवाणाम्" अन्येषां मनुष्याणाञ्च "सुष्टुतीः" शोभनाः स्तुतीः "अश्वा" "हरी" अश्वौ "उप वहतः" समीपं प्रापयतः। यत्र यत्र स्तुवन्ति यत्र यत्र यजन्ते तत्र सर्वत्रेन्द्रमश्वौ प्रापयत इत्यर्थः। [मानुषाणाम् "मनोर्जातौ (४,१,१६१)"—इति मनु-शब्दादञ् षुगागमश्च] ॥ "ऋषीणां सुष्टुतीः"-"ऋषीणाञ्चस्तुतीः"—इति पाठौ ॥३॥ २३

॥ महावैश्वामित्रम् ॥ इयायि । इया३ । ओहा ओहा । (एवन्त्रिः) असाविसो । मइन्द्राता२यि । शविष्ठधा । ष्णा वागाही२ । आत्वापृणा । न्ता इन्द्राया२म् । रजःसूर्य्यो । नरश्मायिभा२यिः ॥(१) आतिष्ठ वा । तृहन्नाथा२म् । युक्तातेब्रा । ह्मणाहारी२ । अर्वाचीनाम् । सुतेमाना२ः । ग्रावाकृणो । तुवग्नूना२ ॥(२) इन्द्रमिद्धा । रीवहाता२ः । अप्रतिधा । ष्टश

* 'इत्—इति पदपूरणः'—इति वि०।

† 'ऋषीणां—दर्शन-समर्थानाम्'—इति वि०।

Digitized by Google

१ २ २ ३ १२ १
वासा२म्। क्षणीणा९सूं। ष्टुतीरूपा२। यज्ञश्चमा।
१ १२ २ १
नुषाणा२म्। यज्ञश्चा। मानुषाणा२म्। इयायि।
४ ५ ४ ५ ३ ५ ३
इया३। ओहाओहा। ३। होऽइडा। २। होर३४५ई।
डा(३) ॥ १८ * ॥ [१]

१२ २ २ ३२ १
॥ त्वष्ट्रीसाम † ॥ असाविसो३हा। मइन्द्राता२यि।
१ २ २ ३ २२ १ १२ २ २ २ २
प्रविष्ठधा३हा। एवागाही२। आत्वापृणा३हा। तु
२ १ १ २ १ २ ३२ १ ५
इन्द्राया२म्। रजःसूर्य्यो३हा। नरा३होर३४। वा।
४ ५ १२ २ २ ३ १ १
मा५यिभोई्हायि ॥(१) आतिष्ठवा३हा। तृषन्नाथा२
१ २ २ २ २ ३ २२ १ १२ २ २
म्। युक्तातेब्रा३हा। ह्मणाहारी२। अर्वाचीना३९
२ ३ २२ १ १ २ २ २ ३ १ १
हायि। सुतेमाना२ः। ग्रावाक्षणो३हा। तुवा३होर
५ ४ ५ १ २ २ १२
३४। वा। ग्रे५नोई्हायि ॥(२) इन्द्रमिद्धा३हा। री
२ १ २ २ ३ २१ १ २
वहाता२ः। अप्रतिधा३हा। ष्टप्रवासा२म्। क्षणी

* उ० गा० ३प्र० १भा० १८सा०।

† 'खारत्वाष्ट्री'—इति क० पु० पाठः।

Digitized by Google

र २ १ २ ३ २र १ १ १ १ ३र २
णाꣳसूꣳहा। ष्टुतीढ़पा२। यम्म्वा३हायि। मानू३
१ ५ ४ ५
घो२३४। वा। घा५णोꣳहायि(३) ॥ १८ * ॥ [२]

५ र ३ १ ४ ५ १
॥ गौरीवितम् ॥ असा। विसो३। मइन्द्रतायि। प्र
र १ र २ ४
विष्ठधृष्णुवागचा२३यि। आत्वापृणा३१२३। क्तुइ५द्रि
१ र १ ४ ५ ४ ५
याम्। राजःसूर्यो३१२३। नरोवा। श्मा५यिभोꣳहा
५र ३ २ ४ ५ १ र र
यि ॥(१) आति। ष्ठवा३। त्वचनुथाम्। युक्तातेब्रह्म
र १ र र २ ४ १
णाचरा२३यि। आर्वाचीना३१२३म्। सुते५मनाः। आ
र २ ४ ५ ४ ५ ५
वाक्रणो३१२३। तुवोवा। गू५नोꣳहायि ॥(२) इन्द्रम्।
३ २ ४र ५ १ १ ३र
दृह्मा३। रीवहताः अप्रतिधृष्टशवसा२३म्। आर्षी
र १ ४ १ २ ४र
णाꣳसू३१२३। ष्टुती५ढ़पा। याम्म्वा३१२३। मानो
५ ५
वा। घा५णोꣳहायि(३) ॥ ४ † ॥ [३] २३

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य षष्ठस्याध्यायस्य

सप्तमः खण्डः ॥ ७ ‡ ॥

---

* ऊ० गा० ११प्र० २ख० १८गा०।

† ऊ० गा० ११प्र० १ख० ४गा०।

‡ 'द्वादशस्य पञ्चमः परिसमाप्तम्'—इति वि०।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ६ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे षष्ठोऽध्यायः* ॥

---

* 'तृतीयः प्रपाठकः परिसमाप्तः'—इति वि० मूलग्रन्थसम्मतम् ।

Digitized by Google